Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. २५६- घ

Title अलंकारकौस्तुभविवरणम् - टीका

Author विश्वेश्वरः

Extent १८१ Age ....

Subject अलंकारः

© Dharmartha Trust J&K. Digitized by eGangotri

नं० २५६-घ
अलंकारकौस्तुभ
विवरणम
(टीका)
पत्राणि १८१

rmartha Trust J&K. Digitized by eG

नं. २५६ घ

७२

अलंकारकौस्तुभ

३१४०

© Dharmartha Trust J&K. Digitized by eGangotri

३अ॰कौ॰टी॰
॥१॥

॥श्रीगणेशायनमः॥ वाग्देवतांद्विरदवक्त्रमपिप्रणम्यलक्ष्मीधरस्यविदुषश्चरणावुपास्य॥भावा
नलंकरणकौस्तुभगुंफितान्स्वान्विश्वेश्वरोविवरितुंयततेसमासात्॥१॥अभिमतकर्मारंभसम
येसदाचारानुमितश्रुतिबोधितकर्त्तव्यताकंप्रारिप्सितप्रतिबंधकदुरितनिवृत्तयेकृतंमंगलंशि
ष्यशिक्षार्थंनिबध्नाति॥दन्तस्त्वेति॥क्रूरस्यशुंडायाअग्रिमभुवापुष्करभागेन॥स्कंदस्यषण्मुखे
त्वेनएकमुखेनस्तनपानेमुखांतराणांतल्लाभकृतवैमनस्यनिवृत्तयेतेषुस्तन्यरसदानं॥भ
गवतोलंबोदरस्यचगजमुखतयाकुंभलग्नमदलुब्धभ्रमराणांस्कंदेनबहुभुजतयावारणमिति
परस्परस्नेहवर्णनं॥तिर्यग्दर्शनंतदवस्थायांबालकस्वभावः॥स्कंदस्यअल्पाचूत्वेपिभ्रातुर्ज्या
यस्त्वमितिद्वंद्वेमातुरस्यपूर्वनिपातः॥गणेश्वरगुहयोर्विघ्नविनाशकत्वंप्रसिद्धमेवतथाचस्मृतिः॥
आदित्यस्यसदापूजांतिलकस्वामिनस्तथा॥महागणपतेश्चैवकुर्वन्सिद्धिमवाप्नुयात्॥नम्रसं

॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

गेन सर्ववाङ्मयरूपिण्या जगदंबिकाया अपि प्रतिसंधानं। तदुक्तं वायुसंहितायां। शब्दस्वरूपम
खिलं धत्ते शर्वस्य वल्लभा॥ अर्थस्वरूपमखिलं धत्ते बालेंदुशेखरः॥ अत्रोक्तपरमदेवताविषयक
भावध्वनिः प्रधानं। गणेशगुहयोः परस्परविषकभावश्चेतदंगं स्वभावोक्तिरर्थालंकारः। स्वगुरुप्र
णाममाह। लोकेति। अंधकारपदेन वस्तुविवेकप्रतिकूलत्वसाधर्म्येण अज्ञानस्यापि लाभात्त
स्यातिमिराभेदस्सूचनं भ्रांतिलसणाभ्यामुपस्थितयोरप्यर्थयोर्गंगायां घोष इत्यादावभेदप्रत्यया
भ्युपगमात्। तन्निवर्तकत्वेन परागेषु प्रदीपत्वारोपः। विघ्नेव कल्पलताऽनेकदुर्लभार्थप्रदत्वात्।
बीजत्वं तदुत्पत्तिहेतुत्वात्। निजपदं परागपरं। मध्येमौलिशिरोमध्ये पारे मध्ये षष्ठ्या वेत्यव्ययीभा
वः। ममेत्यस्य मौलिना सहान्वयः। आसतां तिष्ठंतु आसु उपवेशने इत्यस्य लोटि प्रथमपुरुषे बहु
वचने श्रीपदमुत्कर्षसूचकं। लक्ष्मीः सर्ववाङ्मयरहस्यावगाहनजन्यातिशयविशेषस्तदन्यापि

म

© Dharmartha Trust J&K. Digitized by eGangotri

सोत्कर्षधीजनकतयाऽनुभवसिद्धः। यदभिप्रायेणाशोभतेस्य मुखं य एवं वेदेति गर्गत्रिरात्रब्राह्मण
वाक्ययोग्यानुपलब्धिदोषनिराकरणाय भगवता जैमिनिनाऽर्थवादाधिकरणे विद्याप्रशंसेति
सूत्रितं। गंगाधरादिवत्साधुत्वं। एतेन श्लेषोपस्थितनारायणाभेदस्तवनं। आचार्यं मां विजानी
यान्नावमन्येत कर्हिचिदिति श्रीभागवतात्। अंघ्रिनलिनेत्युपमितसमासः। उदीतेति। ईरितः कां
तिगतिव्याप्तिक्षेपप्रजनखादनेष्विति कविकल्पद्रुमपठितस्य उत्सर्वस्य रूपं। प्रियसखेतः स्पष्टमु
दीतकं टकामित्यादिवत्। चिकीर्षितं प्रतिजानन्नेव प्रयोजनाद्याह। अर्थेति। अलंकारा द्विधा शब्दा
र्थभेदात्। शब्दालंकारा यमकादयः। अर्थालंकारा उपमादयः। आद्येषु तथा विचारणीयाभावा
र्था दलंकारा एव विचार्यंते। अनेकविप्रतिपत्तिगहनत्वात्। अप्रामाण्यशंकानिरासाय भूरिग्रंथेति।
पौनरुक्त्यवारणाय। सारेति। प्रयोजनमाह। सुखेनेति। तद्बोधकांश्चाधिकारीति सामर्थ्याद्देवलभ्य

© Dharmartha Trust J&K. Digitized by eGangotri

ते। तथा चाहुः। सिद्धार्थं सिद्धसंबंधं श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः संबंधः सप्रयोजनः।
परमप्रयोजनं तु यत्काव्यस्य तदेवास्यापीति बोध्यं। तच्चान्यत्र स्पष्टमिति नात्र प्रपंच्यते। अस्य ग्रंथ
स्य मंदद्रुबोधतामाह। धियामिति। मूर्खवैधेयस्य बालिशाइत्यमरः। एतेन मंदार्थमेतन्निर्माणमिति
रासः। विनयार्थमाह। बुधानामिति। सुखेन आधातुं शक्यं स्वाधानं सुकरमित्यर्थः। आनीय युक्तिति
आर्द्रं। ताद्धातोः शक्यार्थे युत्। बुधानां ज्ञानस्य सिद्धत्वात्तदर्थं तावदेतदारंभ इति व्याख्यातमेवाच
मत्कारोपि तेषामेतादृशास्त्वत्मार्थो नूनं स्यादेवेत्यर्थः। पारिलक्षणतिचं वलंकरोति ग्रंथे प्रवर्त्तयतीत्य
र्थः। निबंधाः काव्यप्रकाशादयः। अभिसंधानमभिप्रायः। तत्तदभिप्रायाणां तत्त्वं येषु व्यस्ततात्वादेकत्र
संग्रहः सौकर्यातिशयार्थं क्रियत इति भावः। तत्रार्थोपकारद्वारा रसोपकारकत्वमर्थालंकारत्वमि
तिसामान्यलक्षणं प्रसिद्धं। साक्षाद्रसोपकारकेषु गुणेषु व्यभिचारवारणाय द्वारांतं। तत्स्पष्टत्वा

४(इयं एतादृशाकृतिः संपन्नेति शेषः कुत इत्यत आह)
(पारीत्यादि)

© Dharmartha Trust J&K. Digitized by eGangotri

दुंपेस्य काव्यप्रका[illegible]शासंमतालंकाराणामेवात्र व्यवस्थापयंयतांसूचयन् एतदन्यतमत्वरूपं
लक्षणांतरमपि द्योतयन्नाह। अथेति। भावोक्तिः स्वभावोक्तिः। कितवोक्तिर्व्याजोक्तिः। प्रतीपस्यात्र
संयोगस्य पाठादिगतत्वात्तस्मिन् परतो भ्रमेत्यत्र त्यस्य अकारस्य न गुरुत्वं। तदुक्तं वृत्तरत्नाकरे।
पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः। पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः। नन्वलंकारांतरा
ण्यपि ग्रंथांतरेषु दृश्यंत इति तदनभिधानान्न्यूनतेत्याशंक्याह। विद्वत्प्रवरैरिति। तेषां तु विद्वद्द
शीयैरभ्युपगमान्निरसनीयत्वान्न तथेति भावः। यद्यप्युद्देशक्रमेणैव विभाग इत्युपमादि
रूपणप्राथम्यमर्थादेव सिद्धं। तथापि प्रथमोद्देशे एव किं बीजमित्याक्षेपमाशंक्य तत्रानियाम
कमाह। तत्र यत्किंचिदित्यादि॥ भरतेस्य लंकारशास्त्रस्य प्रामाणिकत्वसूचनं। अनन्वयादा
वपि सादृश्यप्रतीतिपर्यवसानं स्पष्टमेव भंगिभेदात्त्वलंकारभेद इति भावः। एवं च भरतशास्त्रे

© Dharmartha Trust J&K. Digitized by eGangotri

व

पि।उपमायाःप्रथमोद्देशेइदमेवलिखामकेबोध्यं।यद्यपिप्रकृतित्वेनवचनसाध्यंतथापितत्सम
तत्वस्यवचनायभरतवनोपन्यासः।लक्षणमिति।लक्षणाज्ञानाभावेधर्मिणएवसम्यग्बुद्ध्यावना
रोहात्सामान्यस्यनिरूपणानंतरमेवविशेषस्यनिरूप्यत्वादित्यर्थः।आहेत्यत्रकारिकाकृदि
तिशेषः।कारिकायांतत्रेत्यस्यलक्षणांतर्भावेप्रयोजनाभावान्निर्द्धारणपरतयायोजयति॥
ष्वि
तत्रनिरूपणीयेति।निरूपणंचस्वरूपभेदादिबोधजनकशब्दः।अलंकाराः[illegible]शिष्यबोधविष
यीभवंतीत्याकारकेच्छाविशेष्यत्वंविषयत्वरूपेणकृत्यप्रत्ययार्थः।व्यापारानुबंधिनीविषयता
मात्रायप्रकृत्यर्थस्यप्रत्ययार्थेऽन्वयः।उपमेयोपमापिलक्ष्यैवेतिचित्रमीमांसामतनिरासाया
हा।उपमेयोपमावारणायेति।एकपदोपादानेतुतत्रचंद्रइवमुखंमुखमिवचंद्रइतिवाक्यद्वयबो
व
ध्यत्वान्नव्यभिचारः।नचैवमपिव्यभिचारस्तादवस्थ्यंप्रत्येकमेकवाक्यवाच्यत्वसत्वाद्वाक्यभेदसं

© Dharmartha Trust J&K. Digitized by eGangotri

हितायामुपमेयोपमायांतु सुतरामेव तथात्वैकवाक्यवाच्यत्वसत्वादितिवाच्यं। उपमेयत्वाभिम
तप्रतियोगिकोपमानवृत्तिसादृश्याविषयकज्ञानविषयत्वेनतात्पर्यविषयत्वस्यतदर्थत्वात्। वा
च्यतीति। वाक्यार्थज्ञानविषयीभूतेत्यर्थः। तेनलक्ष्यसादृश्यस्यापिसंग्रहः। नन्वेवंसत्युपमेयत्वा
भिमतप्रतियोगिकोपमानवृत्तिसादृश्याविषयकज्ञानविषयत्वेनतात्पर्यविषयत्वेसतिभिन्न
निरूपितंसादृश्यमुपमेतिपर्यवसितं। तथाचव्यतिरेकेव्यभिचारः। तत्रापिसादृश्यस्यपयोक्त
तात्पर्यविषयत्वात्। नचतत्रव्यतिरेकएवकेवस्तात्पर्येनतुसादृश्यइतिवाच्यं। धर्मांतरप्रयुक्त
सादृश्याभावस्यैवव्यतिरेकपदार्थतयासादृश्यस्यापितद्विषयत्वानपायात्। विधेयतयातात्प
र्यविषयत्वनिवेशेपिसयपयोप्रथमेप्राचीतुल्यंप्राचीनवद्विषयादावनुवाद्यसादृश्यरूपोप
मायामव्याप्तेश्चेत्यादिदोषोद्धारायाह। फलितार्थस्त्विति। अर्थालंकारत्वनिर्वाहायव्याचष्टे॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र

यच्छब्दबोध्यायामिति। यस्यां शाब्दबोध्यायामिति कर्मधारयः। शाब्दबोध्यत्वं च अन्वयबोधविष
यत्वमात्रं। तेन चेदं इदं वेत्यादौ प्रतियोगितायाः संसर्गविधयैवभासमानत्वाच्छब्दार्थत्वाभावे
पि न क्षतिः। यच्छब्दार्थस्य शाब्दविशेषणत्वे विधेयपरामर्षिणा। तच्छब्देन तस्यैव परामर्षेश
ब्दादृशेनैवोपमात्वविधानापत्तावसंगतिप्रसंगात्। उक्तरीत्या तु प्रतियोगितायाएव यच्छब्दे
नोपादानेनानुपपत्तिः। तथा च शाब्दबोध्यत्वमपि प्रतियोगितायां विशेषणं देयमित्यर्थः। उपमा
नन्त्विति सादृश्यप्रतियोगित्वमेवोपमेति मतमाश्रित्येदं। सादृश्यमेवोपमेति पक्षे तु यत्सादृश्य
त्यस्य यस्य सादृश्यस्य प्रतियोगितायामिति यत्पदार्थः सादृश्यविशेषणं। सादृश्ये च शाब्दबो
ध्यत्वं विशेषणं पूर्ववत्। सा उपमेत्यत्र सेति स्त्रीत्वं तु विधेयप्रतिलिंगग्राहित्वात्। तदुक्तं कैयटादिभिः।
उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तल्लिंगमुपाददत इति। क्वचित्तु

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
॥५॥
5

द्देश्यलिंगताक्वचित्तु विधेयलिंगताविवक्षाभेदादितिसदर्थः। एवमन्यत्राप्यवसेयं। उभयाभावइति।
उभयप्रतियोगिकोऽन्यतरत्वावच्छिन्नप्रतियोगिताकोऽभावइत्यर्थः। नतूभयत्वावच्छिन्नप्रतियो
गिताकः। तथासत्य[illegible] नन्वये उपमेयतावच्छेदकावच्छिन्नत्वसत्वेपि स्वाश्रयमात्रवृत्तित्वानवच्छेद
कधर्मसामानाधिकरण्यं नास्तीत्युभयत्वाद्यवच्छिन्नप्रतियोगिताकाभावसत्वाद्व्यतिरेकेच स्वा
श्रयमात्रवृत्तित्वानवच्छेदकधर्मसामानाधिकरण्यसत्वेपि उपमेयतावच्छेदकावच्छिन्नत्वं प्रतियो
गितायां नास्तीति तादृशाभावसत्वाद्व्यभिचार[illegible]तादवस्थ्यापत्तेः। अन्यतरत्वावच्छिन्नप्रतियो
त्र गिताकस्त्वभावोऽन्यतरवतिनसंभवतीति न तदुभयं व्यभिचारः। नचोभयाभावपदेनोभयत्वस्यै
वप्रतियोगितावच्छेदकत्वं लभ्यत इति वाच्यं। भूतलमूर्तत्वोभयवान्मूर्तत्वादित्यादौ द्वित्वाद्यव
च्छिन्नाभावस्य तथात्वेपि तिरोधितिपर्वाकेऽद्वयवृत्तिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताका

© Dharmartha Trust J&K. Digitized by eGangotri

भावपरतयापि व्याख्यानदर्शनात्। उत्सर्गस्य बाधके तैः सति अप्रयोजकत्वात्। स्फुटइति। तत्र चंद्रत्व

स्य सादृश्यप्रतियोगितावच्छेदकतया चंद्रवृत्तिसादृश्यप्रतियोगितायां उपमेयतावच्छेदके मुखत्वा

वच्छिन्नत्वाभावस्य उक्तप्रतियोगिताश्रयीभूतचंद्रमात्रवृत्तिप्रतियोगितानवछेदकधर्मसामाना

धिकरण्याभावस्य च सत्वादित्यर्थः। ननु स्वाश्रयमात्रे स्यादि विवक्षायामसंभवापत्तिः। चंद्रमात्रवृत्तिः

प्रतियोगितानवच्छेदकश्चधर्मस्तन्मात्रवृत्तिभेदव्यक्त्यादिः तत्सामानाधिकरण्यस्य प्रतियोगितायां

सत्वादित्यत आह। उक्तधर्मश्चेति। तद्व्यक्तीति। उपमाश्रयत्वाभिमतवाक्यार्थबोधविषयीभूतेत्यर्थः। त

थाच तादृशभेदादेश्चंद्रादिमात्रवृत्तित्वेपि चंद्र इव मुखमित्येतद्वाक्यबोध्यत्वाभावान्न दोष इत्यर्थः। न

न्वेवमपि चंद्र इव मुखमित्यत्र चंद्रमात्रवृत्तिः प्रतियोगितानवच्छेदकस्तद्वाक्योपस्थाप्यश्च धर्मो प्रसिद्ध

एव मुखत्वसादृश्ययोश्चंद्रेतरवृत्तित्वात् चंद्रत्वस्य सादृश्यप्रतियोगितावच्छेदकत्वात्। अन्यस्य च त

© Dharmartha Trust J&K. Digitized by eGangotri

द्वाक्यानुपस्थाप्यत्वात्। मैवं। प्रतियोगितारूपस्यैव तादृशधर्मस्य सुलभत्वात्। न च तस्यां तत्सा
मानाधिकरण्यस्यैव सत्वादसंभव इति वाच्यं। भेदगर्भसामानाधिकरण्यस्य तत्राप्यभावोप
पत्तेः। चंद्रत्वावच्छिन्नप्रतियोगितायाश्चंद्रेतरावृत्तित्वस्यापि सत्वात्। व्यधिकरणधर्मावच्छिन्ना
भावानभ्युपगमात्। अभ्युपगमे वा तस्य संयोगाद्यवच्छिन्नतया सादृश्यप्रतियोगितायाअत
थात्वेन तद्भिन्नत्वात्स्वपदेन सादृश्यनिरूपितप्रतियोगिताया एव धारणात्। न चैवमिति। एवं त
द्वाक्योपस्थाप्यत्वस्यापि धर्मविशेषणीकरण इत्यर्थः। अनुपपत्तेति। व्यतिरेके हि क्वचिदपकर्षहे
तुः शब्दोपात्तः क्वचिदर्थलभ्य इत्यग्रे वक्ष्यते। तत्रोपमानवृत्तेरपकर्षहेतुधर्मस्य शब्दोपात्तत्वेत
स्यापि तद्वाक्योपस्थाप्यत्वेन त सामानाधिकरण्याभावः सादृश्यप्रतियोगितायां नास्तीति
व्यभिचारवारणापितस्यार्थगम्यत्वे धर्मे तद्वाक्योपस्थाप्यत्वाभाव प्रयुक्तस्य तादृशधर्मसा

ए॥

© Dharmartha Trust J&K. Digitized by eGangotri

मानाधिकरण्याभावस्य सत्त्वादिति व्याप्तिरिति भावः। न चापकर्षहेतुधर्मो पादाने पितस्योपमानमात्रत्वाभावात्कथं नातिव्याप्तिः। कलंकादेरन्यत्रापि सत्त्वात्। मैवं। तद्धाक्यार्थे उपमानेतरवृत्तित्वेन प्रतीयमानत्वाभावस्यैव तत्रावृत्तित्वस्य विवक्षितत्वात्। यद्वा। उपमेयावृत्तित्वमेव तेन विवक्षणीयं तत्स्वरूपस्य विशेष्यत्व प्रकारत्वान्यतरसंबंधेनोपमेयवृत्तिधर्मा भेदारोपव्यवच्छेद्यत्वत्वं अन्यथा चंद्र मुखादिवृत्ति रमणीयत्वादेर्वस्तुतो भिन्नतया संभवापत्तेः। पांड्योयमित्यादौ हारनिष्ठरादेरभेदारोपस्यावश्यकतया निष्ठरस्य यथोक्तोपमेयावृत्तित्वाभावान्नाव्याप्तिः। न चैवमपि सादृश्यप्रतियोगित्वरूपतादृशधर्मसामानाधिकरण्यस्य सादृश्यप्रतियोगितायां सत्त्वादसंभवतादवस्थ्यमिति वाच्यं। भेदगर्भसामानाधिकरण्यनिवेशस्योक्तत्वात्। सादृश्यादिति। तथा च व्यतिरेकविशेषतयाल्पेपि तत्त्वस्य अलंकारसाक्षाद्विभाजकत्वाभावाद्व्यतिरेकत्वावच्छिन्नस्य चोक्त

वृत्ति

© Dharmartha Trust J&K. Digitized by eGangotri

लक्षणाक्रांतत्वान्नव्यभिचारः।नतथ्व यस्यांप्रतियोगितायामलंकारसाक्षाद्विभाजकोपाध्य
वच्छेदेन यथोक्ताभावइतिप्रवक्ष्यतीतिभावः।वस्तुतस्तु तद्व्यक्त्युपस्थाप्यत्वं तद्व्यक्तितात्पर्यविष
यत्वमात्रं नतु तज्जन्यशाब्दधीविषयत्वमेव अतोनुपपत्त्यापकर्षहेतावपि व्यतिरेके प्रकर्षप्रयोजक
धर्मस्य तद्व्यक्तिबोध्यसादृश्याभावप्रयोजकतया तद्व्यक्तितात्पर्यविषयत्वसत्त्वात्सादृश्यधर्म
निष्ठतद्व्यक्त्युपस्थाप्यत्वाभावप्रयुक्तोपि सादृश्यधर्मसामानाधिकरण्याभावो नास्तीति न व्यभि
चारः।चंद्रादिमात्रवृत्तिभेदव्यक्त्यारोप्यवस्तुकत्वं इतरावृत्तित्वेपि तद्व्यक्तितात्पर्यविषयत्वाभा
वात्तत्सामानाधिकरण्यस्य प्रतियोगितायांसत्वेपि नासंभवावकाशइति ध्येयं।प्रतियोगिता
वच्छेदकेति।धर्मसंबंधोभयपरं समवायेन घटपटाद्यभावस्य संयोगसमवायाभ्यां घटाभावस्य
च प्रतियोगिताभ्यांभेदात्।नतु स्वनिरूपकाश्रयभेदेनापि तद्भेद इत्याह।भूतलेति।तदादीत्यर्थः।

© Dharmartha Trust J&K. Digitized by eGangotri

श्रयो

भूतलपर्वतादिनिष्ठो यो घटात्यंताभावस्तादृशरूपो घटान्योन्याभावः तत्प्रतियोगितयोः स्व
निरूपकाभावाश्रयभूतलपर्वतादिभेदेन भेदाभावात्। संयोगेन घटत्वावच्छिन्नाभावीयप्रतियो
गितायास्तादात्म्येन घटत्वावच्छिन्नभेदीयप्रतियोगितायाश्चाभावाधिकरणभेदेपि भेदाभावा
दिति यावत्। अत्यंतान्योन्याभावीयघटत्वाद्यवच्छिन्नप्रतियोगितयोस्तु संयोगादितादात्म्यरूपा
वच्छेदकसंबंधभेदाद्भेदः। भेदप्रतियोगितायाः संबंधानवच्छिन्नत्वपक्षे तदवच्छिन्नत्वानवच्छिन्नत्वा
भ्यामेवेत्यन्यदेतत्। प्रकृते सादृश्यस्य पदार्थांतरत्वे प्रतियोगितायाः संबंधावच्छिन्नत्वमेव नास्ति

सती तद्भिन्नत्वे त्वादिरूपत्वेपि तादात्म्यावच्छिन्नत्वमनवच्छिन्नत्वमेव वा सर्वथापि अवच्छेदकसंबंधभे
दाभावाच्चंद्रत्वरूपावच्छेदकधर्मैक्याच्च न सादृश्याश्रयभेदाद्भेदः संभवतीति समुदायार्थः। नन्वेव
मिति। चंद्र इव चंद्र इत्यत्रोपमेयतावच्छेदकीभूतचंद्रत्वावच्छिन्नत्वाच्चंद्र इव मुखमित्यत्रापि प्रतियो गा

© Dharmartha Trust J&K. Digitized by eGangotri

गितायास्तदभावो न स्यादित्याह । अभेदेन प्रतियोगिताभेदाभावादित्यर्थः । तदुपमेति । नदीति पदविशे

॥१८॥ १ षणं तथाचैगवादिपदं तत्तद्व्यक्तित्वेन धर्मत्वाय त्वदोपस्थाप्यं सादृश्यं यत्प्रतियोगिकत्वेन गृह्य

माणं स एव विशेषणीभवति तद्वृत्तिधर्मोत्र उपमेयतावच्छेदकपदेन विवक्षित इति नासंभव इत्य

र्थः । उक्तस्थले त्विति । इवपदस्य क्वापि वृत्तावचमानाभावात्तेन च पदेनोपस्थाप्यं चंद्रप्रतियोगिकत्व २ व

न गृह्यमाणं सादृश्यं चंद्रे मुखे च विशेषणं । एवं च चंद्रनिष्ठायां प्रतियोगितायां मुखत्वावच्छिन्नत्वा

भावमादाय लक्षणानयने अंशांतरे एतद्दोषः चंद्रत्वावच्छिन्नत्वान्नहारणोत्वंशांतरे पि तदुर्लभमिति दू

...चंद्र इव मुखमित्यंशे लक्ष्यत्वान्नातिव्याप्तिरिति परिहरति । उच्यत इति । उक्तरीत्या अंशांतोपि

लक्षणाभावमाशंक्याह । अतिरिक्तेति । मुखनिष्ठोपमेयतानिरूपितत्वावशिष्टायां प्रतियोगितायां

मुखत्वावच्छिन्नत्वाभावसत्वादित्यर्थः । अनुपपत्त्यभावादिति । अंशांतोलक्षणागमनरूपाया अंशां

॥१८॥

१ तदयं पूर्वपक्षस्य फलितार्थः । उक्तस्थले अंशतः लुप्तालंकारद्वयाभ्युपगमो न युक्तः उपमेयोपमाया अनुप ३

३ मा प्रतीपाभ्यां गतार्थत्वापत्तेः । ना... © Dharmartha Trust J&K. Digitized by eGangotri ...न्न पारोतिव्याप्तेः ॥ ३

तदेपित्वस्यणगमनरूपायाश्च अनुपपत्तेरभावादित्यर्थः। तेन प्रतियोगित्वमतिरिक्तमिति पक्षेप्यवच्छे
कैय दकैर्यं तद्दैशिकानभ्युपगमादसंगतिरनाशंक्या। नन्वत एवेत्यादिकथनं प्रकृतानुपयुक्तं अप्रसंबद्धं चन्द्रस्य
द्विप्रतीयमानस्य चंद्रसादृश्यप्रतियोगितायाः ऐक्यात्तादृशबाधसत्त्वे मुखनिष्ठसादृश्यप्रतियोगित्वेन चं
द्रमवगाहमानं ज्ञानमपि न स्यादित्यर्थः। यथोक्तबाधबुद्धौ च तादृशप्रतियोगितायाश्च प्रभेदः तादृ
स्यैता शप्रतियोगिताभावो वा चंद्रे विशेषणं। चंद्र इव चंद्र इत्यत्र तु चंद्रः प्रतियोगितया सादृश्ये तत्त्वाश्रय
तया चंद्रे विशेषणं। चंद्रविशेष्यकप्रतियोगित्वाभावज्ञानं च सादृश्यविशेष्यकप्रतियोगित्वसंसर्गक
चंद्रप्रकारकज्ञाने न प्रतिबंधकं प्रतियोगित्वसंबंधावच्छिन्नप्रतियोगिताकचंद्राभावप्रकारकसादृश्य
विशेष्यकबोधस्यैव तथात्वात्। अतएवैकदेशसत्त्वे चंद्र इव चंद्र इत्येतद्वाक्यार्थबोधेपि बाधकाभावः।
स्तु तरां तु चंद्र इव मुखमित्यत्रेति चेत्सत्यां प्रकारांतरेणाव्याख्येयत्वात्। तथाहि। ननु शाब्दबोध्यत्वं तावत्

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतियोगितायां विशेषणत्वेऽन्तमेव। तत्र प्रकृते संसर्गतया शाब्दबोधविषयत्वरूपं प्रतियोगितायां वाच्यं·
तस्याश्च प्रतियोगितात्वेनैव संसर्गत्वं न तूक्तविशिष्टप्रतियोगितात्वेन मानाभावात्। तथा च यन्नि
ष्ठोपमेयत्वनिरूपितत्वविशिष्टायां यस्यां प्रतियोगितायामित्युक्तं। तादृशरूपेण तस्याः संसर्गतान यु
भ्युपगमेन तस्यां शाब्दबोध्यत्वानन्वयात्। एवं निरूपितत्वस्य शाब्दबोध्यत्वस्य च तस्यामेकत्र द्वय
मिति रीत्या लक्षणवाक्यार्थबोधे बाधकाभावात्। वह्निसंयोगत्वस्य संसर्गतानवच्छेदकत्वेऽपि पर्वतो
वह्निमानित्यादौ वह्निसंयोगः संयोगत्वेन संसर्ग इत्यादिव्यवहारात्। अतस्तत्र चन्द्र इव मुखमित्यंशे
लक्षणसंगतिर्नोन्यत्र। न हि तत्प्रतियोगितानिरूपकानुयोगितावच्छेदकमात्रमुपमेयतावच्छेदकप
देन विवक्षितं। तदुक्तरीत्या अंशतो लक्षणं नीयते येनान्वयांशेऽपि तत्स्यात् किंतु यन्निष्ठोपमेयतानिरू
पितत्वविशिष्टायां प्रतियोगितायां उपमेयतावच्छेदकावच्छिन्नत्वाभाव इति विवक्षितं। अस्ति चेदमुपमा

शेनत्वमन्वयांशेन हि तस्याश्चंद्रनिष्ठोपमेयतानिरूपितत्वविशिष्टप्रतियोगितात्वेन मुखनिष्ठोप
मेयतानिरूपकत्वं वि[illegible]नुप्रतियोगितात्वेनैव। तथा च यन्निष्ठोपमेयतानिरूपितत्वावच्छि
न्नोक्तप्रतियोगितानिष्ठनिरूपकताकानुयोगितावच्छेदकावच्छिन्नत्वाभाववल्लक्षणे निविष्टमिति भा
वः। न चोपमाप्रतीपसमूहालंबनरूपायाउपमेयोपमायाअसंग्राह्यत्वंउपमानन्वयसमूहालंबनरू
पस्योक्तस्य तु संग्राह्यत्वमित्यत्र किं मानमिति वाच्यं। तत्रालंकारांतरत्वे तांत्रिकेरुक्तेः। नत्वन्यस्यैवमा त्रे
नत्वात्। लक्ष्यालक्ष्यत्वव्यवस्थायां प्रामाणिकव्यवहारस्यैव मानत्वात् तदेतदाह। अत एवेति। उक्तरी
त्या चंद्र इव मुखमित्यंशे लक्ष्यत्वादेवेत्यर्थः। चंद्र इति। चंद्रप्रतियोगिकसादृश्याभाववान् चंद्र इति
बोधस्योपलक्षणं अपि शब्दो बाधकाभावसमुच्चयार्थः। तथा च चंद्रविशेष्यकचंद्रसादृश्यप्रकारक
ज्ञानकालीनस्तदभावकालीनो वा मुखं चंद्रसदृशमिति यत्र बाधस्तत्रोपमेव। उपमेयोपमायां तु मुख

© Dharmartha Trust J&K. Digitized by eGangotri

सादृश्यप्रकारकत्वाभाववद्यद्यस्ति चंद्रसादृश्यप्रकारकत्ववद्यदाज्ञानं तदा सैवालंकारः।अन्यतर
मात्रप्रकारकत्ववज्ज्ञानस्थले तु उपमाप्रतीपं वा यथायोगं भवति।तथा चोपमात्वप्रयोजकबोधस्य
उभयकालेऽज्ञानेऽपि सुस्थत्वात्तदंशे लक्षणागमनादिति हेतोर्नातिव्याप्तिरिति शेषः।अत एव चंद्र इ
व मुखं मुखमिव चंद्र इत्यत्रोभयांशज्ञानेनोपमाप्रतीपं वा।किं त्वेकांशमात्रज्ञाने इति पूर्वोक्तस्थ
लाद्वैषम्यमभिप्रेत्य तत्र व्यभिचारवारणोपायमाह।उपमानोपमेयत्वे चेति।त्वप्रत्ययार्थस्योभय
त्रान्वयः।द्वंद्वात्परं श्रूयमाणपदं प्रत्येकमभिसंबध्यत इति व्युत्पत्तेः पदशक्यस्यैव मात्रपरत्वा
त्।व्याप्तिविशिष्टपक्षधर्मतेत्यादौ तथा दर्शनात्।यद्वा मदुपत इत्यादौ द्वंद्वोत्तरकारकप्रत्ययार्थस्या
वारस्योभयान्वयीताया भाष्यादिसंमतत्वाच्च।तत्त्वेनेति।तन्निष्ठसादृश्यप्रतियोगित्वेन तत्प्रतियो
गिकसादृश्याश्रयत्वेन चेत्यर्थः।उपमेयोपमायामपि प्रत्येकांशस्य नोपमाप्रतीपलक्षणलक्ष्यत्व

© Dharmartha Trust J&K. Digitized by eGangotri

मितिपूर्वोक्तयुक्तिबलादाह। उपमेयोपमायामपीति। अथैवमिष्टेति। अप्रसिद्धे धर्मिण्युपमानत्वादि
प्रसिद्ध्यसंभवादर्थतो धर्मिणोपि लोकप्रसिद्धत्वपर्यवसानात्। नच चंद्रनप्रभवं वह्नेर्लोकसिद्धत्वमेवे
तिवाच्यं। अनलपदस्य तापपरत्वात्। तस्योभाभ्यामपी आदरणीयत्वात्। तेनेति। ज्ञानं नु पूर्वं च प्रमाणरू
पमुत्तरं च न तथात्वनियमइति विशेषः। उक्तकार्यत्वं च तद्रूपाणामेव प्रसिद्धं तदभावस्य प्रसिद्धविषया
वेवयाह्यइतिभावः। ननु संभावनविषयार्थकसंभावितपदेन नञ्समासे असंभावितपदस्याकारस्या
दुक्तजन्यत्वप्रकारकज्ञानविषयत्वाभावस्यसाधारणधर्मत्वंयुक्तं न तु उक्तजन्यत्वाभावप्रकारकज्ञान
विषयत्वस्य व्यभिचारेणतज्जन्यत्वाभावानाक्षेपकत्वात्। ज्ञानविषयत्वाभावस्य च तदाक्षेपकत्वात्।
तज्जन्यत्वेकस्य चित्ताहृशज्ञानावश्यकत्वात्। मैवं। च उक्तजन्यत्वाभावज्ञानस्यैव रसानुगुणत्वात्। ए
तेनेति। उपमानतावच्छेदकविशिष्टस्याप्रसिद्धत्वेनोपमेतिव्यवस्थापनेनेत्यर्थः। प्रसंगात्प्राचीनलक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

अ·को·टी·
॥१२॥

शोदीक्षितोक्तदोषान्निराकर्त्तुमाह। यद्यपीत्यादि। अतिशयोक्तेरेवेति। यद्यप्यर्थोक्तौ चकल्पनमित्येवं रू
पायाइत्यर्थः। प्रवाहयोरिति। यद्यप्येक एव तत्प्रवाहः प्रसिद्धस्तथाप्येकप्रवाहस्यस्यनेतरं प्रवाहांत
राभिप्रायेणेदं वस्तुगत्योक्तं। तद्विशेष्यत्वादिति। अंकस्य दोषविशेषत्वात्। किरणानां च गुण
विशेषत्वात्। विशेषे च सामान्यावच्छिन्नप्रतियोगिताकभेदाभावात्। घटः पृथिवीभिन्नइ प्रत्य
यादित्यर्थः। भेदस्यैवेति। दोषत्वावच्छिन्नप्रतियोगिताकभेदस्य अंके अभावेपि दोषत्वांकत्वयो
र्भेदसत्वात्। अन्यथा सामान्यविशेषभावानुपपत्तेरित्यर्थः। बाधान्नेति। तादृशदानप्रयुक्तो
त्कर्षवति तादृशदानकर्त्तर्यन्यसादृश्यसंभवात्तेनैकजातीयादृश्यस्यैवजननादिति सादृश्यवि
धानसंभवेन द्वितीयव्यवच्छेदे तात्पर्याभावात्। सादृश्यस्यवैयर्थ्यं एव तत्कल्पनादित्यर्थः। धर्मपद
स्येति। शाब्दाधिकादर्थाधिकमिति न्यायेनेत्यर्थः। ननु संमतपदेनैव तद्वारणमित्यत आह। संम

हो
त्य

© Dharmartha Trust J&K. Digitized by eGangotri

नेति। तुष्यत्विति। न्यायेनाप्याह। शब्देतरेति। पूर्वोक्त एवतात्पर्यं। अन्येनवर्ण्यस्येति। प्रतियोगित्वं
त्वतीयार्थः। अन्यप्रतियोगिकं वर्ण्यनिष्ठं साम्यमित्यर्थः। प्रतीपेव्यभिचारवारणा। प्रकारं दर्शयति।
तत्रेति। वर्ण्येनेति। गर्वमसंभाव्यमिमं लोचनयुगलेन किं वहसि भद्रे॥ संति सदृशानि दिशि दिशि
सरःसु ननु नीलनलिनानीत्यत्रउपमितिक्रियानिःपत्तिगर्भे। आकर्णयसरोजाक्षि वचनीयमिदं भु
वि॥ शशांकस्तव वक्त्रेणापामरै रूपमीयत इति तदनिःपत्तिगर्भे च प्रतीपे। वर्ण्यप्रतियोगिकसाम्य
स्यैवाप्रकृतेवर्णनादित्यर्थः। एवं चैत्प्रयोजनमनूद्य अन्यपदार्थविकल्पेन दूषयति। तत्र चेति। अन्यत्व
स्य प्रतियोगिसाकांक्ष त्वया वर्ण्यपदसमभिव्याहाराद्वर्ण्यप्रतियोगिकमेव तल्लभ्यते। वर्ण्यत्वं च प्रकृ
तत्वमिति। अन्यपदमप्रकृतार्थकमित्यत्र दूषणमाह। तदेतदन्यपीति। वर्ण्यत्वावच्छिन्नप्रतियोगि
ताकभेदवत्वं नार्थोऽपि तु वर्ण्यप्रतियोगिकभेदवत्वमेव। ततश्च राजसभां स्वतो वर्ण्यत्वेपि वर्ण्यैरसोभि

© Dharmartha Trust J&K. Digitized by eGangotri

न्नत्वमस्त्येवेतिनदोषइत्याशंकते। यदित्विति। एवमपितृतीयप्रतीपभेदेतिव्याप्तिरित्याह। त्वरेति। उ
पमानभावमिति। अन्यनिष्ठसादृश्यप्रतियोगित्वमित्यर्थः। सादृश्यप्रयोजकेति। तादृशस्वरमणीय
त्वादिति। तत्पदद्वयंसादृश्यपरं। तृतीयतत्पदंप्रतियोगित्वपरं। चंद्रइवमुखंरमणीयमित्यादौसदृश
चंद्रीयंमुखमितिबोधाभ्युपगमेप्रतियोगित्वसंबंधावच्छिन्नसादृश्यप्रकारकचंद्रविशेष्यकः। या
दृशरमणीयत्ववान्चंद्रस्तादृशरमणीयत्ववन्मुखमितिबोधेचसाधारणधर्मप्रकारकस्सरसि
जमिदमित्यादौचानुयोगित्वसंबंधावच्छिन्नसादृश्यप्रकारकस्तादृशोबोधःसुलभः। चंद्रत्वादिप्र
८ कारकस्तुस्फुटएवूपमांतरेतुसाधारणधर्मेनिष्ठविशेष्यत्वप्रकारत्वसंबंधेनसादृश्यनिष्ठविशेष्य
तानिरूपितप्रतियोगित्वावच्छिन्नप्रकारत्वसंबंधेनसादृश्यनिष्ठप्रकारतानिरूपितानुयोगित्वसंबं
धावच्छिन्नविशेष्यतासंबंधेनचबोधवत्वेनाविवक्षितत्वमित्यर्थः। वस्तुतस्तुतद्वत्वेनाविवक्षितत्व ॥१२॥

तानिरूपि३

© Dharmartha Trust J&K. Digitized by eGangotri

मात्रेता सर्वं। धीविषयत्वविवक्षायां प्रयोजनाभावात्। अत एव तदन्यधर्माभाववत्त्वमेवोच्यतामि
त्याशंक्याह। विवक्षितेति। तदन्यद्रव्यत्वादिधर्माणां तत्र सत्त्वादसंगतिरित्यर्थः। अनपायादिति। सा
दृश्यप्रतियोगितान्यधर्मवत्त्वेनाविवक्षितत्वस्य तत्र सत्त्वादित्यर्थः। यथा स्तु नैकदाशब्देनोपमेयो
पमायां व्यभिचाराभावारणात्तदभिप्रायमनुवदति। उपमेयत्वाभिमतेति। तत्र तु पूर्ववाक्ये उपमेयत्वा
भिमतं यन्मुखं तत्प्रतियोगिकसादृश्यवर्णनं मुखमिव चंद्र इति तत्समानकालीनमेव चंद्र इव मुखमि
ति साम्यमिति न व्यभिचारः। वर्णनमत्र समानाधिकरणं ग्राह्यं अन्यथा द्वाभ्यां [illegible]भ्यां यत्रोपमाप्रतीप   व
विवक्षया भागद्वयं उद्धारितं तेन तदुपमायामव्याप्तेः। न नु तथापि चंद्र इव मुखमित्येतद्वर्णनकाले मु
खमिव चंद्र इत्येतद्वर्णनाभावो वाभावादतिव्याप्तिरेवा न च तद्व्युत्क्रमेण तादृशवर्णनप्रागभावासमान
कालीनत्वं विवक्षितमिति वाच्यं तेनैव वक्त्रा प्रतीपाभिप्रायेण तदुत्तरं तादृशवाक्यप्रयोगे तदुप

© Dharmartha Trust J&K. Digitized by eGangotri

मायामव्याप्तेरितिचेत्‌। सत्यं। उपमेयत्वाभिमतप्रतियोगिकोपमानवृत्तिसादृश्यविषयकज्ञानवि
षयत्वेनतात्पर्यविषयत्वस्यविवक्षितत्वान्नकोपिदोषः। उपमेयोपमायांपरस्परप्रतियोगिक
सादृश्याश्रयत्वेनमुखचंद्रौप्रतीयेतामितिवक्तृतात्पर्यस्यसत्त्वान्नव्यभिचारः। चंद्रइवमुखमि
त्युपमाभिप्रायेणप्रयोगानंतरंप्रतीपाभिप्रायेणमुखमिवचंद्रइतिप्रयोगेतुउक्ततात्पर्याभावा
न्नोपमायामव्याप्तिः। परस्परप्रतियोगिकत्वाभावमात्रस्यसादृश्यविशेषणत्वेतुचंद्रइवमुख
मित्यादावसंभवएवस्यात्‌। तत्रापिवक्तृतोमुखप्रतियोगिकत्वस्यापिचंद्रवृत्तिसादृश्येसत्त्वात्‌।
अतएवपरस्परप्रतियोगिकत्वेनप्रतीयमानत्वाभावमात्रमपिनरमणीयं। मुखप्रतियोगिकत्वे
नाप्यर्थतस्तस्यप्रतीयमानत्वात्‌। तत्प्रतियोगिकसादृश्याश्रयस्यतद्वृत्तिसादृश्यप्रतियोगित्व
स्याप्यवगाहनात्‌। अतएवचंद्रइवमुखमित्येतद्वाक्यादेवार्थवशान्मुखप्रतियोगिकसादृश्या

© Dharmartha Trust J&K. Digitized by eGangotri

रपि चंद्रे प्रतीतत्वान्मुखमिव चंद्र इत्यंशे वैयर्थ्यपरिहाराय परस्परातिरिक्तसादृश्यव्यवच्छेदः फ
लतीति सकलालंकारिकसंप्रदायः। न च शाब्द एव तद्विषयत्वाभावो विवक्षितः। चंद्रप्रतियोगिक
मा। सादृश्याश्रयत्वेन मुखमवगाहमाने शाब्दबोधे वृत्ते मुखप्रतियोगिकसादृश्यप्रकारकचंद्रविशे
ष्यकबोधस्तु मानस एवेति सादृश्ये मुखप्रतियोगिकसादृश्यप्रकारकचंद्रविशेष्यकशाब्दवि
षयत्वाभावोऽस्त्येवेति वाच्यं। मानससादृश्यज्ञानस्याप्युपमात्वस्वीकारेण तादृशविशेषस्याऽ
किंचित्करत्वात्। अथ तस्या बिंबप्रतिबिंबभावाद्यनुपमात्वस्वीकारेऽपि उपमेयोपमायां व्यभिचार
वारणाय यथोक्तमात्रेणासंभवात्। उभयरूपपरस्परांशनिवेशोऽधिक एवेति विभाव्यते। एवमपि
मुखमिव चंद्र इति प्रतीत्यानंतरं चंद्र इव मुखमित्युक्ते तदुपमायामव्याप्तिः। न च योऽप[illegible]ताज्ञानादि
नानावम[illegible]यैतत्पूर्वशाब्दनिवृत्या न दोषः। तत्कालीनसमानाधिकरणशाब्दविषयत्वाभावस्य विव

© Dharmartha Trust J&K. Digitized by eGangotri

सितत्वादितिवाच्यं।प्रत्येकाभिप्रायेणैवंदुःखमसुखमित्येतद्योग्यताज्ञानादिकंजातंतदुत्तरक्षणेचेदं×
१यत्रवाक्यद्वयंप्रयुक्तंतत्रसमूहालंबनात्मकस्यानुबाधविषयत्वादव्याप्तेः।यत्रचप्रतीपवाक्या
र्थबोधोत्त्य त्तिक्षणे१४दुःखमसुखमित्येतद्वाक्यबोध्यायामुपमायामव्याप्तेश्च।यत्रवामुखमि
दंदुःखमित्येतद्वाक्यसामग्रीप्रत्यक्षात्मकंचेदंदुःखमसुखमित्येतद्योग्यताज्ञानसामग्रीचेदंप्रतियोगि
कसादृश्यप्रकारकमुखविशेष्यकप्रत्यक्षंजायतामितीछाचवृत्त्यातत्रप्रत्यक्षसामग्र्याबलव
त्वात्प्रत्यक्षात्मकंयोग्यताज्ञानेवृत्तेतदुत्तरक्षणेवाक्यार्थबोधोदय त्त्यातत्राप्यव्याप्तेश्च।अ
तोयथोक्तमेवरमणीयं।पर्यायप्रवृत्तायामिति।वाक्यभेदसहितायामित्यर्थः।तद्वत्युनेति।रघुवंशे
वैतालिकोक्तिः।युगपत्प्रवृत्तायामिति।वाक्यभेदरहितायामित्यर्थः।अनिरासादिति।तत्रवर्णानुक्र
मभेदाभावादित्यभिमानः।एकदेशस्ययथोक्तमर्थमभिसंधायतद्दूषणमपास्यति।तदप्यसदिति।

© Dharmartha Trust J&K. Digitized by eGangotri

सरसिजमिति। न च तत्रापि तेनोपमेयोपमैव स्वीकार्येति वाच्यं। सकलनिबंधविरोधात्। एवं तत्रो
पमालक्षणाव्याप्तेरीप्सितेरवोन्नत्वाच्च। ननु तथापि परस्परप्रतियोगिकत्वेनानयोः सादृश्यं
भासतामित्याकारकतात्पर्यविषयत्वस्य एकतरापरार्थतायास्त्वयोक्तत्वात् सरसिजमित्यादौ
तद्धृतौ गुणेत्यादौ च अव्याप्तिः। तत्र यथोक्ततात्पर्यविषयत्वात् इति चेत्सत्यं। तृतीयसदृशाव्य
वच्छेदफलकत्वाभावस्य विवक्षितत्वात्। उक्तस्थले च बीजाभावेन तृतीयसदृशाव्यवच्छेदप्रत्ययप्रति
रुद्धत्वात्। न चैवं भिन्नेत्यादि विशेषणवैयर्थ्यापत्तिः। व्यवच्छेदफलकत्वस्य प्रसिद्धावपि सदृशाव्यव
च्छेदफलकं सादृश्यवर्णनमुपमेयत्वलक्षणानन्वयव्याप्तेः। तच्च द्वितीयव्यवच्छेदस्यैव फलत्वात् तृ
तीयपरत्वमनन्वयव्यावृत्यर्थं विशेषणांतरदानस्य संदर्भविरुद्धत्वादिति वाच्यं। तस्य लक्षणांतरत्वे
पि सतिविरहात्। नन्वेवमेतन्निर्मुक्तस्य द्वितीयलक्षणस्योपमेयोपमायामतिव्याप्तिरेवेति वाच्यं॥

सदृश

© Dharmartha Trust J&K. Digitized by eGangotri

अन्येनवाच्यमित्यस्यान्ययोगमात्रप्रतियोगिकत्वेनवाच्यमित्यर्थकत्वात्।उपमेयोपमायांस्वस्वप्र
तियोगिकत्वेनापिवाच्यत्वादनतिव्याप्तेः।उपमायांतुस्वप्रतियोगिकत्वस्यार्थादवगाहनेपितस्यवाच्य
त्वविरहेणान्यमात्रप्रतियोगिकत्वेनवाच्यत्वसत्वात्।एवमन्यदप्यूह्यं।तद्वल्लुनेत्यस्यलक्ष्यत्वेभियु
क्तसंमतिमाह।अतएवेति।सत्कर्षेन्निति।वभाविति।भानरूपसामान्यधर्मस्यात्रविधेयत्वात्साम्यस्य
चसाधारणधर्मरूपत्वादित्यर्थः।सयथाविति।यथाविति।गमनस्येवविधेयत्वादिंद्रतुल्यइतिसाम्य
स्यानुवाद्यकोटिप्रविष्टत्वादित्यर्थः।अनुवादादिति।प्रतियोगिनंविनातन्निषेधस्याशक्यत्वात्।निषेधा
व प्रतियोगित्वेनेति।नसमस्तंचंद्रमाइत्यत्रतुसाम्यस्यनिषेध्यत्वेननिषेधप्रतियोगित्वमेवेतिनातिव्याप्तिः।
तथाचविधेयत्वमनुवाद्यत्वंवाकिमपिनविवक्षणीयंकिंतुनिषेध्यत्वमेव।तेननाव्याप्तिरतिव्याप्तिर्वेत्य
र्थः।व्यतिरेकइति।अन्यत्तुच्छजन्यवत्सगर्वोनास्तीत्यत्रसगर्वत्वस्यैवनिषेधप्रतियोगितयाहृत्यर्थे

© Dharmartha Trust J&K. Digitized by eGangotri

स्य

सादृश्यं निषेधप्रतियोगित्वाभावादतिव्याप्तिरित्यर्थः। निषेधप्रतियोगिकोटीति। उक्तस्थले च सादृश्य
स्य निषेधाभावेपि अन्यूनतुच्छजन प्रतियोगिकसादृश्याधिकरणसगर्वत्वनिषेधेन सादृश्यस्य निषेधप्र
तियोगिकोटावनुप्रवेशोस्त्येवेति नातिव्याप्तिरित्यर्थः। नसादृश्याभावेति। अलाभेपि वस्तुनः सत्त्वादित्य
र्थः। तुच्छसादृश्येति। धर्मनिषेधेन तत्प्रयुक्तसादृश्यनिषेधस्यार्थसिद्धत्वादित्यर्थः। गुणक्रियादीनामिति।
तेषां निरवयवत्वेन यवगोधूमादिवदवयवसाम्याभावादित्यर्थः। प्रसिद्धदृष्टेति। तथा च तत्र प्रसिद्धेरनु
रोधेनेत्यंशो नास्तीति भावः। सामान्यपरस्येति। अवयवसामान्यपरस्येत्यर्थः। धर्ममात्रेति। ततश्च तत्रा

तत्

पि संभवान्नाव्याप्तिः। यद्यपि गुणादीनां अन्यधर्मानाश्रयत्वाद्धर्मान्तरं तादृशं तत्र नास्त्येव तथापि तद्व्य
क्तिवैजात्यमादायैव तत्र साम्यनिर्वाह इति भावः। द्वितीयदोषमुद्धरति। प्रसिद्धेरिति। प्रतियोगित्वाद्यंश
एव प्रसिद्ध्यनुरोध इत्यस्य फलमप्याह। अतोनेति। धर्म्यंशप्रसिद्धिपरत्वे तु तत्रापि तत्सत्त्वाद्व्यभिचा

© Dharmartha Trust J&K. Digitized by eGangotri

रोद्दुर्वारः स्यात्। उपमानाख्य इत्यस्य व्याख्यानमाह। उपमितिक्रियेत्यादि। क्रियानिःपतीत्यत्र त्वं क्रिया
पदं व्याचष्टे। उपमीतीति। व्यभिचारवारणप्रकारमाह। व्यतिरेके त्विति। सा सादिति। मुखेन निःकलंके
नन समस्तवृत्तं द्रुमा इत्यत्र साम्यस्यैव निषेधात्। पारंपर्येति। नैवान्यतुच्छजनवत्सगर्वोयं महाधृति
रित्यत्र सगर्वत्वनिषेधेनार्थतः सादृश्याभावपर्यवसानात्। वस्तुत इति। स्वसादृश्येन तथानुत्कर्षात्।
अनुपमत्वतात्पर्यांशे प्राचीनसंमतिमाह। तदुक्तमिति। प्रतीपालंकारे द्वितीयभेदे क्वचित्सादृश्यनिःप
त्तिः क्वचिन्नेति वक्ष्यते। तत्रांत्ये लक्षणाभावादेवातिव्याप्तिपरिहारमाह। आकलय्येति। आद्ये लक्ष्य
त्वादेव नातिव्याप्तिरित्याह। यत्र त्विति। तथैवेति। नातिव्याप्तिरित्यर्थः। एवं तत्र मीमांसोक्तरीत्या लक्ष
णं सव्याख्यानमुपन्यस्य तत्र जयरामभट्टाचार्योक्तदोषमुपन्यस्यति। अत्र न्यायेति। स्वेतरसाधर्म्य
विरहस्य स्वसाधर्म्यस्य च युगपत्प्रतीतिसंभवेपि आद्यस्यैव चमत्कारजनकत्वादलंकारत्वं नान्त्यस्येत्य

© Dharmartha Trust J&K. Digitized by eGangotri

परितोषादाह। किंचेति। वैजात्यइति। भेदगर्भसादृश्यत्वानजन्यतावच्छेदकत्वेनतदभिमतइत्यर्थः। ननु
तत्तोरसवैजात्यस्योपमितिक्रियावैजात्यस्यवाकल्पनेविनिगमकाभावइत्यतआह। नहीति। तथा
चालंकारत्वानुपपादकक्रियावैजात्यकल्पनानुपयोगाद्रसवैजात्यकल्पनमेवार्हं। रसस्यसर्वप्रधा
नतयातदंगोपकारापेक्षयाप्रधानोपकारस्यैवोचितत्वादितिभावः। घटइवपटोद्रव्यमित्यादिवार

ग्रानेति

णाय। विलक्षणशब्देति। तादृशशब्दप्रयोगहेतुभूतेत्यर्थः। उभयत्रापिवैलक्षण्यंचमत्कारजनकता
वच्छेदकत्वेनानुभवसिद्धं। बाधइति। वर्णनस्यवदीक्षितोक्तरीत्याविशेष्यत्वात्तस्यचार्थालंकारत्वा
नुपपत्तेः शब्दव्यापारगम्यस्यैवार्थत्वादितिभावः। नचशब्दज्ञानयोरपितत्तसदृशवाच्यत्वमस्त्येवेति
वाच्यं। तदुपमाप्रतिपादकपदबोध्यत्वविरहात्। सर्वथैवेति। वाच्यायांव्यंग्यायांचोपमायामित्यर्थः।
अव्यंग्यत्वादिति। व्यर्थमितिवक्ष्यमाणहेतुत्वेनान्वयः। शब्दस्यवक्तृनिष्ठज्ञानस्यवातद्व्यंग्यत्वविर

© Dharmartha Trust J&K. Digitized by eGangotri

हात्। अदुष्टव्यंग्येति। न अर्थस्योभयत्रान्वयः। उक्तदीक्षितकारिकायामव्यंग्यत्वविशेषणाभावादाह।
फलितेति। कारिकाव्याख्याने दीक्षितैस्तथा फक्किकालिखनादित्यर्थः। व्यर्थमिति। वाच्योपमाव्यावृ
त्यर्थं ह्यव्यंग्येत्युक्तं। वर्ण्येनस्येवोपमात्वे तु तस्य सर्वदाप्यवाच्यत्वादतिप्रसक्तेरेवाभावात्तद्वारकमव्यं
ग्यत्वविशेषणं व्यर्थमित्यर्थः। विशेषणविशेष्यभावव्यत्यासेन लक्षणविवक्षायां दोषाभावमाशंक्या
आह। यद्वेति। ननु न इयमेवोपमितिक्रिया। निःपत्तिविशेषणं। यद्वा चमत्कारजनकवर्णनविषयी
भूतं सादृश्यमुपमितिक्रियानिःपत्तिमत्सादृश्यवर्णनं वा उपमेति लक्षणद्वये तात्पर्यमित्यस्वरसादा
ह। किंचेति। मुख्यवाक्यार्थेति। क्रियाया एव वाक्यार्थे मुख्यविशेष्यत्वात्। भानरूपसामान्यधर्मात्म
कक्रियाया एवात्रोपमात्वाद्वाक्यार्थे तस्याः प्राधान्यमित्यर्थः। अनलंकारेति। परोत्कर्षाधायकस्ये
वालंकारत्वादप्रधानस्य च तदभावादित्यर्थः। वैयर्थ्यादिति। व्यंग्योपमाया अलक्ष्यत्वे हि प्राधान्य

© Dharmartha Trust J&K. Digitized by eGangotri

मेवबीजंतस्यचवाक्यार्थभूतोपमायामपिसत्वेनवैषम्यस्यायुक्तत्वात्।पदार्थोत्कर्षकत्वेनैवालंकार
त्वमित्यत्रबीजमाह।तस्यविभावतयेति।रसोत्कर्षोह्यलंकारेणसाक्षान्नाधीयतेनवाद्वारांतरेण।किंतुर
सांगभूतोत्कर्षाधानद्वारेणैवतदंगभूताश्चविभावव्यभिचारिणएव।तत्समुत्कर्षालंबनत्वाद्रसस्यतदुत्कं
भरत्वेन।विभावानुभावव्यभिचारिसंयोगाद्रसनिःपत्तिरिति।ततश्चविभावादिभूतस्यांसेसुखादेरुपम
योत्कर्षजननेपरंपरयारसोत्कर्षः।अंगोत्कर्षेणप्रधानोत्कर्षस्ययुक्तत्वादुपकुर्वंतितंसंतंयेंगद्वारेण
जातुचित्।हारादिवदलंकारास्तेनुप्रासोपमादयइति।अर्थोपकारद्वारारसोपकारकत्वस्यैवार्थालं
कारलक्षणस्योक्तत्वादित्यर्थः।तत्रैवप्रामाणिकसंमतिमाह।अतएवेति।वाक्यार्थभूतोपमायाश्च
नलंकारत्वेग्रंथविरोधमाह।किंचैवमिति।काव्यप्रकाशोदाहरणविरोधमुक्त्वाकुवलयानंदोदाहरण
विरोधमप्याह।एवंहंसीवेतिग्रंथांतरविरोधमुक्त्वारसगंगाधरोक्ततदीयोदाहरणस्यैवविरोधमाह।किं

© Dharmartha Trust J&K. Digitized by eGangotri

बहुनेति। दीक्षितमतादेषां विशेषमाशंकते। अथ प्राचीनेति। स्पष्टमन्यत्। यदपि चित्रमीमांसायां प्र
तीपस्योपमालक्षणालक्ष्यत्वे प्राचीनसंमतिर्दर्शिता यत्काव्यप्रकाशे अनन्वयव्यावर्तनाय भेदरूप
मेव विशेषणं दत्तं न तु प्रतीपव्यावर्तकमपीति। तच्चिंत्यं। तद्व्यावृत्तेरप्यवश्यं तदभिमतत्वात्। अन्यथा
प्रतीपस्य पृथग्व्युत्पादनानुपपत्तेः। यत्तु तैरुक्तं उपमेयोपमादेरुपमांतर्गतत्वेपि व्यंग्यादिकृतवैचित्र्य
विशेषेण पृथग्ग्रहणं न विरुध्यते। परिणामस्य रूपकांतर्भावेपि तस्य पृथगुपादानवदिति। तदप्य
सत्। परिणामस्य पृथगुपादानस्य तावत्काव्यप्रकाशकारं प्रति दृष्टांतयितुमशक्यत्वात्। तेन परिणा
मस्यालंकारत्वानभ्युपगमात्। ननु परिणामस्यालंकारत्वानभ्युपगमादित्ययुक्तं पार्थक्यानंगीका
रेपि उपमाद्यंतर्भावेन तस्यालंकारत्वाभ्युपगमात्। सत्यं। अलंकारांतरत्वानभ्युपगमादित्यर्थे तात्पर्या
त्। एवं परिणामस्य पृथगुपादानं काव्यप्रकाशकृतो नास्तीति साध्यवैकल्यं दृष्टांतस्येति। किंच चित्र

© Dharmartha Trust J&K. Digitized by eGangotri

मीमांसोक्तलक्षणस्योपमेयोपमालंकारेपिलक्ष्यइतितावत्संगतमेव। तस्यतृतीयव्यवच्छेदएवता
त्पर्यमितितत्रैवव्यवस्थापितत्वात्। क्रियानिष्पत्तिपर्यंतंविवक्षितस्यसादृश्यस्यचतैउपमालक्षण
त्वांगीकारात्। कथंहिस्वातिरिक्तोपमानव्यवच्छेदफलकोनन्वयालंकारस्यकक्षाबहिर्भूतः। परस्परातिरि
क्तोपमानव्यवच्छेदफलकस्तुउपमेयोपमालंकारोलक्ष्यांतर्भूतइतिवैषम्यंस्यात्। आमुखेसादृश्यप्र
तीतेःपर्यंतेचअन्योपमानव्यवच्छेदप्रतीतेरुभयत्राप्यविशेषात्। व्यवच्छेद्यनिष्ठैक्यानैक्ययोश्चा
प्रयोजकत्वात्। यदपितत्राभिहितं। उपमानोपमेयत्वयोःपर्याययोरर्थयोर्द्वयोः॥ हृद्यंसाधर्म्यमुपमेत्यु
च्यतेकाव्यवेदिभिरितिप्राचीनलक्षणेद्वयोरित्यनेनानन्वयेव्यभिचारवारणेपिउपमानस्योपमेयत्व
कल्पनात्मकेप्रतीपेद्वयोःपर्यायेणोपमेयत्वकल्पनात्मिकायांउपमेयोपमायांचअव्याप्तिः। तयोःसादृ ति२
श्यवर्णनसत्वात्उपमानैत्वेनसंग्राह्यत्वेतथैवानन्वयोपिसंग्राह्यःस्यादितितस्यबहिष्करणमनर्हं

त्तितदप्यसत्। उपमानोपमेयत्वयोग्ययोरितिविशेषणस्य कंठाभरणीयत्वैलक्षणोक्तरीत्याप्रसिद्धा
नुरोधार्थकत्वात्। प्रतीपोपमेयोपमयोश्च प्रकृतप्रतियोगिकसादृश्यस्य अप्रकृतायत्वेनवर्णनाद
कदोषासंभवात्। एतेनकाव्यप्रकाशीयेसादृश्यधर्म्यमुपमाभेदेलक्षणेनन्वयवारकंभेदग्रहणं व्य
र्थं। प्रतीपादावतिव्याप्तेः। तस्यसंग्राह्यत्वेन न्वयस्यापितथात्वापत्तेरित्यपिपरास्तं। प्रकृतोत्कर्षप्र
योजकत्वस्यापि अलंकारसामान्यलक्षणगतस्यात्राप्यन्वयात्। प्रतीपेचोपमानतिरस्कारप्रयुक्त
एवोत्कर्षोमुखादेः। उपमेयोपमायामपिद्वौ उभयोः परस्परातिरिक्तोपमानव्यवच्छेदप्रयुक्तएवा
तिशयोनतुसादृश्यप्रयुक्तइतिदोषानवकाशात्। नन्वेवमनन्वयवारकंभेदपदमपिव्यर्थं। अनन्वये
स्वेतरोपमानव्यवच्छेदस्यैवचमत्कारप्रयोजकतयासादृश्यस्यतथात्वाभावादितिचेत्सत्यं। व्यभि
चारवारणमात्रेतात्पर्यात्। यद्वाभिद्यतेउत्कर्षवत्तयाबोध्यतइतिव्युत्पत्त्याप्रकृतस्यमुखादेरुपा

शानं तत्तस्य प्रकृतमात्रानुयोगिकत्वेन प्रतीयमानं साधर्म्यमुपमेत्यर्थः। प्रकृतोत्कर्षप्रयोजकत्वं च सा
मान्यत एव प्राप्तं। प्रतीपे च प्रकृतानुयोगिकत्वेन साम्यस्यानवभासात्। उपमेयोपमायां च तदन्यत्वं द्वा
द्यनुयोगिकत्वेनापि तस्य प्रत्ययात् प्रकृतमात्रानुयोगिकत्वेन भानमुभयत्रापि नास्तीति न व्यभिचा
रः। अनन्वये व्यभिचारवारणं तु साधर्म्यघटकभेदपदार्थे नैव बोध्यं। नन्वेवं भेदग्रहणमनन्वयव्याव
र्त्ते दायेति तद्ग्रन्थो न संगच्छत इति चेन्न। अनन्वयपदेन न विद्यते लक्षणस्यान्वयो यत्रेति व्युत्पत्त्या ल
क्ष्यतावच्छेदकावच्छिन्नत्वानभिमतेत्यर्थकतया प्रतिपादिपरत्वेन व्याख्यानात्। अथवास्तु यथोक्तमर्थ
थो यथाश्रुत एव। किंतु प्रकृतान्यानुयोगिकत्वेनाप्रतीयमानत्वं प्रतिपादिवारणाय पृथगेव विशे
षणं देयं इत्यादि सर्वमभिसंधायाह। इत्यादीति संक्षेपः। प्रथममिति। चतुष्टयघटितपूर्णोपमाव्युत्पा
दनेन तदन्यतमलोपिन्या लुप्ताया सुग्रहत्वात्। तथा च लुप्तोपमाप्रयोजकलोपप्रतियोगिघटितत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

नपूर्वतद्धुमारनेलाघवमित्यर्थः। उक्तवाँ इति। सेतुकाव्येसमुद्रवर्णनं। उत्खातद्रुममिवशैलंहिमह
तकमलाकरमिवलक्ष्मीविमुक्तं। पीतमदिरमिवचषकंबहुलप्रदोषमिवमुग्धचंद्रविरहितं। अथ
प्रसृतेरघुतनयरत्नादिस्कंधकस्थसमुद्रमितिपरेनेषांविशेषणानामभेदान्वयः। बहुलःकृष्णपक्षः।
तत्रापिरात्रोभागांतरावच्छेदेनचंद्रसत्वात्। प्रदोषेति। शुक्लपक्षेप्रदोषेऽवश्यंचंद्रसत्वात्बहुलेति।
पारिजातलक्ष्मीमदिराचंद्राणांसमुद्रान्मंथनेननिर्गमात्तदूत्येवंवर्णनं। अनुगामित्वनिर्वचना
यशंकामवतारयति। स्यादेतदिति। एकत्रोत्खातत्वंविजातीयसंभूयोगरहितत्वंसमुद्रपक्षेचाद्र
तत्वमितिविशेषात्। चित्रमीमांसोदाहरणमपिविचारयितुमुपन्यस्यति। एवंवागर्थाविति।
सेतुश्लोकेभिन्नधर्मेनिबंधनामात्रोपमाअत्रतुशुद्धोपमेतिभेदः। अनुगामित्वंतूभयत्रतुल्यंन
नुविकचैरित्यत्रमिथःसंयोगजनकक्रियाराहित्यस्योभयसाधारणत्वेपितस्यशाब्दबोधेप्रका

© Dharmartha Trust J&K. Digitized by eGangotri

रत्वाभावान्नदोषइत्याशंक्य तत्रापिदोषमभिधित्समानस्तंपक्षमवतारयितुंविकल्पमुखेनाह। किं
चेत्यादि। प्रकारांतराणामिति। उपचारबिंबप्रतिबिंबभावादीनां वक्ष्यमाणानामित्यर्थः। विलयेति।
पृथगपरिगणनानुपपत्तेरित्यर्थः। तद्दोषापन्नेति। वलनस्यैकपदजन्यबोधप्रकारत्वसत्वादित्यर्थः।
भिन्नवृत्तीति विशेषणात्तूक्तव्यभिचारवारणं दर्शयति। उक्तस्थलेत्विति। अभेदेनेति। वलितोद्धूतपद
भ्यां बिंबप्रतिबिंबभावापन्नकं धरावृत्तोभयविशेषणत्वेन एकस्यैवपदार्थस्योपस्थापनात्। अन्य
थात्त्ववस्तुप्रतिवस्तुभाव इतिदुर्लभं स्यादिति भावः। ननु वलनघटोभयभेदस्य वलनेपि सत्वाद्दोषता
दवस्थ्यमेवेत्यत आह। भिन्नत्वं चेति। स्वं धर्मतापर्याप्त्यधिकरणं। एवं सत्यव्याप्तिरित्याह। संयोगादे
रिति। वाच्यवाचकभावसंयोगयोर्द्वयोरपि संबंधत्वावच्छिन्नत्वात्सामान्यस्य स्वावच्छिन्नवृत्तिभेदप्र
तियोगितावच्छेदकत्वानुपपत्तेरित्यर्थः। प्रकारत्वाभावादिति। एतदनुपादाने तु बिंबप्रतिबिंबभावादा

त्व २

© Dharmartha Trust J&K. Digitized by eGangotri

वृत्त्यातिव्याप्ति[illegible]तादवस्थ्यादित्यर्थः। एवंशाब्दबोधप्रकारीभूतधर्मावच्छिन्नप्रतियोगिताकत्वंभेद
विशेषणमितिपक्षेऽयंदोषउक्तः। अधुनातरप्रकारीभूतेनापिपर्यवसिततद्वृत्तिनाधर्मेणावच्छिन्नप्र
तियोगिताकत्वमेवभेदविशेषणमित्युक्तदोषाभावमाशंकतेनचेति। संयोगत्वावच्छिन्नभेदस्यवाच्य
वाचकभावेतत्त्वावच्छिन्नभेदस्यचसंयोगेसत्त्वात्। शाब्दप्रकारीभूतसंबंधत्वावच्छिन्नत्वाच्चद्वयोर्दोषा
भावः। बिंबप्रतिबिंबभावारोपेतुविशेषणसत्वेपिशाब्दप्रकारधर्मावच्छिन्नत्वाभावादेवनातिव्याप्तिः। त
थापीति। चंद्रमुखवृत्तिरमणीयत्वयोरमणीयत्वत्वावच्छिन्नप्रतियोगिताकभेदविरहात्तत्रानुगामित्वं
नस्यादित्यर्थः। एकपदजन्यत्वस्येति। प्रतीतिजनकपदेएकत्वविशेषणस्यदेयत्वात्। तथाचसाधार
णधर्मवाचकैकपदजन्यबोधेस्यादितिपर्यवसितं। पदजन्यत्वस्यप्रतीतौप्रागेवोक्तत्वेनपुनस्तदुक्तौप्र
योजनाभावात्। भिन्नेति। स्वपनशायानोच्युतोविष्णुर्यत्र। स्वस्यपराद्धाज्यात्च्युतइतिभिन्नानुप्र

© Dharmartha Trust J&K. Digitized by eGangotri

वीकशब्दप्रतिसंधानजन्यत्वादित्यर्थः। तथाप्येवं ड्लेषस्थले व्यभिचारः स्यादित्याशंकते। न चेति।
एकस्यैव शब्दस्योभयार्थकत्वाभ्युपगमादित्यर्थः। अनंगीकुर्वतामिति। नवीनानामित्यर्थः। ननु चम
त्कारजनकस्यैवालंकारत्वात्तत्प्रयोजकधर्मस्यैव चात्र निरूपणीयत्वान्नायं दोष इत्यस्वरसादाह। व
स्तुप्रतिवस्तुभावेति। नन्वेकधर्मस्य निशाब्दप्रकारीभूतधर्मावच्छिन्नत्वमात्रं विवक्षितं। अस्ति च वाच्य
वाचकभावसत्तिताहृशशाब्दप्रकारीभूतसंबंधत्वावच्छिन्नत्वं संयोगस्यापीत्यत आह। किं चेति। न वा
च्यतावच्छेदकमिति। पुत्रत्वादिप्रकारेणैव बोधादुभयसाधारणैकसंतानत्वकल्पने प्रमाणाभावा
त्सैंधवादिपदवदिति भावः। सर्वनाम्नामिति। बुद्धिस्थत्वस्योपलक्षणीभूयशक्यतावच्छेदकानुगम

५८

मात्रपरतया तत्प्रकारको बोधो न भवति किंतु दारत्वादिप्रकारक एवेत्यर्थः। तत्रानुगामित्वाभावेपिप्र
वृत्तिरीत्यासक्तिविरहादाह। एवं चंद्र इवेति। काव्येष्वेतादृशाच्चमत्कारस्यानुभावकत्वमिह भयादेरनुगा

© Dharmartha Trust J&K. Digitized by eGangotri

मित्वाभावस्य दैर्घ्यापस्यापि परिहर्तुं शक्यत्वाच्चाह। किंचेति। धर्मेति। धर्मवृत्तित्वं सामान्यविशेषणं।
संएक्तावित्यादिसंग्रहार्थमाह। धर्मत्वं चेति। तद्धर्मतेति। धर्मतावच्छेदकतायाः पर्याप्तियत्र रमणीय
त्वत्वादौ तदधिकरणत्वमित्यर्थः। यथाश्रुतेऽवच्छेदकतायां रमणीयत्वत्वादिवृत्तितया रमणीयत्वादि
रूपधर्मत्वाभानुपपत्तेः। यद्वाभावार्थो न विवक्षितः। ततश्च धर्मतावच्छेदकस्य रमणीयत्वत्वादेर्याप
र्याप्तिस्तदाधारत्वमित्यर्थः। अथवा धर्मतारूपा च सावच्छेदकता चेति कर्मधारयः। तथा च धर्मता
पर्याप्त्यधिकरणत्वमिति फलितं। नाहरइति। धर्मस्यैकत्वे एकस्यैव धर्मतापर्याप्त्यधिकरणत्वाद
नेकत्वे द्वयोरेवेति भावः। नन्वेवं चंद्रइव संकोचितकमलं रमणीयं च मुखमित्यादौ मिश्रणस्थले रम
णीयत्वादेरनुगामित्वं न स्यात् तन्मात्रस्य धर्मतापर्याप्त्यनधिकरणत्वात्। संकोचितकमलत्वस्या
पि धर्मत्वादित्यतो व्याचष्टे। तत्सदेति। तथा च रमणीयपदनिर्वाह्यारमणीयत्वस्यैव धर्मतानतु संको

© Dharmartha Trust J&K. Digitized by eGangotri

चितकमलत्वादेरपीतिन दोषइत्यर्थः। देयमिति। ननुतत्रपदैक्यइत्यनेनैवव्यभिचारवारणात्सामान्ये
पैकविशेषणांव्यर्थमिति चेत्। न। हारवृत्तिहारत्वोपस्थापकहारपदस्य निर्झरवृत्तिनिर्झरत्वोपस्था
पकनिर्झरपदस्य चैकत्वसत्वेनव्यभिचारसंभवात्। एवंतु तत्रधर्मद्वयप्रत्येकसामान्योपस्थापकपदा
भावान्नदोषइत्यर्थः। श्लेषस्यापीति। तत्रोभयवृत्येकसामान्याभावादित्यर्थः। नन्वैक्यपदंव्यर्थं। बिंब
प्रतिबिंबभावेपूर्वोक्तरीत्यैवव्यभिचाराभावादित्यतआह। ऐक्येतीति। ननुतर्हिसामान्येएकत्वविशे
षणंव्यर्थं बिंबप्रतिबिंबभावेपदैक्याभावादेवव्यभिचारविरहात्। नचप्रत्येकमेकत्वमस्तीतिप्रागेवस
माहितमितिवाच्यं। प्रत्येकार्थस्यहारादेर्धर्मतापर्याप्त्यनधिकरणत्वात्। धर्मतापर्याप्त्यधिकरणवृत्ति
सामान्योपस्थापकपदैक्येनुगामित्वस्यप्रागेवाभिहितत्वादित्यतआह। अतश्चेति। ततश्च बिंबप्रति
बिंबभावेपदैक्योपादानादेवव्यभिचारविरहेपिसंतानेत्यादिश्लेषधर्मतापर्याप्त्यधिकरणपुत्रपारि

मित्य

© Dharmartha Trust J&K. Digitized by eGangotri

जातोभयवृत्तिपुत्रत्वपारिजातत्वोभयसामान्योपस्थापकसंतानपदैक्यसत्वेनतत्रव्यभिचारःस्याद
तःसामान्येप्येकेतिविशेषणं।ततश्चतस्यपुत्रत्वपारिजातत्वोभयसामान्योपस्थापकतयाधर्मता
पर्याप्त्यधिकरणत्वस्यैकसामान्योपस्थापकत्वंनास्तीतिपदैक्यसत्वेपिनव्यभिचारइतिभावः।पश्य
निश्चलनिस्पंदाबिसिनीपत्रेराजतेबलाका।निर्मलमरकतभाजनपरिनिष्ठिताशंखशुक्तिरिव॥नि
श्चलनिरुद्धमेतिनायकसंबुद्धिरितिकेचित्।चलनमवयवक्रियास्पंदस्त्ववयविक्रियेतिभेदः।अतो
निश्चलाचासौनिस्पंदाचेतिकर्मधारयइत्यन्ये।निश्चलःपर्वतस्तद्वन्निस्पंदेत्यपरे।शंखशुक्तिःशंख
निर्मितंशुक्त्याकारंपात्रंइतिकाव्यप्रदीपः।अत्रोपमेयवृत्तिधर्मस्यबिंबसंज्ञा।उपमानवृत्तेश्चप्रति
बिंबत्वालंकारिकसंप्रदायः।द्विरुपादानमिति।पदभेदस्तत्रपौनरुक्त्यपरिहारार्थः।यद्यपिउपमा
नोपमेयवृत्तिरेवसामान्यस्यधर्मइत्युच्यते।अयंचसामान्यधर्मवृत्तिरेवनतूपमानादिवृत्तिरपि।

स्थि

© Dharmartha Trust J&K. Digitized by eGangotri

तथापि संप्रदायानुरोधेन धर्मत्वं तदवच्छेदकसाधारणमेव ग्राह्यं। वस्तुतस्तु। बिंबप्रतिबिंबभावापन्नो
धर्मः क्वचिच्छुद्धः क्वचिच्चोभयसाधारणधर्मांतरविशिष्ट इति तस्यैव द्वैविध्यदर्शनेहास्यर्थे। संध्या
रागस्थगितो दृश्यते गगने प्रतिपच्चंद्रः। रक्तदुकूलांतरित इव नखनिघातो नववध्वाः॥ नखनिघा
तपदमर्द्धचंद्राख्यनखक्षतपरं॥ स्पष्टार्थमाह। यथा चेति। अञ्जनवर्त्यां देशी नवयुवतेर्नीलकंचुक पुन

२८ भरितोच्चकुचतो विभाति स्तनपट्टं जलभरितजलधरांतरोद्गतं चंद्रबिंबमिव। अत्र कंचुकजलधरयोर्बि
म्बप्रतिबिंबभावः। कंचुकांशे नीलत्वं शब्दोपात्तं। जलधरांशे तु जलभरितत्वगम्य इति बिंबप्र
तिबिंबभावविशेषणतया वस्तुप्रतिवस्तुभावः। तद्विशेष्यतया तु मूल एव व्याख्यात इत्युभयोरुक्त
त्रोदाहरणमेतदिति विशेषः। उपमानादिवृत्तित्वमपि वस्तुप्रतिवस्तुभावस्थले कुत्रचिदानयतां मत
माह। अन्ये त्विति। एवं च क्वचिद्धर्मवृत्तित्वमपि पूर्वोक्तस्थलेष्वेव। परं तु दीक्षितोक्तनियम एव निःप्रमा

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
॥२५॥
२५

णकइत्येषांविशेषः। [illegible] एवंचमुक्ताभिः सलिलरयास्तशुक्तिपेशीमुक्ताभिः स्तनरुचिसेकतंन
दीनां। स्त्रीलोकपरिकलयांचकारतुल्यंपलंकै विगलितहारचारुभिः स्वैरित्यादौमुक्तारुचिरत्वहा
रचारुत्वधर्मयोरपिभेदाभावात्सासादेवचस्तुप्रतिवस्तुभावोद्रष्टव्यः। रौकांडेति। मालविकाग्निमि र
त्रनाटकेमालविकामवेक्ष्याग्निमित्रस्योक्तिः। पांडुत्वंनायकविरहात्। परिमितेति। विरहदौर्बल्येनब
हूनामलंकाराणामग्रहणात्। माधवोवसंतः। परिणतेति। पांडुत्वासेपः। अर्थलभ्यमिति। नैतौभाव मा
न स्यसभायांप्रतीतौसभावत्वभावप्रतियोगित्वंनैतस्यतुल्यवित्तिवेद्यंपारिजातस्यभामांगणवृत्तित्व
प्रतीतौचमूर्तस्ययुगपदुभयदेशानवस्थानात्पारिजातस्यस्वर्गवृत्त्यभावप्रतियोगित्वमासेपल
भ्यमितिभावः। घनेति। अतिस्वच्छोअरुणोरक्तवर्णौचकरौहस्तौयस्याः पसेघनामेघाः तत्रप्रविशंत
आरुणाअरुणसंबंधिनः करः किरणायत्रपयोधरः स्तनोमेघश्च। पयोधरौस्त्रीस्तनाब्धितिशाश्वतः।

दा ॥२५॥

© Dharmartha Trust J&K. Digitized by eGangotri

आद्ये विशेषणे सभंगश्लेषो द्वितीये त्वभंग इति भेदः। उपचारेणेति। सत्वसौ दृश्यलसत्तोतिस्पष्टमेव। अस्तीणा। तावत्स्थगयिष्यामि द्वाभ्यामपि हस्ताभ्यां तस्मिन्दृष्टे। अंगं कदंबकुसुममिव कुमुलितं कथं नु छादयिष्यामि मानवत्याः सख्यीं प्रत्युक्तिः प्रियदर्शनजन्यविकासेन मानत्यागगोपनाय नेत्रच्छादनेपितद्दर्शनरोमांचवदंतुरितमंगं विलोक्यमानत्यागप्रतीतिमेविष्यत्येवेति भावः। उपचरितत्वमिति। तत्सदृशरोमांचवत्वेनेत्यर्थः। विकसिततमालनीलां पुनःपुनश्चलतरंगैः परिमृष्टां ॥ फुल्लैलावनसुरभिं उदधिगजेंद्रस्य दानलेखामिव स्थितां ॥ सेतुकाव्ये वेलावर्णने। तरंगाकारः कर। करः तरंग एव करइत्यत्रापि समासभेदो बोध्यः। तस्य साक्षाद्बलान्वितत्वेन तु द्वयमेव विशिष्योद्भावितं। अथ रोगमयित्वानिशामयं गंभीरत्वदृढस्थिते समुद्रे ॥ रोषो राघववदनं उत्पातस्थं द्रुमंडलमिव विलग्नः। सेतुबंधाय समुद्रप्रार्थनार्थं श्रीरामे स्थिते समुद्रे किमप्युत्कृतवति इत्युक्तिः। राघववदनेति। प्रकृतत्वेन रोषस्यैवोपमेयत्वा

कर

© Dharmartha Trust J&K. Digitized by eGangotri

तेनचोत्पातस्यैवोपमानत्वादितिभावः।संक्षोभितकमलसराः संध्यातपताम्रधातुकर्दमितमुखः।
स्थानभ्रष्ट इवगजोरात्रिंभ्रमित्वाप्रतिनिवृत्तोदिवसः।सेतुकाव्येप्रभातवर्णनं।संक्षोभितत्वंएवाव
स्थानैवेलक्षण्यंतच्चविकसितोन्मर्दितत्वाभ्यां।संध्यातपस्ताम्रधातुरिवेतिदिनपक्षे।संध्यातपवत्ता
म्रोधातुरक्तोगैरिकंसिंदूरंचेतिगजपक्षे॥इतिनियमितसुग्रीवोरमांतेनचलितामहतनयः।परि   तःपि
म्रष्टमेरुशिखरःसूर्याभिमुखइवप्रलयधूमोत्पीडः।पितामहतनयोजांबवान्।उत्पीडःसमूहः॥
न   जांबवद्धूमयोरूपमा।वंदेवमसीमलिनांगोराजनिविंध्योद्यवैर्धवले।क्षीरोदमंथनोच्छलितधौं
दुग्धसिक्तइवमधुमथनः।घनप्रसवेति।घनानांमेघानांप्रसवउत्पत्तिःपक्षेघनप्रसवोजलंवि
हितंनिषिद्धंगोचरीभवनंप्रत्यसोपहितत्वंयस्यास्ताहृशीपुंडरीकच्छटायस्येतिबहुव्रीहिग।र्भो
बहुव्रीहिः।अहृश्यपुंडरीकेत्यर्थः।खंडितोत्सितिनमृणालांहृष्ट्वाप्रियामिवशिथिलवलयांनलि

© Dharmartha Trust J&K. Digitized by eGangotri

ख

नीः। मधुकरी मधुरोल्लापं मधुमदताम्रं मुमिव गृह्णाति कमलं॥ सेतुकाव्ये शारदकालेनो। अत्रोत्तरार्द्ध
मेव प्रकृतोदाहरणं। पूर्वार्द्धे मरालवलययोर्बिंबप्रतिबिंबभावस्यापि सत्वात्। जीवयतीत्युपचा
र इति। आत्मविशेषगुणजनकमनःसंयोगरूपमुख्यजीवनस्य तत्राभावादित्यर्थः। मुखघनविप्र
कीर्णजलनिवहं भृतसकलनभोमहीविवरं॥ नदीमुखपर्यस्यमानमात्मनो विनिर्गतं यशइवपि
बत्तां। सेतुकाव्ये समुद्रवर्णनं। मुखरेतीति। मुखरैर्गर्जद्भिर्घनैर्मेघैर्हृष्टं। पक्षे मुखरैर्वैद्यादिभि
र्घनं बहु कृत्वा वर्णितं। विनिर्गतमिति। निष्क्रमणाख्यस्य बहिःसंयोगजनककर्मणो मूर्त्तमात्रध
र्मतया यशस्य संभवात्प्रकाशे लाक्षणिकत्वादित्यर्थः। उद्दामेति। दोहदवलात्पुष्पितां माधवी
रा लतां दृष्ट्वा रत्नावल्यां वत्सराजस्योक्तिः। उद्दामा उद्गताश्च कलिकाः कोरका यस्यां पक्षे उद्दामा
अतिशयवती उत्कलिका उत्कंठा यस्याः। कोपेति। देवीपरिगृहीतलतापेक्षया राजपरि गृ

© Dharmartha Trust J&K. Digitized by eGangotri

हीतायास्तस्याः प्रथममेव पुष्पितत्वात्। कंदोट्टं नीलोत्पले देशी। शारदि सरसि पथिकाज्जला
निनीलोत्पलसुरभिगंधानि। धवलानि श्वेतवर्णानि चतानि अच्छानि प्रसन्नानि चेति। धवलानिप
क्षे धवलाक्षाणि उज्ज्वलनेत्राणि सतृष्णाः पिबंति दयितानामिव मुखानि। मुखपक्ष इति। मुख्यपा
नस्य द्वयोर्द्वयोरेव संभवादित्यर्थः। भेदांतराणां वक्ष्यमाणानां मूलानुमतत्वदर्शनाय भरतवाक्यं
दर्शयति। उपमाया इत्यादि। उपमायाः श्रौतार्थत्वविभागस्य शाब्दबोधविशेषनिबंधनत्वात्प्रथ
मं बोधमेव विचारयितुमाह। चंद्र इवेति। यद्यपीत्यादि। बोधकत्वाभावादित्यंतात्रशंका। बोधक
त्वाविशेषादिति। सादृश्यप्रत्ययस्योभयत्रापि सत्वादित्यर्थः। वैषम्यं शंकते। न चेति। उभयत्रेति। उप
मानोपमेययोरित्यर्थः। वक्ष्यमाणरीत्या चंद्र इव मुखमित्यत्र उभयत्र तत्संबंधबोधोपपत्तेरित्यर्थः।
शक्त्येति। तादृशोभयान्वितसादृश्यबोधकत्वस्याभावेनेत्यर्थः। सर्वत्र धर्मपदमत्र सादृश्यपरं।

ध।

© Dharmartha Trust J&K. Digitized by eGangotri

धर्ममात्रमिति। प्रतियोगितयाउपमानेविशेषणत्वानापन्नमेवसादृश्यमित्यर्थः। तथाचवस्य
मारारीत्याचंद्र इवेत्यत्रसदृशाचंद्रीयंमुखमितिउभयत्रसादृश्यबोधः। चंद्रेणतुल्यमित्यत्रतुचंद्र
सादृश्यवन्मुखमितिसादृश्यस्योपमानेविशेषणत्वंकिंतुउपमेयएवेतिवैषम्यमित्यर्थः। नामा
र्थयोर्भेदान्वयानुपपत्त्यासादृश्यसंबंधेनचंद्रस्यमुखेन्वयोनुपपन्नः। अतःकथंसदृशंचैत्रीयंमुखमिति   २१
बोधस्यादित्यभिप्रायवान्परिहरति। इवादीनामिति। उपमानविशेषणत्वेति। उपमाननिष्ठविशेष्य
तानिरूपितविशेषणताशालित्वार्थकत्वेचेत्यर्थः। नत्विति। उक्तरीत्याइवार्थसादृश्यस्यचंद्रादावुप
मेउ   मानेन्वयोपगमेयेतदन्वयानुपपत्तेरेकत्रजनितान्वयबोधत्वेननिराकांक्षत्वात्। अतःसदृशाचंद्रसदृ
शंमुखमितिनशाब्दबोधसंभवः। तदेतदाह। अन्यविशेषणस्येति। नचइवार्थसादृश्यस्यचंद्रए
वान्वयः। तस्यचसादृश्यसंबंधेनमुखान्वयइतिसादृश्यंसंसर्गीभूयैवसादृश्यविशिष्टचंद्रप्रकार

© Dharmartha Trust J&K. Digitized by eGangotri

कमुख्यविशेष्यकबोधेभासतइतियावत्।भेदसंबंधेननामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नंप्रतिविशेष्य
तासंबंधेनविभक्तिजन्योपस्थितेःकारणत्वकल्पनात्।उपमेयस्यचनामार्थत्वेनविभक्तिजन्योपस्थिति
विशेष्यत्वविरहात्।अन्यथानीलोघटइत्यादौनीलघटयोरप्यभेदातिरिक्तसंबंधेनविशिष्टबुद्ध्या
पत्तेरितिशंकार्थः।समाधत्ते।तथापीति।कथमिति।नामार्थयोरभेदान्वयएवव्युत्पत्तेर्नीलोघटइत्यादौ
उक्तरीत्याकल्पनादित्यर्थः।प्रकारीभूतेति।नामार्थांतरवृत्तिनिष्ठविशेष्यतानिरूपितविशेषणताशालि
नामार्थनिष्ठविशेष्यतानिरूपितविशेषणताशालीत्यर्थः।चैत्रस्यधनमित्यत्रहिस्वामित्वंषष्ठ्यर्थःत
स्याश्रयतयाचैत्रान्वयः।चैत्रस्यचस्वामित्वसंबंधेनधनेन्वयः।तत्रधननिष्ठविशेष्यतानिरूपितविशे
षणताशालिचैत्ररूपनामार्थनिष्ठविशेष्यतानिरूपितविशेषणतास्वामित्वरूपविभक्त्यर्थस्यास्तीति
तेनसंबंधेनचैत्रस्यापिधनेन्वयः।एवंचंद्रइवमुखमित्यत्रसादृश्यंइवार्थः।तस्यप्रतियोगितासंबंधे

© Dharmartha Trust J&K. Digitized by eGangotri

नचंद्रेन्वयः। चंद्रस्य च सादृश्यसंबंधेन मुखे मुखत्वरूपनामार्थनिष्ठविशेष्यतानिरूपितविशेषणताशा
लिचंद्रत्वरूपनामार्थनिष्ठविशेष्यतानिरूपितविशेषणताशालित्वं इवरूपनिपातार्थसादृश्यस्या
स्तीति तेन संबंधेन चंद्रस्य मुखान्वय इति प्रघट्टकार्थः। ततश्च प्रकारीभूतविभक्त्यर्थनिपातार्थान्यतर
संबंधेन नामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रतिविशेष्यतासंबंधेन नामजन्योपस्थितेः कारणत्वं
कल्प्यते। न च निपातार्थस्यापि कार्यतावच्छेदककुक्षौ संबंधप्रवेशे गौरवमिति वाच्यं। प्रामाणिकस्य तस्या
दोषत्वात्। प्रकारीभूतविभक्त्यर्थस्य तथात्वे बीजभूतस्यानुभवस्य प्रकारीभूतनिपातार्थेप्यविशिष्टत्वा
त्। बोधनादिति। इवार्थसादृश्यस्य प्रतियोगिकत्वेन चंद्रान्वये सादृश्यप्रतियोगिचंद्रीयसादृश्यमिति
बोधोदयात् इत्यर्थः। तदेवं प्रतियोगित्वस्य संसर्गत्वेन बोधः सादृश्यस्य च चंद्राद्यावनन्वयः सादृश्यप्र
तियोगितायाः शब्दबोध्यत्वात्तश्रौतत्वं चंद्रेण तुल्यमित्यादौ तु सादृश्यप्रतियोगितायाश्चंद्रादावनव

© Dharmartha Trust J&K. Digitized by eGangotri

ॱगमादार्थत्वं।चंद्रप्रतियोगिकसादृश्यवन्मुखमित्येवं तत्र बोधात् तुल्यत्वस्य नामार्थतया तत्र प्रतियो
गित्वेन तस्य चंद्रान्वयानुपपत्तेः।अतस्तत्र सादृश्यप्रतियोगित्वाउपमानस्य न शाब्दबुद्धौ भासते किं
त्वर्थतस्तस्य हेतुत्तरमानस्य ज्ञान एवेति एतन्मतरहस्यं।।संप्रतिमतांतरमाह।अत्र केचिदिति।श्रुत
श्रोतार्थत्वविभागरूपे विषये केचिन्महेश्वरादय एवमन्यथा तद्विवेकमाहुरित्यर्थः।मीमांसके सं
ति।घटमानयेत्यादिपदानामितरपदार्थान्वितस्वार्थबोधकत्वमिति तत्सिद्धांतः अत्र तु निपातस्थ
लएवान्विताभिधानं न तु तुल्यादिपदेष्वित्यंशे तदनुसारः।तुल्यादिस्थले तदनभ्युपगमस्य वृद्ध्य
था मात्रत्वात्।अन्यथेवादिप्रयोगे श्रौती तुल्यादिप्रयोगे त्वार्थीति व्यवस्थानुपपत्तेः।चंद्रस्येवेति।सा
दृश्यपदजन्यसादृश्योपस्थितौ नामार्थस्योपमानस्य सादृश्यान्वयार्थं यथा प्रतियोगित्वार्थक
छप षष्ठ्यपेक्षा नामार्थयोः साक्षाद्भेदान्वयानुपपत्तेः।तथा त्विवार्थसादृश्येपि पौनामार्थत्वाविशेषा

© Dharmartha Trust J&K. Digitized by eGangotri

२४

दुपमानस्य प्रतियोगित्वसंबंधेनान्वयानर्हत्वाद्विभक्तिजन्यतदुपस्थितिरपेक्षितेति प्रतियोगित्वबोधा
र्थं षष्ठी स्यादेवेति भावः॥ ननु भेदसंसर्गकनामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिजन्योप
स्थितेरिव निपातजन्योपस्थितेरपि विशेष्यतासंबंधेन कारणत्वं कल्प्यते। एवं च चंद्रस्य सादृश्यमित्य
त्र सादृश्यस्य निपातजन्योपस्थित्यभावे न तत्र प्रतियोगित्वेन चंद्रस्यान्वयानर्हतया तत्र प्रतियोगित्वबो
धार्थं षष्ठ्यपेक्षा [struck out] चंद्र इवेत्यत्र तु सादृश्यस्य इ
वार्थतया निपातजन्योपस्थितिविशेष्यतासंबंधेन तत्रास्त्येवेति तत्र प्रतियोगित्वसंबंधेन चंद्रस्यान्व
योपपत्तेर्न षष्ठ्यपेक्षा॥ अतो व्यर्थं प्रतियोगित्वस्यापि इवार्थकल्पनं नैवमपि इवार्थसादृश्यस्याश्रय त्य
तया कथं मुखादावन्वयः॥ नामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति नामजन्योपस्थितेः कारणतायां का
र्यतावच्छेदकसंबंधतया तादात्म्यस्यैव निवेशात् भेदसंबंधेन नामार्थप्रकारकशाब्दबुद्धौ च विशेष्यत

© Dharmartha Trust J&K. Digitized by eGangotri

याप्रत्ययप्रसक्तेजन्योपस्थितेः कारणत्वकल्पनात्। मुखादेः प्रत्ययजन्योपस्थितिविरहात् निपातजन्यो
पस्थितेरपि तत्राभावेन चंद्रस्य प्रतियोगित्वेन सादृश्यान्वयवत्सादृश्यस्याश्रयत्वेन मुखादावन्वयानु
पपत्तेरिति वाच्यं। निपातातिरिक्तनामार्थप्रकारकशाब्दबुद्धावेव तथात्वात् इत्याशंकते। न चेति। तस्यै
वेति। निपातजन्योपस्थितिहेतुत्वकल्पनादिरूपस्येत्यर्थः। निपमेति। तथा च प्रतियोगिनिष्ठप्रकारतानि
रूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताऽभावविशेष्यकज्ञानत्वं नञ्पदशक्तिज्ञानस्य प्र
तियोगिनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठविशेष्यत्वाभिन्नप्रकारतानिरूपिताभावविशेष्यक
ज्ञानत्वं चाभावपदशक्तिज्ञानस्य कार्यतावच्छेदकं कल्प्यते। अत एव मिश्रैरप्युक्तं। स एवार्थोभावसदृ
शादिपदेनान्यथा बोध्यते क्वचित्संसर्गविधया क्वचित्प्रकारतया संबंधभानादतः पटो नेत्यादौ न षष्ठी
पटस्याभाव इत्यादौ षष्ठीति भावः। समभिव्याहारस्य तात्पर्यग्राहकत्वकल्पने गौरवविशेषाभावा

© Dharmartha Trust J&K. Digitized by eGangotri

द्वितिगमकाभावमाह। घटेति। उभयकार्यकारणभावकल्पनापेक्षयात्रापि गौरवाभावादाह। अन्विते
ति। तथा च प्रथमावृत्ती लाघवानुरोधेन अभावत्वप्रकारकबोधत्वस्यैव कार्यतावच्छेदकत्वे [illegible] त्ते
पश्चात्कारणताद्वयकल्पनेपि न दोषः। फलमुखगौरवस्यादूषकत्वाभावात्। अत एव न तत्पुरुषपूर्वपद
संबंधित्वस्य प्रसंगात्तदपेक्षया लघुभूतकर्मधारयमेवाश्रित्य पश्चादापद्यमानं निषादस्यापूर्व
विद्याकल्पनमप्यंगीकृतं निषादस्थपत्यधिकरण इति भावः। अन्यलभ्यत्वादिति। अन्यलभ्यः शब्दार्थ इति
न्यायेन संसर्गतयापि बोधसंभवेन तत्र शक्तेरकल्पनादित्यर्थः। समानेति। भिन्नार्थकविभक्त्यनवरुद्धेत्यर्थः।
तथा चाभेदसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्र
ति तन्नामोत्तरविभक्त्यर्थविरुद्धार्थकसुब्विभक्त्यसमभिव्याहृतपदजन्योपस्थितिः कारणं। नीलो घट
इत्यत्र द्वयोरेकविभक्तिकत्वात्। स्तोकं पचतीत्यादौ क्रियाविशेषणे च धातोस्तद्विरुद्धार्थकसुब्विभक्त्यसमभि

ह

नै ५

© Dharmartha Trust J&K. Digitized by eGangotri

व्याहृतत्वात्तुभयत्र नामार्थस्याभेदसंबंधेन प्रकारता। राज्ञः सुतस्य धनमित्यत्र समानविभक्तिकयोरपि रा
जसुतयोरभेदान्वयबोधविरहात् विरुद्धार्थकेति भिन्नार्थकपरं। तत्र चैकाजन्यजनकभावे षष्ठी परात्व
स्वस्वामिभावेत्यदोषः। पचतीत्यत्र धातोरपि आख्यातरूपक्रियाभिन्नार्थकविभक्तिसमभिव्याहारोस्ती
ति तत्र विशिष्टाभावसंपादनाय सुविति विभक्तिविशेषणं। एवं च ज्योतिष्टोमेन यजेतेत्यादावपि ज्योति
ष्टोमादेर्यागादावभेदान्वयः संगच्छते। नैयायिकाइति। तथा च उक्तहेतुहेतुमद्भावोक्त्यनंतरं नञ्वाद
शिरोमणिनाभिहितं। अत एव इवाद्यर्थान्वयबोधेन षष्ठ्याद्यपेक्षेति। संप्रति यत्र उपमाने उपमेये च
साधारणधर्मसंबंधः शाब्दबोध एवभासते तत्र श्रौत्यन्यत्रार्थीति चक्रवर्तिमतमाह। केचित्त्विति। त
थाबोधेति। उपमानप्रकारकोपमेयविशेष्यके त्यर्थः। ननु यथा चंद्र इत्यत्र प्रकारार्थकथाल्प्रत्ययव
शाद्यत्र लक्षणाभ्यां वाक्यभेदावगमाद्वोभयविशेष्यकबोधाभ्युपगमः। अत्र तु न तादृशप्रमाणमस्तिये

© Dharmartha Trust J&K. Digitized by eGangotri

नवाक्यार्थद्वयमंगीकुर्मइत्यतस्तदावश्यकत्वमाह। अतएवेति। अन्यथात्विहं सोमसदृशास्यं द्रोधवलइति
बोधेबाधकाभावाल्लिंगभेदस्यदोषत्वानुपपत्तिरित्यर्थः। प्रकृतमाह। अतएवेति। उभयविशेष्यकबो
धाभ्युपगमादेवेत्यर्थः। विभक्तिभेदादिति। नामार्थयोरभेदबोधेभिन्नविभक्त्यनवरुद्धत्वस्यतंत्रत्वादिति
भावः। पद्मंचेत्यनंतरंतुल्यमितिशेषः। तद्धिनिर्मुक्तस्ययथोक्तवाक्यस्यदीपकालंकारएवविश्रामात्। मु
खान्वितस्येति। समानलिंगत्वादित्यर्थः। अन्वयासंभवादिति। विशेष्यस्यचंद्रस्यपुलिंगत्वात्। अनियतलिं
गवचनकनामार्थप्रकारकतादात्म्यसंसर्गकशाब्दबोधेसमानलिंगवचनावरुद्धनामजन्योपस्थिते
र्हेतुत्वकल्पनादितिभावः। नियतलिंगवचनानांतद्व्देपिअभेदान्वयदर्शनात्। अनियतेति। अतएववेद
वृत्खंडेमणिकारेरुक्तं। भिन्नविभक्तिकयोरिवभिन्नलिंगयोरपिसामानाधिकरण्येनविशेषणविशेष्यभा
वाभावात्अजहल्लिंगेतुलिंगनियमानुशासनंतथेति। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि

© Dharmartha Trust J&K. Digitized by eGangotri

तिपाणिनीयसूत्रं। नपुंसकस्यानपुंसकेनसहद्वंद्वे नपुंसकमेवशिष्यतेइतरस्यतुलोपः। तस्यचविकल्पे
नैकवद्भावोभवतीतितस्यार्थः। तथाचरमणीयमित्यत्रोक्तरीत्याएकशेषेणपुल्लिंगरमणीयपर
स्यापिसंग्रहात्तस्यैवचंद्रेन्वयइतिनदोषइत्येषामाशयः। कुवलयमिवेति। पुल्लिंगोपमेयक्लीबो
पमानस्थलेसाधारणधर्मस्योपमेयसमानलिंगलिंगत्वनियमेनतत्राप्युक्तरीत्याएकशेषाश्रये

क्लि.रु.स्के.व५ पुस्त्वैकचिह्नकैतत्रापिनपुंसकस्यैवश्रवणापत्तेस्तत्रैकशेषस्यस्वीकर्तुमशक्यत्वादित्याशयः॥
एवंसर्वत्राप्यदुष्टत्वप्रसंगात्प्रायशस्त्विरोधाच्चदुष्टत्वेनाभियुक्तप्रसिद्धमेवस्थलमाह। प्राणाइवेति। इदं
वचनभेदस्योदाहरणं। विद्याधनमितितुलिंगभेदस्येतिद्रष्टव्यं। प्रकारांतरेणाश्रौतार्थत्वविभागंव्यवस्थाप
यिष्यन्प्रथमंनैयायिकाद्यभिमतसाहस्येविशिष्टशक्तिपक्षमाश्रित्यविचारयितुमुपन्यस्यति। अत्रेदमिति।
तद्भिन्नेति। भवतिचमुखंचंद्रभिन्नंचंद्रगताह्लादकत्वादिधर्मवच्चेतिभावः। वक्ष्यमाणयुक्तिबलादाह। तत्रेति।

© Dharmartha Trust J&K. Digitized by eGangotri

धर्म एवार्थो न तु तद्वत्त्वमपीत्यर्थः। यद्यपि च तद्वत्त्वमपि धर्म एव तथापि बोधे वैषम्यमस्त्येवेति भावः। नन्वेवं त
द्भिन्नत्वांशे धर्मे लोचसममन्वेति न तु प्रमेयेन। तथा च चंद्र इव चंद्र इत्यप्युपमा स्यात्। तत्रापि रमणीयत्वादि धर्म
स्योपमानभिन्नत्वादित्यत आह। तद्भिन्नवृत्तित्वेति। ततश्च धर्मे न तद्वृत्तित्वं विशेषणं किंतु तद्भिन्नवृत्तित्वमेवे
ति भावः। न चैवमपि तद्दोषतादवस्थ्यं तद्भिन्नमुखादिवृत्तित्वस्यापि धर्मे सत्त्वादिति वाच्यं। तद्भिन्नपदेन उपमा
नतावच्छेदकावच्छिन्नप्रतियोगिताकभेदवदुपमेयस्य विवक्षणात्। मुक्तत्वादिति। एक[illegible]त्राधेयत्वस्य पर
त्राधारत्वस्य च निवेशापेक्षया उभयत्राधेयत्वनिवेशस्यैवोचितत्वादित्यर्थः। यद्यप्याधारत्वाधेयत्वयोर्द्वयो
रपि समवेतत्वादिसखंडपदार्थत्वेऽतिरिक्तपदार्थत्वे वा शरीरसाम्यमेवेत्येकत्रवृत्तित्वस्यापरत्राधारत्वस्य च
निवेशे उभयत्राप्याधेयत्वस्यैव वा निवेशेन किंचिद्गौरवं लाघवं वाऽवतरति। तथाप्येकत्रवृत्तित्वविषयताक
त्वेन परत्रापि तत्कल्पनेन लाघवमित्याशयः। अत एवाधिकरणत्वांशस्याभिन्नेत्यत्र त्वयापि निवेशात्। तस्यापि

© Dharmartha Trust J&K. Digitized by eGangotri

विषयताकत्वमेवेत्याशंकते। नचेति। निवेशमात्रेण साम्यमाह। भेदनिरूपितेति। तदधिकरणत्वनिवेशसाम्येपित
द्वृत्तेरंद्वृत्तित्वनिवेशस्तत्राधिकद्वृतिशंकते। नचेति। प्रथमं भिन्नत्वस्योपमेयविशेषणत्वं उक्तं अधुना भेदस्यैव धर्मे
विशेषणत्वमुच्यतइत्यर्थः। तिविशेषः। सामानाधिकरण्यमिति। विशेषणताविशेषेणचंद्रभेदवत्तिमुखेसम
वायेनरूपविशेषात्मकरमणीयत्वादेः सत्वात्तदुभयघटितसामानाधिकरण्येनभेदस्यधर्मेप्रकारत्वं। सम
वायेतिप्रकृताभिप्रायेण। अन्यत्रयथासंभवं संबंधोग्राह्यः। उक्तसंबंधेति। विशेषणताविशेषेणचंद्रभेदव
तिमुखेसमवायेनरूपविशेषात्मकरमणीयत्वादेः सत्वात्तदुभयघटितसामानाधिकरण्येनभेदस्यधर्मेप्र
कारत्वं। समवायेतिप्रकृताभिप्रायेण। अन्यत्रयथासंभवं संबंधोग्राह्यः। उक्तसंबंधेति। विशेषणतोसमवा
योभयेत्यर्थः। प्रकारतयेति। तद्भिन्नवृत्तित्वस्यैववृत्तित्वेवैशिष्ट्याभ्युपगमात्तस्यचभेदसामानाधिकरण्यप
वपर्यवसानात्तस्यप्रकारत्वेनभानं। संसर्गतातुतत्रस्वरूपस्येतिस्वरूपनिवेशोऽधिकइतिभावः। सामाना

© Dharmartha Trust J&K. Digitized by eGangotri

धिकरण्यस्य संसर्गवैलक्षण्यं काव्यत्रैकां तद्धि विशिष्टत्वं नापेक्षेत। नहि संसर्गस्यापि संसर्गे विशिष्टबुद्धिरपगम्यते। दं

डी पुरुष इत्यादौ संसर्गीभूतसंयोगस्य समवायात्मकसंसर्गानुल्लेखाद् अन्यथानवस्थानादिति भावः। वृत्तित्व

निवेशमात्रस्य तथापि सत्वात्साम्यमिति समाधानाभासमाह। तथापीति। पक्षान्तरवादी गौरवस्वरूपमाह। भनच

महेति। मूलयुक्तिमाह। धर्मवत्वेति। त्वयापीति। इवार्थधर्मस्य समवायादिनाउपमेयान्वयस्य वाच्यत्वादित्यर्थः।

बोधस्वरूपकथनेन बोधविषयपदार्थस्वरूपं स्पष्टयितुमाह। किं चेति। प्रसिद्धोदाहरणमादाय बोधमाह। चंद्रे

ति। चंद्रभिन्नवृत्तित्वं चंद्राधिकरणावृत्तित्वं। आश्रयत्वस्योक्तप्रत्ययार्थत्वात्। तच्च चंद्रवृत्तित्वोपरि सामानाधि

करण्येन विशेषणं। अस्ति हि धर्मे चंद्रभिन्नवृत्तित्वं चंद्रवृत्तित्वं चेति स्वरूपसंबंधेन तयोः सामानाधिकरण्यं।

अतश्च सामानाधिकरण्यस्य स्वरूपघटिततया चंद्रभिन्नवृत्तित्वनिष्ठप्रकारतायां स्वरूपस्यैव संसर्गतयोल्लेखः।

एतादृशबोधस्यायमाकारो द्रष्टव्यः। तथाहि। तत्र चंद्रः प्रतियोगितासंबंधेन भेदे विशेषणं। भेदश्चाऽभावीयविशेष

भेदा०

© Dharmartha Trust J&K. Digitized by eGangotri

णविशेषसंबंधेनाधिकरणे। तच्चवृत्तित्वे इत्यादि। तत्रोत्तरत्र प्रकारतापदं उत्तरपदार्थनिष्ठविशेष्यतानिरूप
कत्वयोक्तं। एवंपदार्थनिष्ठप्रकारतावैलक्षण्यात्तस्याविषयतायाविशेष्यतात्वमपिबोध्यं। वृत्तित्वप्रकारतानिरू
पितेत्यस्यद्वितीयेवृत्तित्वनिष्ठप्रकारतेत्यत्रान्वयः। उक्तरीत्यातत्रस्वरूपंसंसर्गतयानिवेशितं। यद्यपि चंद्रवृ
त्तित्वमित्यत्राचंद्रनिष्ठप्रकारतानिरूपितायांवृत्तित्वनिष्ठविशेष्यतायांसमवायस्यनसंसर्गत्वंअपितुनिरू
पितत्वात्मकस्वरूपस्यैव। नहिआधेयत्वमपिसमवायेनवृत्तिमत्। अतश्चकथंतत्रसमवायस्यसंसर्गतया
निवेशः। तथापिप्रकृतेचंद्रवृत्तित्वरूपविशेषात्मकरमणीयत्वादिरूपधर्मनिष्ठंग्राह्यं। वृत्तित्वंचस्वरूपसंबं
धसंबंधविशेषात्मकमितिरमणीयत्वादिरूपमेवतस्यचचंद्रेसमवायएवेत्यभिप्रायेणसमवायस्यसंस
र्गताभिधानंनविरुद्धं। नन्वत्रचंद्रस्यवृत्तित्वसंबंधेनधर्मेन्वयइत्येवयुक्तं। चंद्ररमणीयत्वात्मकवृत्तित्वेतस्य
चरमणीयत्वेप्रकारतायांरमणीयत्ववद्रमणीयत्वबोधापत्तेः। रमणीयत्वेसमवायेनचंद्रस्यप्रकारतायां

© Dharmartha Trust J&K. Digitized by eGangotri

भासमानं यत्समवायरूपं वैशिष्ट्यं तत्प्रतियोगित्वानुयोगित्वाभ्यां रमणीयत्वस्य चंद्रप्रकारत्वे चंद्रस्य विशे
ष्यत्वे च स्यादिति चेन्नैवं। अखंडशक्तिपक्षे वृत्तित्वस्य पदार्थतया आवश्यकतया संसर्गतानुपपत्तेः। वृ
त्तित्वेनैव बोधाद्रमणीयत्वप्रकारकतद्विशेष्यकबोधस्याप्यनापत्तेः। अनुयोगित्वमुखेन समवायस्य संस
र्गतायां प्रदोषानवकाशाच्च। वस्तुतः स्वरूपस्यैवात्रापि संसर्गतावाच्या। अत एव चाधिकरणादिनिष्ठप्रकारता
निरूपितायां वृत्तित्वनिष्ठविशेष्यतायां स्वरूपमेव संसर्गत्वेन निवेशितं। द्वितीयपक्षीयं बोधमाह। चंद्रनिष्ठेति।
अत्र सामानाधिकरण्येन धर्मे भेदो विशेषणं। तच्च विशेषणता विशेषेणास्वाधिकरणसमवायेन वृत्तित्वे। त
तो भेदस्य धर्मोपरि प्रकारतायां विशेषणता विशेषाधिकरणसमवायवृत्तित्वानां चतुर्णां सांसर्गिकविष
यतात्वेनैव निवेशः। भेदनिष्ठप्रकारतानिरूपितेत्यस्य वृत्तित्वनिष्ठसांसर्गिकविषयतानिरूपितेत्यस्य च धर्म
निष्ठप्रकारतेत्यत्रान्वयः। अत्रापि चंद्रस्य वृत्तित्वोपरि प्रकारतायां समवायस्य संसर्गत्वे पूर्वोक्तरीतिरनुस

© Dharmartha Trust J&K. Digitized by eGangotri

त्यं।एवंधर्मनिष्ठप्रकारतायामपिअधिकरणनिष्ठविशेष्यतानिरूपितायांसमवायस्यचसंसर्गत्वेप्यवधे
यं।अधिकरणमिति।मतुबर्थोल्लेखः।त्वप्रत्यर्थमाशयापिगौरवाधिक्यमाह।धर्मवत्त्वमिति।धर्मवदितरावृ
त्तित्वेसतिधर्मवद्वृत्तित्वंधर्मवत्त्वत्वंइतिधर्मवत्पदार्थांतर्गततद्वृत्तित्वादीनामपितद्बोधविषयत्वंकल्प्यमि
तिगौरवमितिभावः।धर्मत्वस्येति।पदार्थांतरमित्यभिप्रायेणेदं।स्वरूपेणेति।निरवच्छिन्नस्यैवेत्यर्थः।धर्मत्वम
पितत्प्रतियोगिकसंयोगाश्रयत्वादिरूपमितिपक्षेत्वाह।किंचेति।वस्तुतस्तथापिधर्मवत्वापेक्षयात्रलाघवमेव
धर्मत्वस्यात्रापिप्रवेशान्मत्वर्थादेस्त्वधिकस्येतिभावः।वस्तुतस्तुधर्मशक्तिपक्षेचंद्रभिन्नवृत्तित्वंचंद्रवृत्ति
त्वेनविशेषणंनवाधर्मेकिंतुचंद्रभेदएवसामानाधिकरण्येनधर्मेविशेषणं।ततश्चचंद्रनिष्ठप्रकारतानिरूपि
तयथोक्तसामानाधिकरण्यनिष्ठसांसर्गिकविषयतानिरूपितधर्मनिष्ठविशेष्यताशालिज्ञानत्वमात्रंशब्द
परशक्तिज्ञानस्यकार्यतावच्छेदकं।धर्मवत्त्वशक्तिपक्षेतुयथोक्तधर्मनिष्ठविशेष्यताख्यप्रकारतानिरूपि

© Dharmartha Trust J&K. Digitized by eGangotri

ताधिकरणत्वनिष्ठविशेष्यताशालिज्ञानत्वं तथेति स्पष्टमेव गौरवं। उपसंहरति। तस्मादिति। सादृश्यं यद्य
पि तद्भिन्नत्वे सति तद्गतधर्मवत्त्वमेव। तथापि इवपदस्य धर्म एव शक्तिः कल्प्यते विवक्षितविवेकेन तथा पर्य
वसानादिति भावः। उभयत्रापि फलितार्थमाह। इदं चेति। नानार्थेति। चंद्रभिन्नत्वादिरूपेणैव शक्तिस्वीका
रात्। नन्वेवं गौरवमनंतशक्तिकल्पनादित्यत आह। अक्षादीति। प्रामाणिकत्वेन गौरवस्यापि सोढव्यत्वादिति
भावः। तथा वागर्थाविति। पर्यवसितबोधाभिप्रायेणेदं। संबंधपदात्संयोगादिरूपेण संयोगादेरनुपस्थित
त्वात्। त्वप्रत्ययेति। तेनैव घटत्वसामान्यत्वादिरूपार्थबोधनादित्यर्थः। नन्वेवं चंद्र इव चंद्र इत्यादावनन्वयालंका
रो न स्यात्। भेदस्य तत्राभानादित्यत आह। चंद्र इवेति। अथेति। चंद्रादिपदानां स्वार्थपरत्वे। शक्तित्रयकल्पने
नानंतशक्तिपरिहारस्यात्र पूर्वस्माद्विशेषः। अनन्वयालंकारव्याहृत्यर्थमाह। चंद्रत्वावच्छिन्नेति। इदं च चंद्र इव
मुखमित्यादावेव संभवति न तु चंद्र इव चंद्र इत्यादौ चंद्रत्वावच्छिन्नप्रतियोगिताकभेदस्य चंद्रे अभावादित्यर्थः।

© Dharmartha Trust J&K. Digitized by eGangotri

तस्य चेति। भेदस्येत्यर्थः। धर्मस्य रमणीयत्वादेः। समवायेति प्रकृताभिप्रायं। यद्यपि तद्गतधर्म एवात्र इवार्थ उ
क्तः तथापि वृत्तित्वं धर्मस्य पृथगेव तदर्थाविषयत्वबोधार्थं। अत एवाग्रे तथा च भिन्नवृत्तित्वे धर्मे च इवपदस्य शक्ति
रिति वक्ष्यति। वृत्तिधर्मे एकशक्तिस्वीकारेऽपि पदार्थैकदेशतया वृत्तौ चंद्रान्वयानां जस्यात्। चंद्रादेश्च चंद्रादिप
देनैव लाभेन चंद्रवृत्तिधर्मे शक्तिकल्पनानौचित्यादनंतशक्तिकल्पनापत्तेश्च। विशिष्टेति। एकविशेषणावि
शिष्टे विशेषणांतरवैशिष्ट्यमिति। दंडीत्यादि। दंडी चैत्रः कुंडलीति दंडविशिष्टचैत्रत्वं धर्मितावच्छेदकीकृत्य कुंडलवैशि
ष्ट्यबोधवत्। चंद्रभेदविशिष्टमुखत्वं धर्मितावच्छेदकीकृत्य तद्गतधर्मप्रकारक इत्यर्थः। एकत्रेति। चैत्रो दंडी कुंडली
लीति शुद्धचैत्रत्वं धर्मितावच्छेदकीकृत्य दंडकुंडलोभयप्रकारकबोधवत् शुद्धमुखत्वं धर्मितावच्छेदकीकृत्य चंद्रभे
दतद्गतधर्मोभयप्रकारक इत्यर्थः। मुखत्वस्योभयत्रापि धर्मितावच्छेदकतया विचारानंतर्गतत्वाच्चंद्रभेदस्यैव ध
र्मितावच्छेदकतां दर्शयति। चंद्रभेदमिति। यद्विशिष्टविशेषणांतरवैशिष्ट्यं भासते तस्यैव धर्मितावच्छेदकत्वादित्यर्थः।

© Dharmartha Trust J&K. Digitized by eGangotri

मुखत्वेति। मुखं चंद्रभिन्नमित्याकारस्येत्यर्थः। अवांतरेति। विशिष्टवैशिष्ट्यमिति विषयताशालिबोधे विशेष्यताव
च्छेदकप्रकारकनिर्णयस्य हेतुत्वात्। वह्निव्याप्यधूमवान्न वा पर्वत इति संशये वह्निव्याप्यधूमवान्पर्वतो घटत्वा
विति ज्ञानानुदयात्। चंद्रभिन्नं मुखं चंद्रगतधर्मवदिति बोधहेतुतया मुखं चंद्रभिन्नमिति निर्णयो विशेष्यतावच्छे
दकप्रकारकनिर्णयविधया पूर्वमपेक्षणीय इति भावः। तथा च महावाक्यार्थबोधात्पूर्वमवांतरवाक्यार्थज्ञा
नस्योक्तविधया तत्तोपि पूर्वं योग्यताज्ञानविधया शाब्दसमानाकारकस्य मुखं चंद्रभिन्नमित्यपि ज्ञानांतरस्या
वांतरवाक्यार्थज्ञानेविधयाऽपेक्षेति भावः। ननु तादृशबोधे तथाविधज्ञानहेतुतायाः क्लृप्तत्वात्तदपेक्षायां को
दोष इत्यत आह। तत्पदार्थमिति। भेदो धर्मश्चेद्द्वयमपीत्यर्थः। ततश्चेत्तत्पदार्थं भेदं धर्मितावच्छेदकीकृत्य मुख
पदार्थविशेष्यकधर्मरूपतत्पदार्थप्रकारको बोधो व्युत्पत्तिविरहान्न स्वीकर्तुं शक्यत इत्यर्थः। अत एव ग्रहं संमार्ष्टि
इत्यत्र एकत्वकर्मत्वयोर्विभक्त्या युगपदेव बोधान्नैकत्वविशिष्टग्रहोद्देशेन संमार्गविधिरिति मीमांसकाः। नन्वर

© Dharmartha Trust J&K. Digitized by eGangotri

र्थनमात्रमप्रयोजकमिति चेत् न। तत्पदार्थप्रकारकशा[illegible]ब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेन पदांतरजन्यो
पस्थितेर्हेतुत्वकल्पनात्। तत्र चैकस्य धर्मितावच्छेदकत्वादाख्याप्रकारताऽन्यस्य च विधेयत्वाख्येति वैषम्यानौचि
त्यात्। युगपदेव तदर्थद्वयोपस्थित्या वैषम्ये प्रमाणाभावात्। भेदप्रकारकबोधे मुख्यपदजन्योपस्थितेः पृथक्का
रणत्वं कल्पयित्वा धर्मप्रकारकबोधे भेदनिष्ठधर्मितावच्छेदकतानिरूपितमुख्यनिष्ठविशेष्यतासंबंधेन मुख्यपद
जन्योपस्थितेः कारणत्वकल्पने चातिगौरवात्। ननु चैत्रः पचतीत्यत्र एकत्वविशिष्टश्चैत्रः पाकानुकूलकृतिमा
नित्याख्यातार्थैकत्वधर्मितावच्छेदककृतरन्यचैत्रपदार्थविशेष्यकाख्यातार्थकृतिप्रकारकबोधः प्रसिद्ध एवेति·
न च तत्रैकत्वस्य प्रथमैकवचनार्थत्वान्नाख्यातार्थैकत्वं आख्यातार्थैकत्वस्य साधुत्वमात्रार्थत्वेनानन्वयात्।
चैत्रस्य समानाभिधानश्रुत्या स्वोत्तरवर्त्तिविभक्त्यर्थसंख्यावरुद्धत्वेनाख्यातार्थसंख्यायास्तदन्वयाभावादि
ति वाच्यं। नैयायिकैराख्यातार्थसंख्याया एव तत्रान्वयोपगमात्। यं यं भाव नानुधावति तं तं संख्यापीति तत्सि

© Dharmartha Trust J&K. Digitized by eGangotri

द्धांतात्। नचोक्तरीत्या सरसिद्धांतो निर्युक्तिक इति वाच्यं। प्रथमायाः प्रातिपदिकार्थमात्रे विधानेन तात्पर्यग्रा
हकतया एकत्वस्यापि तदर्थत्वाभावे सति विरहात्। तन्मतेपि सर्वत्राप्यध्याहारस्यावश्यकतया आख्यातार्थ
संख्याया एव तादृशस्थले सर्वत्रान्वयोपपत्तेः। प्रथमायास्तात्पर्यग्राहकस्य त्वत्कॢप्ततया संख्यांशेपि तत्कल्प
नेलाघवाच्च। अत एव शुद्धप्रातिपदिकार्थप्रतिपिपादयिषायां प्रथमेति महाभाष्यादिग्रंथानुकूल्यमिति चेत्।
सत्यं। एकशक्ततावच्छेदकावच्छिन्नवाचकताया विवक्षितत्वात्। तत्र ह्येकत्ववाचकतातिप एकवचनत्वावच्छिन्ना
घटमित्यादावप्येकत्वबोधात्। कृतिवाचकता त्वाख्यातत्वावच्छिन्ना। पचतइत्यादावपि कृतिबोधात्। प्रकृते त्वि
वपदत्वावच्छिन्ने वइवपदस्योभयवाचकतेति भेदात्। वस्तुतस्तु तत्राप्येकत्वस्य कृतिधर्मितावच्छेदकत्वे माना
भावः पाकानुकूलवर्त्तमानकृतिमानेकश्चैत्र इत्येव बोधसंभवात्। श्यामश्चैत्रः पचतीत्यत्र श्यामत्वं धर्मिताव
च्छेदकीकृत्य चैत्रपदार्थविशेष्यकाख्यातार्थकृतिप्रकारकबोधदर्शनात्। तत्पदार्थधर्मितावच्छेदकीकृत्येति।

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र श्यामत्वस्याख्यातार्थत्वाभावाददोषः। चैत्र एव पचतीत्यत्र चैत्रान्यः पाकानुकूलकृत्यभाववानित्येवकारा
र्थभेदं धर्मितावच्छेदकीकृत्य एवकारार्थाभावप्रकारकबोधो भवत्येवेत्यत उक्तं अन्यपदार्थविशेष्यकेति धर्मि
तावच्छेदकांतराक्लिष्टविशेष्यताकेत्यर्थः। तत्र चैत्रान्यत्वेनैव तस्य भानं न तु रूपांतरेण विशेष्येति भावः। एकपदा
र्थधर्मितावच्छेदककान्यपदार्थविशेष्यकबोधोपि श्याममश्वैत्रः पचतीत्यादावेव प्रसिद्ध इत्यत उक्तं तत्पदार्थप्र
कारकेति। यस्य पदस्यार्थो धर्मितावच्छेदकत्वेन भानस्तत्पदार्थेत्यर्थः। कृतिस्तु श्यामपदार्थ इति न दोष इति भावः।
संप्रति स्वोक्तविशिष्टशक्तिपक्षसमानाकारकबोधमंगीकृत्य स्वाभिमतं विशिष्टस्य वैशिष्ट्यमिति न्यायेन बो
धमाह। चंद्रभिन्नेति। रक्तदंडवान्पुरुष इत्यत्र रक्तत्वविशिष्टदंडस्य पुरुष एव चंद्रभिन्नवृत्तित्वविशिष्टचंद्रद्व
त्तिधर्मस्य मुखे वैशिष्ट्यं। एतादृशबोधे च विशेषणतावच्छेदकप्रकारकनिर्णयः कारणं रक्तो दंडो न वेति संश
यसत्वे रक्तदंडवानिति बोधानुदयात्। विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेनाप्याह। अथवेति प्र

© Dharmartha Trust J&K. Digitized by eGangotri

थारत्कइंदुवासुरुषपुरुषइतिज्ञानेपुरुषेदंडेदंडस्यदंडेचरकत्वस्यवैशिष्ट्यंभासतेतथामुखेचंद्रगतधर्मस्यधर्मे
चचंद्रभिन्नवृत्तित्वस्यवैशिष्ट्यंभासतइत्यर्थः।चंद्रभिन्नेमुखेचंद्रगतधर्मवदितिबोधेमुखंचंद्रगतधर्म
वदितिचंद्रभेदावच्छिन्नमुखनिष्ठवि॰॰इभिन्नमित्यादिज्ञानापेक्षाभिधानात्तत्पूर्वोक्तगौरवापत्त्यासमुखे
नदूषयितुमाह।तथाचेति।चंद्रइवेति।चंद्रभिन्नंमुखंचं॰॰॥शेष्यतांकिंचंद्रगतधर्मप्रकारकशाब्दबोधज
निकायाःसामग्र्याइत्यर्थः।मुखंचंद्रइवेति।मुखवृत्तिचंद्रसादृश्याभावविषयकचाक्षुषेत्यर्थः।समानवि
षयेप्रत्यक्षसामग्र्याएवबलवत्त्वान्मुखंचंद्रइवेतिचाक्षुषंप्रतीतानुशाब्दसामग्र्याःप्रतिबंधकत्वमित्थं
विनाअप्रसिद्धमितिचाक्षुषसामग्र्याअभावविषयकत्वमुक्तं।तथाचसादृश्यविषयकशाब्दसामग्र्याःसादृ
श्याभावरूपविषयकचाक्षुषंप्रतिप्रतिबंधकत्वंभिन्नविषयेप्रत्यक्षसामग्र्यापेक्षयाशाब्दसामग्र्याएवबल
वत्त्वस्वीकारादितिभावः।बाधाभावेति।अन्यथातदतिरिक्तमुखंचंद्रइत्येतादृशशाब्दसामग्रीसत्त्वेपिमुखंनचंद्र

© Dharmartha Trust J&K. Digitized by eGangotri

इवेतिचाक्षुषस्यैवोत्पत्त्यातादृशचाक्षुषेतादृशशाब्दसामग्र्यभावहेतुतायांव्यभिचारापत्तेः।ननुदोते
पिशाब्दबोधएवकुतोनभवतीत्याह।मुखत्वेति।मुखंचंद्रभेदाभाववदितिज्ञानस्यमुखंचंद्रभिन्नमित्याका
रकज्ञानप्रतिबंधकत्वात्तादृशज्ञानसत्त्वेमुखंचंद्रभिन्नमितिज्ञानानुदयात्।तद्व्यतिरेकेणचविशेष्य
तावच्छेदकप्रकारकज्ञानविरहेणचंद्रभिन्नंमुखंचंद्रगतधर्मवदितिशाब्दबोधासंभवात्।तथाचाहुः।
अवांतरवाक्यार्थायोग्यत्वनिर्णयदशायांमहावाक्यार्थज्ञानानुदयादितीतिअत्रमुखंचंद्रभेदाभाववदि
तिज्ञानंमुखत्वावच्छेदेनचंद्रभेदाभावप्रकारकमवसेयम्।अन्यथाविशेष्यतावच्छेदकसामानाधिकरण्ये
नबाधज्ञानस्यविशेष्यतावच्छेदकसामानाधिकरण्येनविशिष्टबुद्धिंप्रत्यविरोधितयामुखत्वसामाना
धिकरण्येनचंद्रभेदाभावग्रहेपिमुखत्वसामानाधिकरण्येनचंद्रभेदप्रकारकज्ञानसंभवात्।मुखत्वा
वच्छेदेनतदभावग्रहेतुमुखत्वसामानाधिकरण्येनापिनचंद्रभेदग्रहसंभवः।विशेष्यतावच्छेदकावच्छे

© Dharmartha Trust J&K. Digitized by eGangotri

देनतदभाववत्ताज्ञानस्यविशेष्यतावच्छेदकावच्छेदेनविशेष्यतावच्छेदकसामानाधिकरण्येनचतद्विशिष्ट
बुद्धौविरोधित्वात्।ननुतादृशबाधाभावोभवतापिनिवेश्यएवेतिसाम्यमेवेत्यतआह।मन्मतेत्विति।उ
क्तबोधस्येति।चंद्रभिन्नवृत्तित्वविशिष्टचंद्रगतधर्मवदित्याकारस्येत्यर्थः।निर्द्धर्मितेति।चंद्रभिन्नेत्यत्रहिचं
द्रभेदप्रकारकएवबोधोनतुमुखत्वादिकंधर्मितावच्छेदकीकृत्यवह्निव्याप्यवान्पर्वतइतिधूमवत्वाद्यनालिं
गितव्याप्तिप्रकारकज्ञानवदित्यर्थः।अनाक्रांततयेति।तद्धर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्धिप्रतित
द्धर्मावच्छिन्नविशेष्यताकतदभाववत्ताज्ञानस्यैवप्रतिबंधकत्वात्।मुखंचंद्रभेदाभाववदितिमुखत्वावच्छिन्न
विशेष्यताकचंद्रभेदप्रकारकज्ञानस्यकिंचिद्धर्मानवच्छिन्नविशेष्यताकचंद्रभेदप्रकारकज्ञानेप्रतिबंध
कत्वासंभवाद्विशेषणतावच्छेदकप्रकारकज्ञानसाम्राज्येनतादृशशाब्दबोधोत्पत्तौबाधकाभावात्।त्व
यात्वरीत्यामुखत्वावच्छिन्नविशेष्यताकचंद्रभेदप्रकारकज्ञानस्वीकारात्तन्मुखत्वावच्छिन्नविशेष्यताक

© Dharmartha Trust J&K. Digitized by eGangotri

चंद्रभेदाभावप्रकारकज्ञानसत्वेचतादृशज्ञानानुदयाद्विशेष्यतावच्छेदकज्ञानाभावेचतादृशविशिष्ट
बोधानुपपत्तेरवश्यंउक्तबाधाभावोनिवेश्यइत्याशयः।उभाभ्यामेवेति।मुखेचंद्रगतधर्मवैशिष्ट्य
स्योभयमतेपिग्राह्यत्वाभ्युपगमादित्यर्थः।लाघवसंभवादिति।सामग्र्यांबाधाभावनिवेशेइतरकार
णैःसहविशेष्यविशेषणभावेविनिगमनाविरहेणगौरवमित्यर्थः।प्रतीत्यापत्तेरिति।चैत्रोदंडीकुंडली
त्यादौदंडकुंडलयोर्द्वयोरपिविधेयत्वप्रतीतेः।विसंवादादिति।धर्मस्यैवविधेयत्वानुभवान्नतुभेदस्यापी
ति।अतएवेति।विशेष्येविशेषणमितिरीत्याबाधाभ्युपगमादेवेत्यर्थः।यतएवात्रचंद्रभेदांशेनिर्द्धर्मि
तावच्छेदकएवबोधः।अतएवमुखंचंद्रभिन्नंनवेतिमुखत्वावच्छिन्नविशेष्यताकसंशयोनन्निवर्त्तते।मु
खंचंद्रभिन्नमितिबाधाभ्युपगमेतुसोपिनिवर्त्ततेइत्यर्थः।तद्धतीति।भेदवतीत्यर्थः।एकस्याएवेति।शक्तिबा
हुल्यस्यैवगौरवावहत्वादित्यर्थः।विषयगौरवमुद्भावयति।नचेति।भेदइति।तथाचतत्पाभेदवतःशक्यत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

भेदस्यशाक्यतावच्छेदकताभेदत्वस्यचशाक्यतावच्छेदकताकल्प्याजात्यैतिरिक्तपदार्थनिष्ठावच्छेदकतायाः
किंचिद्धर्मावच्छिन्नत्वनियमादितिगौरवमितिभावः। तस्यापीति। भेदत्वस्याखंडोपाधित्वेप्रमाणाभावेनभेद
घटितसखंडोपाधिरेवभेदत्वमितितन्निवेशस्यतवापिसत्वादित्यर्थः। तस्मात्पूर्वमतेवृत्तित्वेशक्तिरत्रतु
भिन्नेधर्मेवृत्तित्वेचमतद्वयेपिशक्तिरितिध्येयं। अतएवपूर्वेवृत्तित्वंएयगेवार्थइत्यत्रोक्तग्रंथसंमतिरपिद
र्शितेति। भिन्नपदार्थेति। भेदवतःपदार्थत्वेभेदस्यतदेकदेशत्वात्। अन्यथाइवपदार्थत्वेनभिन्नपदार्थेत्यसंग
तंस्यात्। तथाचभिन्नरूपोयःपदार्थःइतिकर्मधारयः। नचपदार्थःपदार्थेनान्वेतिनतुपदार्थैकदेशेनेतिकथमेत

दितिवाच्यं। ससंबंधिकस्थलेचैत्रस्यमातेत्यादावेकदेशान्वयाभ्युपगमात्। अतस्ताद्दशस्थलेतत्पदार्थप्रका
रकशाब्दबुद्धौअवच्छेदकतासंबंधेनतत्पदजन्योपस्थितेर्हेतुत्वमभ्युपेयं। मदपेक्षयेति। चंद्रस्यभेदान्वयोवृत्ति
त्वान्वयश्चोभयत्रतुल्यः। भिन्नस्यवृत्तित्वेपुनरन्वयस्तत्तवाधिकइतिगौरवमितिभावः। भेदप्रतियोगीति। यद्य

घेतरपेक्षयाउपमानार्थकपदजन्योपस्थितित्वेन कारणत्वकल्पने गौरवमेवाभावस्तथाप्युपमानत्वस्य
सादृश्यप्रतियोगित्वरूपतया सादृश्यस्य तद्भिन्नत्वादिबहुधर्मघटिततया गौरवमेवेत्यवधेयं। यदि तु
चंद्रादिपदजन्योपस्थितित्वेनैव कारणता कल्प्यते तत्राह। उपमानानामिति। न चैवमदिति। तथा च वृत्ति
त्वनिष्ठेत्यादिहेतुहेतुमद्भावोऽसिद्ध एव। त्वयापि तु वृत्तित्वशक्तिस्तत्र भिन्नान्वयाय हेतुहेतुमद्भावस्य क
ल्प्यत्वात् इति गौरवमिति भावः। सांप्रदायिकेति। विशेषणतायाः स्वरूपसंबंधत्वे तिरिक्तत्वे वा गुरुत्वमेवेति
तत्र तत्र ग्रंथदर्शनात्। तथा चास्तु रूपीति न्यायेनानुमन्यमाने एव लाघवमित्यर्थः। इदं चाभ्युपेत्योक्तं। वस्तुत
स्तु एतत्पक्षे वृत्तित्वसंबंधमात्रेणाभिन्नस्य धर्मान्वयः तथा च सामानाधिकरण्यापेक्षया तस्य संसर्ग
त्वे स्पष्टमेव लाघवमिति नानुपपत्तिः। पुनरुक्तत्वे हि। चंद्रभिन्नाद्यैर्वृत्तित्वे धर्मस्यावगाह्यमाने मुखस्या
पि चंद्रभिन्नतया तद्वृत्तित्वस्याप्यवगाहनात्। सामानाधिकरण्येनेति। विशेषणतासंबंधेन चंद्रभेदा

© Dharmartha Trust J&K. Digitized by eGangotri

धिकरणतयातत्रापिधर्मस्यवृत्तित्वग्रहात्।सामानाधिकरण्यस्यउभयत्रापिसंसर्गत्वाविशेषादित्यर्थः।
धिकरणेसमवायादिनारमणीयत्वाद्वृत्तित्वेसंसर्गतयावगाह्यमानेमुखस्यापितद्मुखभेद
सांसर्गिकेति।यद्यपितत्रापिमुखेधर्मवैशिष्ट्यंविशिष्यनभासतइतिपौनरुक्त्यावकाशस्तथापितद्
ग्रुपस्येदमुक्तं।मुखविशेषणेति।अयमाशयः।पौनरुक्त्यंहिशाब्दसमानाकारकज्ञानेतत्पूर्वसत्त्येवभव
ति।अतएवशाब्दप्रमायांयथार्थयोग्यताज्ञानंहेतुरित्युपपत्तिवादस्तुमणिकारवाक्यव्याख्यानाव
सरे।बाधाभावस्ययोग्यतारूपतयावाक्यार्थज्ञानस्यवाक्यार्थजनकत्वापत्तिरित्युक्तापक्षधरमिश्रैरु
क्तं।अनुमानेसिद्धसाधनवत्शाब्देपुनरुक्तस्यदोषत्वादिति।शाब्दखंडेपिवैशिषिकानुमानप्रकरणे।क्व
चिद्योग्यतानिर्णयस्यापिशाब्दधीहेतुत्वमितिमूलमधिकृत्यतथासतिवाक्यार्थबोधसत्त्वात्कथंशाब्द
स्यतद्बोधकत्वमित्याशंक्यशाब्दंजायतामितीच्छामाश्रित्यशाब्दबुद्धिःसमर्थिता।अत्रचवंड्भिन्नवृत्ति

© Dharmartha Trust J&K. Digitized by eGangotri

त्वेबुद्धेपि मुख्यत्वं विशेष्यतावच्छेदकीकृत्य तादृशधर्मप्रकारकः शाब्दबोधो विवक्षितस्तस्मात्समानाकारक
बोधस्य पूर्वमसिद्धा न तथेति। अत एव विशकलितयोरेव पदार्थतत्संसर्गयोस्तात्पर्यग्रहः इति न तदर्थमनु
मानपूर्वं विशिष्टोपस्थितिरभ्युपेयेति वदद्भिः पक्षधरमिश्रैस्तात्पर्यविषयत्वस्य संसर्गविशेषणत्वे हेतुज्ञा
नदशायामेव वाक्यार्थबोधापत्त्या कथं शाब्दरूपानुमितिरिति दोषो निराकृतः। तात्पर्यज्ञानस्य शाब्दधी
हेतुतावादिभिरपि नैयायिकैस्तादृशरीतेरेवानुसृतत्वादिति दिक्। लाभेपीति। घटत्वस्य घटवृत्तित्वं विना
घटवृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वानुपपत्तेः। तद्वृत्तिधर्मस्य तद्वृत्तिभेदप्रतियोगितावच्छेद
कत्वनियमात्। घटावृत्तेः पटत्वस्यैव घटवृत्तिभेदः पटत्वावच्छिन्नप्रतियोगिताकभेदस्य घटे सत्त्वादिति भा
वः। अंगीकृत इति। रामकृष्णभट्टाचार्यादिभिरिति शेषः। एवं च यत्र वस्तुतः तद्वृत्तित्वं भासते तत्रापि शाब्दसमा
नाकारकबोधाभावान्न पौनरुक्त्यमिति स्थितिः। अत्र मुख्यवृत्तित्वं विनापि चंद्रभिन्नवृत्तित्वज्ञानपर्यवसानमि

© Dharmartha Trust J&K. Digitized by eGangotri

तिकुतस्तदाशयपौनरुक्त्यप्रसंगवारणोपीत्यभिप्रायवानाह। नहीति। तदन्येति। मुखान्येत्यर्थः। बाधादिति। स्ता

दृशारमणीयत्वादेर्घटादावभावादित्यर्थः। विलोपापत्तिरिति। तत्राप्युपमायाएवासंभवात्। तवापीति। धर्म

विशेष्यभेदान्वयवादिनइत्यर्थः। ननुचंद्रभेदस्यचंद्रान्वयानर्हत्वात्। चंद्रश्चंद्रभिन्नत्वेसतिचंद्रगतधर्मवा

निति बाधोमत्पक्षेतत्रनसंभवतीति कथंसाम्यमित्यत आह। उभयेति। घटचंद्रोभयभेदस्य व्यासज्यवृत्तिधर्मा

वच्छिन्नप्रतियोगिताकभेदस्येत्यर्थः। व्यासज्यवृत्तिधर्मेति। उभयत्वस्वरूपेत्यर्थः। आदिपदात्किंचिद्विशिष्ट

चंद्रत्वादिसंग्रहः। विशेषणादिति। उपमानान्वयाभ्युपगमात्। तथाचउपमानस्यचंद्रादिपदार्थस्यउपमान

तावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेनइवार्थभेदेऽन्वयस्वीकारात्। उभयत्वादेश्चोपमानतावृ

च्छेदकत्वविरहात्तदवच्छिन्नप्रतियोगिताकत्वेन विशिष्टस्यान्योन्याभावस्य चंद्रान्वयानर्हत्वान्नदोषइत्यर्थः।

विशेषणमिति। इवार्थभेदेउपमानस्यउपमानतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनैवान्वयोभवतीतिन

© Dharmartha Trust J&K. Digitized by eGangotri

वक्तुं शक्यमिति भावः। ननूपमानोपमेयतावच्छेदकयोरैक्ये उपमानस्वीक्रियत एवेत्याशंकते। नचात्रेति॥
उपमानोपमेययोरैक्येप्युपमास्वीकारे नन्वयोच्छेदापत्तेरित्यर्थः। प्रामाणिकैरिति। वाचस्पतिमिश्रादिभि
रित्यर्थः। दृष्टाधिकरणतादेरुपमानोपमेयभेदेपि कल्पितभेदमाश्रित्योपमेति भामत्यादावंगीकृतत्वा
त्। तच्चानन्वयप्रस्तावे दर्शयिष्यते। भिन्नत्वे सतीति। तत्रवृत्तित्वस्य धर्मस्य चेवपदार्थत्वात् उपमानता
वच्छेदकावच्छिन्नप्रतियोगिताकभेदवदुपमेयकत्वं विवक्षितमित्यपि प्रागुक्तं न विस्मर्तव्यं। यथोक्तबोधस्वी
कारेपि न तत्र क्षतिरित्यभ्युपगमवादेनाह। प्रत्युतेति। प्रकृते संगमयति। अत एवेति। यतश्चंद्रवृत्तित्वेन
धर्मस्योपमानवृत्तित्वं चंद्रभिन्नवृत्तित्वेन च मुखरूपोपमेयवृत्तित्वं बोध्यते इवपदेन अत इत्यर्थः। श्रौतीति·
श्रुत्याशावृक्षुश्लेषे शक्तेरिव उभयवृत्तित्वस्य धर्मे बोधादित्यर्थः। सामान्यत इति। चंद्रभिन्नत्वरूपेणेत्यर्थः। इ
वपदेनेति। रमणीयादिपदप्रयोगसत्त्वे रमणीयत्वादिरूपेणैव धर्मस्येवपदाद्बोध इत्युक्तत्वात् निरा

© Dharmartha Trust J&K. Digitized by eGangotri

कांक्षत्वादिति। रमणीयत्वात्वरूपेणावारद्वयमुपस्थितौ तयोः परस्परमन्वयानुपपत्तेः। एकरमणीयत्वान्वये
नैवनिराकांक्षतयाद्वितीयस्यतस्यमुखाद्यन्वयानुपपत्तेः। तत्रापिधर्मत्वेनैवोपस्थित्यभ्युपगमेतुभिन्नप्रका
रकोपस्थितिसत्वेरमणीयत्वादेरभेदेनधर्मान्वयसंभवात्तादृशरमणीयत्वाभिन्नधर्मवदितिधीसंभवात्।
एकमेवेति। एकस्यतात्पर्यग्राहकत्वोपगमात्। इवादेरेवरमणीयत्वत्वादिरूपेणधर्मोपस्थापकत्वोपगमा

तिभावः

दित्यर्थः। तदेतदनाकलय्यप्रत्यवतिष्ठते। तावतापीति। चंद्र इवमुखंरमणीयमित्यादौतदसंभवादित्यर्थः।
ननुतत्रापिधात्वर्थस्याङ्गारकत्वस्याश्रयतयामुखादावनन्वयः कुतोनस्यादतआह। धात्वर्थेति। तंडुलंप
चतीत्यादौविभक्त्यर्थकर्मत्वान्वयद्वारानामार्थस्यतंडुलस्यधात्वर्थपाकान्वयांगीकारात्तथासादित्युक्तं।
विभक्त्यर्थाविशेषणीभूयेत्यर्थः। स्तोकंपचतीत्यादौनामार्थस्यस्तोकस्यतादात्म्येनपाकान्वयदर्शनात्अभे
देनेत्युक्तं। अभेदातिरिक्तसंबंधेनेत्यर्थः। नसुप्यतइति। तत्रप्रत्ययस्यानर्थकत्वेनस्वापाभावस्यैवबोधात्।

© Dharmartha Trust J&K. Digitized by eGangotri

विशेषणत्वेनेति। वलवदनिष्टाऽननुबंधित्वाभाववत्कत्वं जभक्षणमिति बोधः स्यात्। अन्यथेति। निपाता
तिरिक्तनामार्थधात्वर्थयोरपि साक्षाद्भेदान्वयस्वीकारे इत्यर्थः। तुंडुल इति। न च तादृशार्थे प्रथमायाः अ
साधुत्वान्न दोष इति वाच्यं। असाधुत्वज्ञानाभावदशायां तदापत्तेः। कर्मत्वप्रकारकबोध एव तत्र द्विती
यायाः साधुत्वं। अतः कर्मत्वसंसर्गकबोधः स्यादेवेत्यन्ये। इवपदेन विशिष्य धर्मोपस्थापने रमणीया
दिपदानामेव तात्पर्यग्राहकत्वमिति पूर्वोक्ताभिप्रायं विशदयति। तादृशस्थल इति। इवार्थ एवेति। तथा
च धात्वर्थत्वविरहान्न तस्य नामार्थान्वयानुपपत्तिरित्यर्थः। न चात्र आश्रयत्वस्याख्यातार्थत्वात्तदन्वि
तस्याह्लादकत्वस्य मुखान्वयः संभवत्येवेति किमर्थं धातोस्तात्पर्यग्राहकत्वकल्पनमिति वाच्यं। एवम
पि चंद्रस्य वृत्तित्वसंबंधेन आह्लादकत्वान्वयानुपपत्तेः। चंद्रभिन्नवृत्तिचंद्रवृत्त्याह्लादकत्वाश्रयो मुखमि
ति बोधासिद्धेः। न च इवार्थवृत्तावेव चंद्रादेरन्वयः। तत्तच्चंद्रवृत्तीत्यस्य आह्लादकत्वान्वयः। निपातार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

र्थस्यधात्वर्थान्वयस्तुत्वत्तेरितिवाच्यं।नापिशाब्दबोधप्रतिकूलतयैवोपमादोषत्वमितिनियमोऽप्यस्ती
त्याह।हीनत्वादीति।क्वचित्सहृदयोद्वेगः।क्वचिन्नेत्यत्रकिंनियामकमतआह।सहृदयेत्यादि।नचतद्दिति·
तत्रतादृशलिंगवचनांतराभावेनान्यथानुपपत्त्याव्यधिकरणयोरपिलिंगवचनयोःप्रयोगेप्रयोक्तु
रशक्त्यनुन्नयात्दोषाभावादित्यर्थः।ननुकाव्यादर्शकारिकायांसहृदयोद्वेगाभावएवदोषत्वाभा
वबीजमुक्तंनतुत्वदुक्तोलिंगवचनांतराभावस्तत्कथंत्वयास्वोक्तार्थेतत्संमतिर्दर्शितेत्यतआह।एव
मेवेति।ततश्चबीजांतरस्यानुपपत्तेर्वृद्धसंमतत्वाच्चयथोक्तमेवतद्बीजमितिभावः।ननुप्राणशब्द
स्यैकवचनांतस्यापिसर्वसम्मतत्वात्।प्राणाइवप्रियायमेइत्यत्रत्वदुक्तोदूषकत्वाभावोवचनांतरा
भावमूलकान्यथानुपपत्तिरूपोनास्तीतिकथंकुलानुमतंत्वदुक्तव्याख्यानमित्यतआह।स्वशक्त्येति·
उभयत्रस्वपदंएकवचनादिपरं।नियतवचनत्वंचेत्यस्यचवचननिष्ठंनियतत्वंचेत्यर्थः।एकवचनादी

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·कौ·टी·
५४
५५

नामेकत्वद्वित्वबहुत्वानि शक्यार्थाः द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यादिवचनात्। तदभिधाने
अनियतं स्वयमेवांतत्कत्वं तदेव वक्ष्यति। प्राणाहाराइत्यादिबहुवचनस्य बहुत्वं शक्यार्थः। तद्धिनापि दा
राइत्यादावेकस्यामपि बहुवचनस्यैव विधानेन तत्रत्वत्यस्य बहुवचनस्य तदभिधानानियतत्वमि
त्यर्थः। नन्वभिधाने प्रतिपादनमात्रं ततश्च लक्षणादिना एकवचनादेरपि प्रतिपादकत्वात्। पदांतरो
ऽरस्याप्येकवचनादेरनियतत्वप्रसंग इत्यत आह। तत्त्वेनेति। नन्वेवमपि न निस्तारः। आत्याख्यायामेक
स्मिन्बहुवचनमन्यतरस्यामित्याद्यनुशासनसंमतत्तया बहुवचनस्यापि बहुत्वाभिधानानियतत्वा
त्। ततश्च सरांसीवामलं नभइत्यादिवचनभेदस्य दुष्टत्वाभिधानविरोधापत्तिरिति चेत्। मेवं। प्रकृति
विशेषपुरस्कारेण तदनुमतत्वस्य विवक्षितत्वात्। अस्ति च तथा प्राणादारादिशब्देषु पुंसि भूम्न्यसवः
प्राणा इत्याद्यनुशासनदर्शनात्। आत्याख्यायामिति तु सामान्यत एव तत्र थेति नानुपपत्तिः। एवं च यत्र

बहुत्वादि ५

© Dharmartha Trust J&K. Digitized by eGangotri

दस्यार्थैक्येपि बहुवचनांतत्वं विशिष्यानुशासनसम्मतं। तत्र वचनभेदेन दोष इत्यत्र तात्पर्यं न तु तत्समान
वचनांतशब्दांतरानुपपत्तिरपि। वक्तुरशक्तेस्तावतैवानुन्नयनात्। अन्यथा प्राणा इवेत्यादेरदोषत्वाभिधा
नानुपपत्तेरिति फलितार्थः। तुल्यादिपदप्रयोगे आर्थी कथमित्याशंक्याह। चंद्रेणेति। तुल्यपदस्यापि सादृ
श्यमात्रपरत्वे वकुतो न स्यादत आह। केवलेति। इवपदस्यापि केवलसादृश्यप्रयोगाभावादाह। सादृश्याभि
न्नमिति। निपातातिरिक्तनामार्थयोरभेदान्वयस्यैव व्युत्पन्नत्वादित्यर्थः। इवार्थसादृश्यस्य तु निपातात्ति
रिक्तनामार्थत्वाभावेन भेदान्वयसंभवान्न धर्मिपरत्वकल्पनमिति शेषः। तदेकदेशेति। तदर्थैकदेशस्य सा
दृश्यस्य सामानाधिकरण्यं स्वरूपमिति शेषः। यद्वा सादृश्यस्य तदर्थक तुलाशब्दस्येत्यर्थः। अन्यथा पद
बोध्यस्य सादृश्यस्य सामानाधिकरण्यमर्थ इत्यन्वयानुपपत्तेः। तुल्यशब्दस्तावत्। नौवयोधर्मविष
मूलसीतातुलाभ्यस्तार्थ तुल्यशावधानाम्य समसम्मितसंमितेषु इति सूत्रेण तुलया संमितमित्यर्थे यत्

© Dharmartha Trust J&K. Digitized by eGangotri

स्यपांतत्वेनस्युस्त्यादितः।ततेश्चेच्चयद्यपिसुप्तमात्रमितिसिद्धांतस्तथापिचंद्रभेदसामानाधिकरण्यंआ
श्रयच्चतुल्यपदार्थइत्यत्रैवतात्पर्यं।तुल्यार्थैरिति।तुलोपमाशब्दव्यतिरिक्ततुल्यार्थकपदयोगेउपमाना
र्थकपदस्तृतीयाविकल्पेनभवतीतिसूत्रार्थः।यद्यपितृतीयाविधानमात्रेणानुवृत्तित्वंतृतीयार्थइत्यत्रसूत्र
संमतिर्नायातितथापितत्रानुगतोविभक्त्यर्थोऽवश्यकल्प्यइत्यपेक्षावशेनानुवृत्तित्वमेवतृतीयार्थःकल्प्य
तइत्यभिप्रायः।इदमेवाह।इदंमेवेति।अतएवेति।इत्यादिस्थलेउपमानोत्तरविभक्तेःसाधुत्वमात्रार्थंतृती
यावश्यमाणत्वात्तत्रोपमेयभविभक्तिरेव।अत्रतुनियतार्थपरंपतयाउपमेयलिंगंतिरस्कृत्यैकैवतृती
याविभक्तिरित्यर्थः।आश्रयस्यापितुल्यपदार्थत्वकल्पनेप्रमाणमाह।अन्यथेति।आश्रयस्यतुल्यपदा
र्थत्वकल्पनंविनेत्यर्थः।नस्यादिति।आश्रयत्वसंबंधेनेतिशेषः।धर्ममुखयोर्नामार्थतयाआश्रयत्वादि
भेदसंबंधेनान्वयासंभवादितिभावः।आश्रयस्यापितदर्थत्वेतुअभेदसंबंधेनतस्यमुखान्वयेधर्मोऽश्रया

© Dharmartha Trust J&K. Digitized by eGangotri

भिन्नंमुखमितिवक्ष्यमाणबोधःसंभवतीत्यर्थः।नन्वेवमपिसामानाधिकरण्यस्यधर्मस्यचतुल्यरूपनामा
र्थत्वात्कथंतयोःपरस्परंभेदान्वयः।एवमाश्रयत्वस्यतुल्यपदार्थत्वेआश्रयत्वाभिन्नमित्येवबोधःस्यात्।
अथोभयत्रभावार्थस्याविवक्षितत्वात्समानाधिकरणंआश्रयश्चतदर्थःतेनआद्यस्यधर्मेद्वितीयस्य
चमुखेअभेदान्वयःअतएवधर्माश्रयाभिन्नंमुखमितिसमानंतरमेववक्ष्यतिइतिभवदाशयः।तथापिध
र्मस्यआश्रयेभेदान्वयानुपपत्तिरस्त्येव।नहिधर्मोभिन्नाश्रयेतिबोधइष्टइतिचेत्सत्यं।धर्माश्रयएवतुल्य
पदार्थइत्यत्रतात्पर्यात्।तत्रैकदेशेधर्मेसमानाधिकरणंतस्यअभेदान्वयः।चंद्रेणेत्यत्रचंद्रवृत्तित्वेतस्या
पिधर्मएवान्वयइतियथोक्तबोधोपपत्तिरित्यवधेयं।वृत्तित्वमपितुल्यपदार्थएवकल्प्यतांकुतस्तस्यतृ
तीयार्थत्वंवैषम्यस्यानर्हत्वादित्यतआह।अतएवेति।नामार्थयोरभेदान्वयापत्तेरेवेत्यर्थः।तथाचतत्रचं
द्रपदार्थस्यभेदान्वयोनस्यादिति।तस्यतृतीयार्थत्वकल्पनमितिप्रकृत्यर्थचंद्रस्यप्रत्ययार्थवृत्तित्वान्वयउप

© Dharmartha Trust J&K. Digitized by eGangotri

पन्न इत्यर्थः। वृत्तित्वस्य धर्मान्वयो न स्यादित्यर्थे भ्रमस्तु न कार्यः। वृत्तिमत एव तुल्यार्थत्वकल्पनया तादात्म्या
न्वयोपपत्तेः। अत एवाग्रे वृत्तित्वादीनां नामार्थत्वेन तत्र चंद्रादेर्भेदान्वयोनुपपत्त्येति स्वयमेव वक्ष्यति। इदमु
पलक्षणं। भेदसमानाधिकरणमात्रस्य तुल्यपदार्थत्वकल्पनेपि नामार्थस्य चंद्रस्य प्रतियोगितासंबंधेन
भेदान्वयो न स्यादिति चंद्रप्रतियोगिकत्वविशिष्टभेद एव तुल्यपदार्थ उक्त इत्यपि बोध्यं प्रकृतमाह। अत्रे
ति। धर्मोपस्थापकेति। तुल्यपदस्य चंद्रभेदसमानाधिकरणत्वमात्रबोधकतया उपमेयवृत्तित्वमात्रं ते
न धर्मस्य वोच्यते। उपमानवृत्तित्वं तु चंद्रेणेति पदेन। अत एव उपमानोपमेयोभयवृत्तित्वं धर्मवाचकतु
ल्यपदस्यार्थो न भवतीति इवपदादेर्वैषम्यमिति फलितार्थः। इवादाविति। तेषां सादृश्यार्थकतया ध
र्ममात्रपरत्वात्। तुल्यादाविति। तेषां सादृश्यवत्परतया विशेषणीभूतसादृश्यैकलक्षणांगीकारात्
तथा च बोधवैषम्यं श्रौतत्वार्थत्वयोर्न व्यवस्थापकं। तन्मतेपि वृत्तिभेदस्वीकारेपि उभयत्रापि बोधसा

© Dharmartha Trust J&K. Digitized by eGangotri

म्येन तद्व्यवस्थानुपपत्तेरिति भावः। तथापि त्वत्पक्षे किं विनिगमकमिति यत्त आह। प्रत्युतेति। सादृश्यं तावत्प्रति
योग्यनुयोग्युभयनिरूप्यमिति सर्वसंप्रतिपन्नं। तत्र च फलतो धर्मस्योभयनिष्ठत्वं भासते। तच्च यत्र धर्मवा
चकपदादेव निर्वहति मा श्रौती। यत्र तु पदद्वयेन सा आर्थी पदद्वयसमभिव्याहारगम्यत्वादित्येव विवेकः सा
धीयान्। अतएव व्रीहीनवहंतीत्यादौ द्वितीयया निरपेक्षयैव व्रीहीणां क्रियाजन्यफलशालित्वबोधनात्त
स्याः श्रुतित्वमिति मीमांसकसंप्रदायः। यदाहुः। अभिधातुं पदेन्यस्मिन् निरपेक्षो रवः श्रुतिरिति। न चात्रेव
शब्दस्य निरपेक्षत्वेन सादृश्यबोधकत्वमसिद्धं चंद्रादिपदसमभिव्याहारेणैव तद्बोधकत्वादिति वाच्यं। द्विती
यादेरपि क्रियायाः प्रकृतेश्च समभिव्याहारेणैव बोधकतया तस्या अपि श्रुतित्वविरहापत्तेः। पदांतरसमभि
व्याहारापेक्षणेपि विवक्षितार्थबोधसामर्थ्यं तत्र द्वितीयामात्रस्यास्तीति चेत्। तर्हीहापि चंद्रादिपदसापेक्ष
त्वेपि उभयवृत्तित्वबोध इवपदेन निर्वहति। तुल्यादिपदानां तु उभयवृत्तित्वबोधार्थे पदांतरापेक्षाप्यस्तीत्य

© Dharmartha Trust J&K. Digitized by eGangotri

धिकस्यापेक्षणीयत्वात्तद्वैषम्यमिति। आद्येऽस्त्वीति द्वितीये त्वार्थीति कुतोऽत्र प्रद्वेषः। न च चंद्रपदसापेक्षत्वं इवादे
तुल्यादौ च समानमेवेति वाच्यं। तथापि तत्र मुख्यार्थस्य वृत्तित्वस्याधिकस्यांशे लाभात्। चंद्रमिवेत्यादौ च विभक्तेः
साधुत्वमात्रार्थतया तदर्थाभावेन तदर्थस्यानपेक्षणीयत्वात्। न चस्यादयं यदि चंद्रभिन्नवृत्तित्वे सति चंद्र
वृत्तिधर्मः सादृश्यस्वरूपः स्यात्। तद्भिन्नत्वे सति तद्गतधर्मवत्त्वस्यैव तत्त्वरूपत्वादिति वाच्यं। तस्यापि फल
तो विवक्षितत्वे केनतद्भिन्नवृत्तितद्वृत्तिधर्म एव पर्यवसानस्य प्रागेव व्यवस्थापितत्वात्। अनेकवृत्तित्वं सा
दृश्यमिति मूलग्रंथव्याख्यानावसरे अनेकवृत्ति सामान्यमेव सादृश्यमिति लीलावत्युपाये वर्द्धमानोपाध्या
यैः कंठत एवाभिधानाच्च। अनेकवृत्तित्वं हि नैकजातीयानेकवृत्तित्वमात्रं किंतु भिन्नजातीयानेकवृत्तित्वं। तत्र
चंद्रादिभिन्नवृत्तित्वे सति चंद्रादिवृत्तित्वमेव पर्यवस्यति। अतः उक्तसादृश्यस्य इवादिपदैस्तुल्यादिपदापेक्ष
या अल्पपदसापेक्षत्वेन प्रतिपादनं तुल्यादिपदैस्तु इवादिपदापेक्षयाधिकपदसापेक्षत्वेनेति यथोक्तरीत्यैवश्रो

तत्वव्यवस्थापनं युक्तमिति तदेतत्सर्वं मनसि कृत्याह। भिन्नपदेति। औत्सर्गिकेति। विभक्त्यंतरकल्पने नियाम

काभावेन प्रधानभूतविशेष्यविभक्तेरेव तत्र प्रयोगात्। अत एव कष्टं करोति भीष्ममुदारं दर्शनीयमित्यादौ क

र्मत्वस्य कष्टपदोत्तरद्वितीययैव प्रत्यायनात्कष्टसामानाधिकरण्याद्भीष्मादिपदादपि द्वितीयेति अनभिहि

तसूत्रे महाभाष्ये स्पष्टमित्यर्थः। उक्ताभिप्रायमविद्वानाशंकते। न चेति। विभक्त्यंतरकल्पने विनिगमकाभावो हि त्व

याविशेष्यविभक्तिकत्वे मूलयुक्तः अस्ति च विनिगमकं। प्रथमत्यागे कारणाभावादिति। सर्वत्रापि प्रथमैवास्ती

ति भावः। तदपेक्षयापि विशेष्यविभक्तेरुपस्थितिनिबंधनान्नियामकात्प्राबल्यमित्यभिप्रायं प्रकटयति। विशेषणे

ति। मुख्यान्वयाभावादिति। साक्षादिति शेषः। न तथेति। न विशेष्यसमानविभक्तिकत्वमित्यर्थः। अन्यदेतदिति। विशे

षणस्य विशेष्यलिंगतायां विशेषणत्वमेव प्रयोजकं न तु साक्षाद्विशेषणत्वं गौरवादिति भावः। प्रामाणिकगौरवा

भिप्रायेणाशंकते। न चेति। नामार्थेति। उद्भूतादेस्तत्करणादिरूपनामार्थांतरविशेषणीभूतत्वान्न दोष इति भावः। न

अ॰कौ॰टी॰
५८
48

नु चंद्रमिवेत्यत्रापि इवादिरूपनामार्थांतरविशेषणीभूतत्वाच्चंद्रादेः साम्यमेवेत्याह। न चेति। निपातेति। तथा च निपा
तातिरिक्तनामार्थांतराविशेषे [illegible]
[illegible] णीभूतत्वं वाच्यं। ततश्च चंद्रादेर्नामार्थांतरविशेषणत्वाभावविरहेपि निपातातिरिक्तनामा
र्थांतराविशेषणत्वमस्त्येवेति भावः। चंद्रेणेति। तत्र चंद्रस्य निपातातिरिक्ततुल्यरूपनामार्थविशेष [illegible]
णत्वान्न तथेति भावः। यद्यप्येतादृशं नियामकं न प्रमाणसिद्धं तथापि वक्ष्यमाणप्रमाणानुरोधात् तत्कल्पनायाइ
दमुक्तं। ननु निपातातिरिक्तनामार्थांतराविशेषणीभूतविशेषणस्य विशेष्यविभक्तिकत्वकल्पनापेक्षया सामान्यादि
शेषणत्वस्य विशेष्यसमानविभक्तिकत्वकल्पने लाघवमिति चेत्सत्यं। अत एवापरितोषाद्भाष्यप्रयोगादिरू
पमेव प्रमाणं वक्ष्यतीत्यदोषः। शास्त्रीवश्यामेति। उपमानानि सामान्यवचनैरिति सूत्रे भाष्यकृतामयं प्रयोगः। त

प्रकृते२

थाचइवार्थे विशेषणतापन्ना या अपि शस्त्र्या नपुंसकत्वादर्शनात् तन्न क्लीवत्वमित्यर्थः। अवांतरसमाधिमुक्त्वा

© Dharmartha Trust J&K. Digitized by eGangotri

वास्तवसमाधिमाह। अनियतेति। नियतलिंगानां लिंगानपेक्षतया तन्मात्रापेक्षविशेष्यनिघ्नपरतायाएव वचनस्य
युक्तत्वात्। आकांक्षितविधानं न्याय्यमिति न्यायात्। अतएवादिपंचतीत्यादौ आदिशब्दस्य पुंस्त्वादिः पूर्वपौरस्त्यत्यादि
कोषे नियतपुल्लिंगतादर्शनात्। क्रियाविशेषणत्वेपि नपुंसकत्ववत्त्वमित्यभियुक्तानां सिद्धान्त इत्यर्थः। उपमानस्योपमेय
विभक्तिकत्वे पूर्वं प्रमाणानुपन्यासात्तिं हाव लौकिकन्यायेनाह। भाष्यादाविति। यद्यपि भाष्यकारादन्येषां कवीनां प्र
योगो न स्यात् तं त्र्येण प्रमाणं तत्र वार्त्तिककारयोश्चैतादृशप्रयोगाभावस्तथापि भाष्यप्रयोगस्य स्वातंत्र्येण प्रयो
गांतराणां च तात्पर्यग्राहकत्वेनोपयोगादादावुक्तं। यद्वा निरुक्तकारादिपरमादिपदं इति तत्त्वं। ननु शास्त्रीवश्यामे
त्युक्तो महाभाष्यप्रयोगेनोपमानस्योपमेयसमानविभक्तिकत्वे प्रमाणं भवितुमर्हतीति प्रसङ्गस्य साधारण्यात्। प्र
थमोपस्थितत्वेन प्रथमेति वादिनोपि तस्य विरोधात्तदभावात्। सत्यं। विभक्त्यंतरसंतानानां तदीयानां प्रयोगांतराणा
मेवात्र प्रमाणत्वेनाभिमतत्वात्। किंच उपमयादाचार इति सूत्रे अधिकरणाच्चेति वार्त्तिकमत्र प्रमाणं। तद्धि प्रासा

© Dharmartha Trust J&K. Digitized by eGangotri

अ.कौ.टी.
५१
51

दीयतेकुड्यामितिउपमेयेसप्तमीश्रवणादुपमानमपिसप्तम्यंतमितिक्रमेविवसाम्यामेतत्प्रयोगासंभवादारभ्यतइ
तिकैयटेनप्रतिपादितं।किंचतत्रतस्यैवेतिसूत्रमप्यत्रमानं।तच्छब्देनसप्तम्यंतेनउपमानपरामर्षादुपमेयेपितत्रस
प्तमीषष्ठीप्रयोगादित्यलंबहुना।अन्वयासंभवादिति।तुलापदवाच्यसदृशस्यनिपातातिरिक्तनामार्थत्वाद्भेदा
न्वयाभावादित्यर्थः।चशब्दबलेति।तथाचशब्दस्ययुगपदनेकार्थान्वयित्वरूपसमुच्चयार्थकतयातुल्यपदार्थधर्म
स्योभयत्रान्वयोनतुतुल्यपदमहिम्नेतिनश्रौतत्वापत्तिरित्यर्थः।स्वोक्तंश्रौतार्थत्वविभागमुपसंहरति।तस्मादिति।उप
मानादिति।प्रतियोगित्वानुयोगित्वेत्यर्थः।इवादाविति।चंद्रइवमुखमित्यादौचंद्रसादृश्यप्रतियोगित्वरूपोपमा
नत्वस्यमुखेचतदनुयोगित्वरूपोपमेयत्वस्यनियमतःप्रतीतेः।तथाचयच्छब्दबोध्यसादृश्यविशेषणत्वाप
न्नपदार्थस्ययत्रनियतउपमानत्वंतत्रश्रौतीत[illegible]दन्यत्रार्थीतिभावः।तुल्यार्थकवतिप्रत्ययप्रकृत्यर्थस्योपमा
नत्वप्रतीतिनियमात्तत्रापिउपमायाःश्रौतत्वापत्तिरितिएतन्मतेअपरितोषमुद्भावयन्तदपहायचित्रमीमां

© Dharmartha Trust J&K. Digitized by eGangotri

सामंतमाहुः। दीक्षितास्त्विति। सादृश्यमुख्येति। यद्यपि पदांतरसमभिव्याहारे इत्यादिपदानामपि सादृश्यमु
ख्यविशेष्यकज्ञानजनकत्वमसिद्धं। सादृश्यस्य तत्राश्रयत्वसंबंधेन मुखादिविशेषणतापन्नत्वेन मुख्यविशे
ष्यत्वाभावात्। तथापि येषां सादृश्यमात्रे शक्तिस्तत्रश्रौती। येषां तु तद्वतीति तत्रार्थीति भावः। वस्य मारणयुक्त्याव
तिप्रत्ययस्यापि सादृश्यमात्रशक्ततया सादृश्यमुख्यविशेष्यकज्ञानजनकत्वमस्तीति तत्रापि श्रौतत्वं स्यात्।
एवं वतिप्रत्ययेनापि सादृश्यमनुयोगित्वेनैव बोध्यते न तु सदृशाभेदेनेति श्रौतत्वं स्यादिति। एकेनैवापरितोषे
णादीक्षितपरस्यान्यपरस्य चोपादानं। अनुयोगित्वेति। चंद्रइवेत्यादौ चंद्रप्रतियोगिकसादृश्याश्रय इति बो
धात्। सदृशाभेदेति। चंद्रतुल्यमित्यादौ चंद्रसादृश्यवदभिन्नमिति बोधोदयात्। तथा चैकत्र सादृश्यं विधेयं
परत्र तु सदृशाभेद इति विधेयभेदादेव वैषम्यं इत्येषामाशयः। प्राप्ताप्राप्तेति। न हि यावद्वाक्यार्थे भासते तावत्से
वतात्पर्यं वाक्यभेदादिप्रसंगात्। अपि त्वप्राप्तएव। तदेव च विधेयं। तदाहुः। यत्परः शब्दः स शब्दार्थ इति। अत

© Dharmartha Trust J&K. Digitized by eGangotri

अ.कौ.टी.
५.
50

एवं दध्ना जुहोतीत्यादौ दधिविशिष्टहोमादेः प्रतीतावपि धात्वर्थस्याग्निहोत्रं जुहोतीत्यादिनैव प्राप्तत्वात् दध्या
दिरूपं द्रव्यमेव विधेयं तत्र पर्यवस्यतीति गुणविधित्वव्यवहारो मीमांसकानां। एवमत्रापि सादृश्याभिन्न इति
प्रतीतावपि धर्म्यंशे न तात्पर्यं किंतु सादृश्यमात्र इति नैवमिवादितुल्यादीनां वैषम्यमिति भावः। उपपन्नत्वेने
ति। प्रकृत्यर्थस्य प्रत्ययार्थे भेदान्वयव्युत्पत्तेः। ननु लक्षणापेक्षया वृत्तित्वस्य वतिप्रत्ययार्थत्वकल्पनमेव युक्तं।
न चात्राश्रौतत्वापत्तिरेव बाधिका प्रकारं[illegible]तरेणाश्रौतत्वादिव्यवस्थाया एवं तावता कर्तुमुचितत्वात्। स्वक
ल्पितप्रयोजनानुरोधमात्रेण नहाश्रयणस्याक्षयकत्वादित्यत आह। उक्तरीत्येति। संमतत्वादिति।
यद्यपि वतिप्रत्ययविधायकशास्त्रस्य प्रकृतेस्तद्वृत्तित्वे लक्षणेत्यत्र नाहत्य संमतिरायाति तथापि तुल्यार्थ
स्य वृत्तित्वातिरिक्तस्यैव प्रागेव व्यवस्थापितत्वात्। तदर्थस्यैव ततो लाभेन वृत्तित्वस्यैतदर्थत्वकल्पनायां स्व
त्रविरोधापत्तेरर्थतस्तत्संमतिरायातीति भावः। वत्यादीनां सदृशार्थकतया सादृश्यमात्रार्थकत्वं नास्तीत्या

© Dharmartha Trust J&K. Digitized by eGangotri

त्यांर्थीतित्वदुक्तव्यवस्थायामपि प्रकृते ह्रषलस्याग्रे मूल एव वाच्यत्वात्। वतिप्रत्ययप्रकृत्यंशे लक्षणापि प्रा
माणिकीति लक्षणांशे संमतिं दर्शयति। अत एवेति। यद्वा आनुशासनिक एवार्थे शक्तिः कल्प्यते तेन तदन्यत्र प्र
कृतेरेव लक्षणेत्यत्र संमतिमाह। अत एवेति। एवं च यत्र स्वतंत्रप्रमाणं तथा वाचनिकत्वेनापि समर्थयितुं श
क्यस्य तत्र कार प्रयोगस्यापि सूत्रानुरोधेन लक्षणयैव समर्थनं तत्र का कथा परेषामिति भावः। यद्यपि भाष्ये पूर्व
स्मादिवेति कैयटेनोक्तं तथापि पंचम्यंतसन्निधानसमभिव्याहारात् वतिप्रत्ययप्रकृतिसमर्पकपूर्वशब्दस्य पंचम्यं
तत्वं स्पष्टमेव। किमिदं पूर्वग्रहणं सनपेक्षं प्राकृसनो येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योपि भवतीति। आहो
स्वित् योगापेक्षं प्राग्यस्माद्योगाद्येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्यो भवतीति भाष्ये पि येभ्यः इति पंचम्यंतेन तद
र्थविवरणाद्भाष्येपि पंचम्यंतत्वं व्याख्यातमित्याशंकायां उक्तं कैयटग्रंथावतारार्थं गत्या परिकल्पिते भाष्यवा
क्यस्य पूर्ववस्मादिवेत्यनुवाद इति ध्येयम्। तुल्यार्थैरित्यादिमूलोपन्यस्तकैयटग्रंथारव्यवहितपूर्वमेव हि कैय

© Dharmartha Trust J&K. Digitized by eGangotri

टःप्राह। पक्षद्वयेपितेनतुल्यमितितृतीयांताद्वतिः ननुपंचम्यंतात्लक्षणाभावादिति। पक्षद्वयेपीति। पूर्वपक्षस्य
ससंबंधिकत्वात्। पूर्वत्वंसप्तम्यप्रत्ययापेक्षयावेतिभाष्योक्तेइत्यर्थः। पंचम्यंतादपिवतिःकुतोनस्यादत आह। लक्ष
णेति। तृतीयांतादेववतेर्विधानेनपंचम्यंतात्तदनुशासनविरहात्। नन्वेवंपंचम्यंतसामानाधिकरण्यमनुप
पन्नंस्यादत आह। तृतीयार्थेति। अंतर्भावयतीति। तत्तद्धर्मस्यार्थेप्रकृतेर्लक्षणास्वीकारादित्यर्थः। ननुब्राह्म
णापादानकाध्ययनस्यकुतोलाभइत्याशंक्याभिप्रायंविशदयति। तत्रचेति। ब्राह्मणापादानकाध्ययनइत्य
र्थः। वर्त्तत इति। ब्राह्मणपदस्यस्वार्थापादानकाध्ययनेलक्षणयातत्परत्वादितिकैयटस्यार्थः। ननुतुल्यार्थे
विहितवतिप्रयोगेपिश्रौतीस्यात् तत्रापिनिरुक्तादोषइवपदेनविवरणादर्शनादितिभ्रांताशंकांप्रसंगान्निराकरो
ति। यत्त्विति। प्रथमांतादिति। षष्ठीसप्तम्योस्तत्रानुपपत्त्यातादृशवतेरनंगीकारात्। इवार्थकवतिप्रत्ययेश्रौ
तत्वेइष्टापत्तेश्चेतिभावः। एतत्पक्षेतुल्यार्थकवतिप्रयोगेश्रौतत्वमापादयतापरेणतादृशार्थकपदप्रयोगे

© Dharmartha Trust J&K. Digitized by eGangotri

श्रौतीह स[illegible]दृशार्थैकपदप्रयोज्यार्थीतिस्योक्ताव्यवस्थानिर्दोषेत्यभिमतं। अतः स्वपक्षे दोषं परिहृत्य परपक्षे तमु
द्भावयति। किंचेति। नामार्थत्वाभावादिति। तद्धितांतस्य नामत्वेपि तद्धितमात्रस्य नामत्वाभावादिति भावः। वस्तु
तस्तु वत्यर्थसादृश्यस्य नामार्थत्वेपि तद्धितेष्वासर्वविभक्तिरिति सूत्रात्तस्याव्ययत्वेन निपातातिरिक्तनामार्थ
त्वाभावाद्भेदान्वयोपपत्तिरित्यत्र तात्पर्यम्। निपातातिरिक्तेत्यत्र निपातपदस्याव्ययमात्रपरत्वात्। अत एवा
व्ययनिपातातिरिक्तेत्यपि केचित्तत्र तत्र लिखंत एवेति। इवार्थे विहितवतिप्रत्ययस्य सादृश्यमात्रार्थकत्वं स्वीकु
र्वतां तथापि तदर्थस्याश्रयत्वेन मुख्यान्वयस्यानुमतत्वात्। भेदान्वयानुपपत्तेः। तुल्यादिपदानां सादृश्यमात्रपरत्वे
तस्याश्रयतया उपमेयान्वयेन स्यादित्यतस्तत्र सादृश्यवदर्थकत्वं वतिप्रत्ययार्थसादृश्यस्य तु निपातरूपना
मार्थत्वेनाश्रयतया मुख्यादावन्वयः स्यादेवेति। धर्मिपरत्वकल्पनाबीजभूतानुपपत्तिरत्र नास्तीति कुतः सादृश्य
वत्परत्वं वतिप्रत्ययस्येयेन तादृङ्मात्रेण तत्रत्वदभिमता आर्थत्वव्यवस्था स्यादिति भावः। निर्मूलेति। न हि तुल्य

© Dharmartha Trust J&K. Digitized by eGangotri

परवतिप्रत्यययोरर्थवैषम्येनतदर्थविहितत्वमात्रेणआर्थीत्यत्र किंचित्प्रमाणमस्तीत्यर्थः। समालं वितेति तु
ल्यार्थेविहितस्यवतेस्तत्समानार्थकतायाअनुशासनसंमतत्वादित्यर्थः। वस्तुतस्तु तत्वमसेतुल्यार्थवति
प्रत्यययोगेआर्थीतिनसंभवतितस्यधर्ममात्रपरत्वात्। धर्म्यंशपरत्वेचगौरवात्। अतएवचन्द्रायद्वातथैवे
वंसाम्येद्र्त्यमरः। वदितिवतिप्रत्ययमात्रस्यग्रहणं अविशेषादिवार्थतुल्यार्थेनिविशेषानादरणात्। राजमु
कुटादेवेवेतिपाठेयन्यासेप्यस्यक्षीरस्वाम्याद्यभियुक्तसंमतत्वात्। यत्तु ईदूदेद्द्विवचनंप्रगृह्यमितिसूत्रेश
ब्दकौस्तुभेमनोरमायां चमटोजिदीक्षितैरुक्तं। प्रातिपदिकप्रक्रमेतद्धितस्यवतेरनुगुणत्वादितितद्दु
पेस्यंयथादिशब्दानामपितद्धितत्वाविशेषादनुपादानापत्तेः। अव्ययत्वस्यचतावप्यविशेषात्। एतावां
स्तुविशेषः। थाल्प्रत्ययस्यप्रकृतिविशेषनियतत्वेनयथातथेतिसप्रकृतिकस्यैवोपादानं। वतेस्तुप्रकृति
विशेषनियमाभावात्॰ केवलस्यैववतेरिति। अतएवाख्यातवादशिरोमणिविवरणेधात्वर्थप्रातिपदिकार्थे

© Dharmartha Trust J&K. Digitized by eGangotri

योः साक्षाद्भेदान्वयो नास्तीति तत्कार्यकारणभावविचारावसरे अत्र प्रातिपदिकमव्ययातिरिक्तत्वेन वि

शेष्यं इति प्रक्रम्य अत एव वज्ञानवदित्यादौ चापि वत्यर्थस्य धात्वर्थ अनुयोगिप्रतियोगितया साक्षादन्व

यो नानुपपन्न इति मथुरानाथभट्टाचार्यैरभिहितं। इह हि ज्ञानेन तुल्येति तुल्यार्थ एव वतिरिति तदर्थस्य

प्रतियोगित्वादिना धात्वर्थान्वयाभिधानात् सादृश्यस्यैव तदर्थत्वमभिमतम्। सदृशार्थत्वे तस्य तादात्म्यसं

बंधेनैव इष्टान्वयोपपत्त्या अनुयोगित्वस्य तत्संबंधत्वकथनानुपपत्तेः। तुल्यादिपदानां तु भेदान्वयानुप

पत्त्यैव धर्मीपरत्वं कल्प्यत इत्युक्तत्वात्। यत्तं च वतिप्रत्ययेन व्यक्तिज्ञानयोः सादृश्यमभिधीयते इति लीला

वत्युपाये सामान्यप्रकरणे एकव्यक्तिवदिति मूलव्याख्यावसरे वर्द्धमानचरणैरुक्तं। अतः कथं सादृश्यार्थ

पदसत्त्वेपि तुल्यार्थकवतावुपमायाआर्थत्वं स्यात्। अस्मन्मते तु चेद्वृत्तित्वस्य वतिप्रत्ययार्थत्वाभावेपि

धर्ममात्रपरत्वेन तस्य यथोक्तविशेषाभावात्। वृत्तित्वस्य वतिप्रत्ययार्थत्ववादिभिर्भवद्भिस्तु तुल्यार्थे तद्विधाना

© Dharmartha Trust J&K. Digitized by eGangotri

अलंकारकौस्तु॰
५३
53

नुरोधादिति यथोक्तरीत्यैव श्रौतार्थत्वविभागो निरवद्य इत्याशयवाननुपसंहरति। दिगिति। मीमांसकैः सादृश्यस्यातिरि
क्तपदार्थत्वस्वीकारात्तन्मतेन विचारयितुमुपन्यस्यति। केचित्विति। सादृश्यमिति। सादृश्यपदेनाभिलप्यमानं व
स्त्वित्यर्थः। पदार्थान्तरमिति। तद्गतधर्मबुद्धिव्यंग्यतदतिरिक्तं सप्रतियोगिकं भावमित्यर्थः। एकदेश इति। सुंदरपदस्य सौं
दर्यवदर्थकत्वात्। ननु पदार्थः पदार्थेनेति व्युत्पत्तिर्घटं पश्येत्यादौ घटत्वनिष्ठप्रकारतानिरूपितकर्मत्वीयविशेष्यता
शालिज्ञानवारणाय पदार्थनिष्ठविशेष्यतानिरूपितप्रकारतयान्वयबोधं प्रति विशेष्यतासंबंधेन पदजन्योपस्थिते
र्हेतुत्वमिति कल्पितत्वात्कथं पदार्थैतदेकदेशान्वय इत्यत आह। चैत्रस्येति। स्वजन्यपुरुषजन्यपुरुषस्य न पदार्थत्वा
त्तदेकदेशे जन्ये चैत्रस्यान्वयाभ्युपगमात्। विशेष्ये पुरुषे तदन्वये चैत्रपुत्रेऽपि चैत्रस्य नप्तेति प्रयोगप्रसंगात्। स्वपि
तृजन्यचैत्ररूपपुरुषजन्यत्वस्य तत्पुत्रे सत्वात्। अतउक्तरीत्या चैत्रसंबंधिजन्यत्वाश्रयपुरुषजन्यपुरुष इति तत्र बो
ध इति भावः। अथ तत्र जन्यत्वे पुरुषे त्वं नप्तृपदस्य द्वे एव शक्ती लाघवात्। तच्चैत्रस्य जन्यत्वे तस्य पुरुषे तस्य पुनर्ज

© Dharmartha Trust J&K. Digitized by eGangotri

न्यत्वेतस्य च पुनः पुरुषेन्वय इति यथोक्तधीसिद्धेः तत्र अन्यत्वस्य पदार्थैकदेशत्वाभावात्पदार्थ एव तदन्वय इत्यत
आह। इत्यादाविति। चैत्रादन्य इत्यादाविवित्यर्थः। अन्यपदस्य भेदवत्येव शक्तेस्तदेकदेशे भेदे प्रतियोगितया चैत्रादेरन्व
यः। न चात्रापि भेदे आश्रये च शक्तिद्वयमेवेति वाच्यं। भेदप्रकारेणैवात्रानुभवो न आश्रयत्वप्रकारकानुभवाभावात्
प्रत एव भिन्नपदादन्यपदस्य विशेषः। भेदाश्रययोः क्रमेण प्रकृतिप्रत्ययार्थतया भिन्नपदस्य भेदाश्रयपरत्वाद
न्यपदस्य च भेदविशिष्टपरत्वात्। अत एवावयवदीधितौ इतरभेदा[illegible]नुमानस्थले इतराणि ना इतरेभ्यो भिन्ना
नि इतरेभ्यो भिद्यंते। इतरेभ्योन्यानि वेति प्रतिज्ञाचतुष्टयमुपन्यस्तं। अत्र प्रथमपक्षे भेद एव पक्षे प्रकारः। आश्रयत्वं
संसर्गः। न अर्थभेदस्यानुयोगित्वसंबंधेन पक्षान्वयात् द्वितीये निष्ठार्थस्याश्रयस्य भेदाश्रयत्वेन रूपेणाभेदो भास
ते। तृतीये आख्यातार्थस्याश्रयत्वस्य साक्षात्पक्षे प्रकारत्वं। धात्वर्थनामार्थयोः साक्षादन्वयबोधेन प्रकारीभूतविभ
क्त्यर्थेपि स्थितेरावश्यकत्वात्। चतुर्थे इतरभेदप्रकारेण तादृशाभेदवद्भेदो भासत इति अन्यभिन्नपदयोर्विशेषस्य

© Dharmartha Trust J&K. Digitized by eGangotri

व्याख्यातत्वात्। समुदायस्येति। अस्तमितपदपदार्थविभागस्यारविंदसुंदरमितिसमासवाक्यस्येत्यर्थः। एकइति।
वैयाकरणमतानुयायिनइत्यर्थः। तैः समासे विशिष्टशक्तिस्वीकारात्। सुंदरपदमुपलक्षणं। सुंदरपदस्यैवतावा
नर्थः। अरविंदपदं तात्पर्यग्राहकमित्यपि बोध्यं। ननु मास्तु आत्रवाचकलुप्तत्वमित्यत आह। सिद्धांतेति। उपमान
स्यसाधारणधर्मेत्वेनसह समासस्थलएव समासेवाचकलुप्तोपमायाः सर्वैर्ग्रंथकारैरुदाहृतत्वात्सादृश्यार्थके
ति। येनयत्रैवसादृश्यलक्षणास्वीक्रियते तन्मतेतत्पदस्यैवसादृश्यार्थकत्वात्तस्य च श्रूयमाणत्वात्। वाचकपदस्य
च बोधकमात्रपरत्वादिति भावः। मुख्यवाचकत्वमादायशंकते। नचेति। तथा च सादृश्यार्थकपदसत्वेपितस्यला
क्षणिकतयावाचकलुप्तत्वमव्याहतमेवेत्यर्थः। अभिप्रायमाह। वाचकत्वंहीति। गोत्वादिति। वृत्तित्वस्यसा
मान्यरूपतयातदेकरूपेस्याशक्तेर्विशेषत्वनिबंधनादित्याशयः। तमनाकलय्य स्वरूपगौरवं तत्रोद्भावयति।
नचवृत्तीति। स्वाभिप्रायंविशदयति। शक्तिजन्येत्यादिना। अतएवाह। शक्तिनिवेशेति। तथाच स्वरूपलाघवा

© Dharmartha Trust J&K. Digitized by eGangotri

पेस्रयासंग्राहकलाघवमेवबलीयइतिवृत्तित्वनिवेशएवयुक्तोविशेषनिवेशेप्रयोजनाभावादित्यर्थः।चमत्कारे
ति।यद्यप्येवं२इवादितुल्यादिपदभेदेनाप्युपमाविभागोनस्याद्विजातीयचमत्कारस्यतत्राप्यनुदयात्।तथापि
सादृश्यार्थकशब्दभेदादिनैवउपमाविभागोनतुवृत्तिभेदेनेत्यत्रतात्पर्यं।नचयन्मतेतुल्यादीनांसादृश्येलक्ष
णेत्याधीइवादीनांतुसादृश्येशक्तिरितिस्थितं।तिविभागस्तत्रवृत्तिभेदेनाप्युपमाविभागोस्त्येवेतिवाच्यं।वृत्ति
भेदेनलुप्तत्वादिविभागोनास्तीत्यत्रतात्पर्यात्।ननुतत्रैवायंविवादइतिकथमेतदित्यतआह।अन्यथेति।सा
दृश्येलक्षणास्थलेपिवाचकलुप्तत्वस्वीकारेइत्यर्थः।वतिप्रत्ययादेरिति।आदिपदात्तुल्यादिपदसंग्रहः।तथा
चचंद्रतुल्यंमुखमित्यादावपिवाचकलुप्तत्वापत्तिरित्यर्थः।शक्त्यभावादिति।अन्यथातत्रापिश्रौतत्वापत्तौत्व
त्सिद्धांतभंगापत्तेरित्यर्थः।शक्तिलक्षणान्यतरेति।धर्मिण्येवशक्तिस्वीकारेणसादृश्यरूपधर्मेशक्तिविरहःस्प
ष्टएव।ततएवसादृश्यबोधोपपत्तौलक्षणायाअपितत्रविरहएव।विशिष्टशक्तपदानांविशेषणताबोधार्थंतत्र

© Dharmartha Trust J&K. Digitized by eGangotri

लक्षणानंगीकारात् । सादृश्यशक्याश्रौतत्वं तल्लक्षणया वाच्यार्थत्वमिति विभागस्य च त्वयानभ्युपगमात् । येन
ममेव तदर्थे तेनापि लक्षणा स्यादिति भावः । तद्विषयतेति । तथा च तत्र शक्त्यभावेपि सदृशबोधस्य सादृश्य
विषयिता नियमात् तज्जनकत्वमस्त्येवेति न वाचलुप्तत्वापत्तिरित्यर्थः । ननु तत्र वाचकलुप्तत्वेष्टापत्तिरि
त्याशंक्य तत्रापसिद्धांतमुद्भावयति । अत एवेति । उपमालोपाभावादिति । वाचकलोपाभावादित्यपि द्रष्ट
व्यं । तथा च लक्षणायां लुप्तत्वाभ्युपगमे तत्र वाचकोपमानोभयलुप्तत्वापत्तिरिति तद्विरोध इति भावः । न
नु तत्रापि त्रिलुप्तत्वेष्टापत्तिरसंगंगाधरोक्तिमनुवदति । यदपीति । असिद्धश्चेति । स्वेतराबोधकत्वस्ये
तिशेषः । तामेव दर्शयति । उपमानादीति । चंद्रत्वेति । चंद्रत्वप्रकारकचंद्रविशेष्यकसमवायादिसंसर्गक
ज्ञानत्वस्य चंद्रपदशक्तिज्ञानकार्यतावच्छेदकत्वाभ्युपगमात् । अथ स्वेति । स्वं उपमानादीति । तद्विषयक
त्वाभाववत् घटादिज्ञानं तद्वृत्तिविषयिताकान्यतज्ज्ञानं चंद्रादिज्ञानं तज्जनकत्वं चंद्रादिपदानामस्त्ये

© Dharmartha Trust J&K. Digitized by eGangotri

वा चंद्रत्वादेरधिकस्याभानेपि चंद्रादिविषयकत्वस्यापि तत्र सत्त्वादधिकमिति न्यायादिति भावः। एवं सति प्रकृते
पि स्वेतराबोधकत्वं न निवेश्यत इत्याहा तर्हीति। इतरबोधकत्वेपि सादृश्यबोधकत्वस्यापि सत्त्वादित्यर्थः। ननु
उपमानविषयकत्वव्यापकविषयिताप्रतियोगिशाब्दबोधविषयत्वमेव विवक्षितं। चंद्रादिपदजन्यशाब्दबोध
स्य चंद्रत्वादिविषयकत्वनियमात्सादृश्यादिकं तु न तत्तान विषयत्वनियतमित्यस्वारस्याद्दोषांतरमाह। किंचेति।
चतुर्ण्णामिति। यथा सादृश्यादिमात्रार्थकपदाभावात्तत्र त्रिलुप्ता। तथोपमेयमात्रार्थकपदाभावादुपमेयलु
सापीति चतुर्लुप्तापि तत्रोपमा स्यात् न चेष्टापत्तिः। त्वयापि तस्या अनभ्युपगमात्। ग्रंथांतरविरोधमाह। अप्र
पिबेति। ग्रंथांतरविरोधस्य तथा दूषणत्वाभावात्तद्ग्रंथविरोधमेवाह। किंचेति। नञर्थत्वेपि वाचकलुप्तत्वं तत्र
कुतो न भवतीति वाच्यं। लुप्तोपमायां तस्य परिगणनापत्तेः। तेनाप्यपरिगणनाच्च। तस्मादरविंदसुंदरमित्या
दौ समासवशात् प्रश्रूयमाणोपीवशब्दः स्वत एव सादृश्यं बोधयतीत्येवालंकारिकाणामाशयः। तदनभिज्ञ

© Dharmartha Trust J&K. Digitized by eGangotri

स्यसादृश्यप्रत्ययस्त्वसिद्ध एव। उपमा चेयं श्रौत्यार्थी वेत्यत्र विद्वांस एव मानं। अरविंदवत्सुंदरमिति तुल्यार्थक
वतिप्रत्ययेनापि तदर्थोल्लेखदर्शनात्। वस्कतस्करस्त्रीवश्यामेति भगवतां महाभाष्यकाराणां उपमाना
नि सामान्यवचनैरिति सूत्रे प्रयोगाणां बहुलमुपलंभात् तैरनुसंधेनैव निर्णयो युक्त इति सहृदयैर्विचारणीयं।
वैयाकरणास्तु पूर्वपदं तदर्थसदृशे लाक्षणिकमिति सूचयितुमेव विग्रहवाक्ये इव शब्दप्रयोगः। तदेवं मृगीव
चपला मृगचपलेति सामानाधिकरण्यनिमित्तः पुंवद्भाव इत्याहुः तदेतत्सर्वं ध्वनयन्नाह। दृगिति। रसगंधरोक्के
बोधांतरमपि विचारयति। पश्यतीति। निरूपितत्वेति। निपातार्थनामार्थयोर्भेदेनापि साक्षादन्वयाभ्युपगमात्।
प्रकारतेति। निपातार्थधात्वर्थयोः प्रकारीभूतविभक्त्यर्थोपस्थितिं विनापि साक्षादेवभेदान्वयस्य नकलंजं भस
येदित्यादौ व्युत्पन्नत्वात्। धात्वर्थ इति। धातोर्ज्ञानार्थत्वस्यापि प्रसिद्धेः। तदुत्तराख्यातस्य तु विशेष्यत्वमर्थः। त
दाह। धीविशेष्य इति। अन्यत्कंठोक्तमेव। अन्वय इति। तृतीयार्थप्रयोज्यत्वस्येति शेषः। बोधद्वयं तंत्रेणाह

पतिः तेनेति। अत्र प्रयोज्ये त्यस्य धीपदार्थेन समन्वये आद्यः। सादृश्येनान्वये द्वितीयो बोध्य इति विशेषः। प्रकारतये
ति। सादृश्यनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन सादृश्यान्वयबोधं प्रतीत्यर्थः। लाघवमेव दर्शयति। अ प्र
रविंदमिवेति। तथा च तत्र इवार्थसादृश्यप्रकारकबोधे मुखादिरूपोपमेयार्थकपदजन्योपस्थितिर्हेतुरिति
हेतुहेतुमद्भावस्य त्वयाप्यवश्यं कल्पनीयत्वादरविंदमिव मुखं भातीत्यत्रापि सादृश्यस्य मुख एवान्वयो युक्तो
न तु धात्वर्थे ज्ञान इति भावः। ननु त्वदुक्तरीत्या सादृशस्य सौंदर्यप्रयोज्यत्वं न भ्रातेत्यत आह। सादृश्यप्रयोज
केति। मानसेनेति। तथा च तादृशस्थले सादृश्यनिष्ठसौंदर्यप्रयोज्यत्वज्ञानस्य शाब्दत्वमसिद्धमेवेत्यर्थः।
नचेति। तत्र इवार्थसादृश्यस्य प्रतियोगितासंबंधेन नञर्थाभावान्वयात्। अभावस्य च विशेषणतया मुखा
न्वयात् चंद्रप्रतियोगिकसादृश्याभाववन्मुखमिति बोधो दयात्। क्वचित् सादृश्यस्योपमेयभिन्नेपि विशेषण
त्वं दृष्टमेवेति भावः। प्रतियोगित्वेनेति। तथा च प्रतियोगितातिरिक्तसंबंधेन सादृश्यप्रकारकशाब्दत्वं कार्यताव

९५

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
५७
57

च्छेदकं कल्प्यते। अभावे च प्रतियोगित्वसंसर्गेणैव सादृश्यप्रकारकबोधोऽस्यान्न व्यभिचारः प्रकारतासंबंधस्य
तु तदतिरिक्तत्वेन सादृश्यस्य तेन संबंधेन धात्वर्थान्वये व्यभिचारः स्यादेवेति भावः। नन्वेवमपि चंद्रसादृश्य
वान् काल इत्यत्र कालिकसंबंधेन सादृश्यप्रकारकबोधे व्यभिचार इति चेत्सत्यं। इवपदजन्योपस्थितिविष
यसादृश्यप्रकारकशाब्दत्वस्य कार्यतावच्छेदकत्वोपगमात्। अत्र च सादृश्यस्य इवपदजन्योपस्थितिविषय
त्वविरहात्। कालिकविशेषणताविवक्षायां चंद्र इव काल इति शाब्दस्तु न प्रयुज्यत एव। तादृशसादृश्यस्य तु
योगिताविशेषसंबंधेनैवान्वयनियमात्। यथा रजतत्वस्य कालिकविशेषणतया कालेऽयत्वेऽपि कालो रज
तत्ववानिति रजतत्वेन रूपेण रजतत्ववत्तावगाहिबोधजनक एव शब्दः प्रयुज्यते। न तु रजतत्वांशे निरवच्छि
न्नप्रकारताकबोधजनकः कालो रजतमित्यादिरपि। रजतशब्दशक्यो रजतत्वांशे समवायस्यैव संसर्गत
या निवेशात्। तथा प्रकृतेऽपि। नन्वेवं चंद्रसादृश्यं मुखवृत्तिरित्यत्र सादृश्यस्य प्रकारतायान्वयबोधविर

© Dharmartha Trust J&K. Digitized by eGangotri

हाद्व्यभिचारसमाधानमनुपपन्नं। तत्र तस्य इव पदार्थत्वाभावादेव तच्छक्यानुदयादिति चेत् सत्यं तस्य यथाश्रुत
परत्वात्। परंतु प्रकारकत्वमनिवेश्य सादृश्यविषयकान्वयबोधत्वमात्रस्य कार्यतावच्छेदकत्वोपगमे चंद्रादिप
दस्यापि प्रतियोगितया तदन्वयित्वात् सादृश्यविषयकान्वयबोधत्वावच्छिन्नस्य तत्रापि जायमानत्वात् तस्य त
दनुयोगित्वाभावेन व्यभिचारः स्यादतः सादृश्यप्रकारकत्वं कार्यतावच्छेदके निवेशितमित्यत्रैव तात्पर्यं। व्यभिचारा
पत्तेरिति। तदनुयोग्युपस्थापकपदजन्योपस्थितिं विनापि तत्र इवार्थसादृश्यप्रकारकबोधत्वावच्छिन्नोत्पत्तेः। न
नु तदनुयोग्युपस्थापकपदधातु एतदन्यतरजन्योपस्थितेरेव तत्र हेतुत्वं कल्प्यतामत आह। तादृशेति। ज्ञानाभा
वेपीति। मुखज्ञानसत्वे चेत्यपि द्रष्टव्यं ज्ञानत्वाभावादिति। उक्तस्थले च सादृश्यप्रकारकज्ञानाभावान्न तद्बोधकश
ब्दप्रयोग इत्यर्थः। रूपांतरेणेति। द्रव्यत्वादिनेत्यर्थः। प्रकारकत्वेति। तृतीयारूपेत्यर्थः। तत्र ज्ञाने मुखत्वादेः प्र
कारत्वे तदुल्लेखायत्तद्विषयकशब्देपि मुखत्वेन मुखं जानातीत्येव प्रयोगः स्यात्। मुखत्वेन मुखं भातीत्यत्र यथा

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञानेमुखत्वप्रकारकत्वंलभ्यतेतेनैवंमुखत्ववन्मुखंभातीत्यत्रतत्त्ववक्तृतोमुखत्ववत्तयामुखत्ववत्तयामुखए
वान्वयादितिभावः।अतएवेति।तादृशशब्देनचैत्रनिष्ठज्ञानेमुखत्वप्रकारकत्वानुल्लेखादित्यर्थः।वस्तुतइ
ति।स्वोल्लेख्यज्ञानस्यसादृश्यप्रकारकत्वाभावदर्शनमात्रार्थंनतुज्ञानस्वरूपांतर्गतमित्यवधेयम्।वा
क्यार्थेति।वाक्यप्रयोगस्यहेतुभूतशाब्दबोधसमानविषयकज्ञानांतरविधया।तादृशयोगेतद्बोधस्यहेतुत्वा
त्।अतदृशस्थलेज्ञानस्यसादृश्यप्रकारकत्वलाभादन्यत्रापितथैवस्यादितिनभ्रमितव्यमित्यर्थः।व्यभि
चारेणेति।रजतत्वप्रकारकधीविशेष्यभूतायांशुक्तौरजतत्वाभावादित्यर्थः।प्रमेति।तद्वत्त्वंविनातद्विष
यस्यतत्प्रकारकप्रमाविशेष्यत्वानुपपत्तेः।तदभाववतितत्प्रकारकज्ञानत्वस्यभ्रमत्वनियमादित्यर्थः।कुमु
दमिति।नत्वलुप्तोपमेत्यालंकारिकसंप्रदायादित्यर्थः।तथापितदंशेसादृश्यमस्त्येवेत्यतआह।प्रमायाइ
ति।ज्ञानमात्रस्यैवधात्वर्थत्वात्।तल्लक्षणायांचगौरवात्मानाभावाच्चेत्यर्थः।ननुतत्प्रकारकधीविशेष्यत्वस्य

© Dharmartha Trust J&K. Digitized by eGangotri

तद्दलव्यभिचारेपिअरविंदसादृश्यप्रकारकधीविशेष्यत्वशाब्दबोधोनंतरंअरविंदसदृशंमुखंइतिज्ञानां
तरोत्पत्तोकिंबाधकंनह्यत्रमुखंअरविंदसादृश्यवत्तत्प्रकारकधीविशेष्यत्वादित्यनुमानविधयाअरविंद
सदृशत्वंमुखेग्राह्यंयेनतत्रव्यभिचारज्ञानंविरोधिस्यात्।किंतुमानसमेवतादृशज्ञानमपेक्षितंतत्र
चतद्विषयत्वापन्नानांपदार्थानांउपस्थितिमात्रमपेक्ष्यते।तत्रापिदेयवअरविंदसादृश्यमुखयोःशा
ब्दबुद्धौभासमानत्वात्।अतस्तादृशशाब्दबोधोत्तरमरविंदसादृश्यप्रकारकंमुखंविशेष्यकमानसो
त्पत्तौबाधकाभावात्कथमेवंसंगच्छतइतिचेत्सत्यं।नियतप्रतीतिर्नस्यादित्यत्रतात्पर्यात्।अनुमा
नेनतदुपपादनेचोक्तव्यभिचारज्ञानसत्वेतदसंभवात्।नचेष्टमिति।तत्रमुखानुवादेनसादृश्यस्य
विधेयत्वेनबोधादित्याशयः।स्वप्रकारकेति।स्वपदंसादृश्यपरं।एवंचसादृश्यस्यविधेयत्वानुभवोर
क्षितोभवतीतिभावः।नन्वेवंभातीत्यनन्वितंस्यात्तद्र्त्यतआह।धातोरिति।ननुपूर्वमनुयोगितावि

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
५९
59

शेषसंबंधेनैवउपमेयसादृश्यान्वयोव्यवस्थापितस्तत्कथं स्वप्रकारकज्ञानविषयत्वसंसर्गेणासुखेनद
न्वयं उच्यते। कालिकविशेषणतावृत्तेरेव तेन विवक्षितत्वात्। नचैवं चंद्र इवेत्यादावपि उक्तसंबंधेन
सादृश्यप्रकारकज्ञानापत्तिरिति वाच्यं। भातीत्यादिसमभिव्याहाररूपतात्पर्यग्राहकाभावात्। अथैवम
पि अरविंदसदृशं नयेत्यादि संशयनिवृत्तिरुक्तशाब्दबोधान्नस्यादिति चेत्। तदापि तत्साम्यात। अरविं
दसादृश्यप्रकारकधीविशेष्यत्वप्रकारकज्ञानस्यापि तादृशसंशयं प्रत्यविरोधित्वात्। नच यत्रारविंदमि
व भातीत्युपमेयार्थकपदरहितमेव वाक्यं प्रयुक्तं। तत्र तस्य पदजन्योपस्थितेरभावेन सादृश्यस्यानुयो
गित्वेनान्वयासंभवात्तत्र प्रकारतासंबंधेन तस्य धात्वर्थज्ञान एवान्वयोवश्यं वाच्य इति वाच्यं। तत्रा
पि तदध्याहारावश्यकत्वात्सादृश्यस्य प्रतियोग्यनुयोग्युभयनिरूपणं विना निरूपयितुमशक्यत्वात्। अ
न्यथा आख्यातार्थविशेष्यत्वस्यापि प्रथमांतपदोपस्थाप्यरूपविशेष्याभावेनान्वयापत्तेः तदेतत्संवे

© Dharmartha Trust J&K. Digitized by eGangotri

ध्वनयन्नाह। दृशिगिति। सादृश्यस्य धात्वर्थज्ञानान्वयस्वीकारे दूषणांतरमप्याह। अत एवेति। नानुपेति। उपमे
यस्य पुलिंगतया तुल्यदस्यापि तथात्वोपपत्तेः। मुखपदस्य नपुंसकत्वात्तत्र तुल्यपदस्य क्लीवत्वावश्य
कत्वात् तत्र क्रियाविशेषणत्वप्रयुक्तक्लीवत्वापादानं दृष्टापादनमेव स्यादित्यत उक्तं तत्र पुंस्त्वसंपादनार्थं वि
वपदमुक्तं। इदं च प्रसिद्धाभिप्रायेण दृष्टान्तादेः सदृशपुलिंगस्य सुलभत्वात्। ननु तत्रापि सादृश्यस्य प्रकार
त्वसंबंधेन ज्ञान एवान्वयो भविष्यतीत्याशंक्याह। तन्मत इति। भेदेनेति। अभेदातिरिक्तसंबंधेन निपातातिरिक्त
रिक्तनामार्थप्रकारकबोधे विभक्तिजन्योपस्थितेर्हेतुत्वात्। ज्ञानस्य च धात्वर्थत्वेन यथोक्तहेत्वभावादिति भे
दान्वये तु सादृश्याभिन्नज्ञानेति बोधः स्यात् स चायोग्यतापराहत एवेति भावः। लक्षणेति। तथा च सादृ
श्यप्रकारकस्य नामार्थत्वेन तयोर्भेदेन ज्ञानान्वयः स्तोकं पचतीत्यादौ नामार्थधात्वर्थयोरभेदान्वयस्य
व्युत्पन्नत्वादित्यर्थः। संकेम्व इति। क्रियाविशेषणानां नपुंसकत्वस्य वाचनिकत्वादित्यर्थः। तज्ज्ञवचनं उ

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
६०
60

~~[struck out]~~ ।करं तत्ततोऽन्यत्रापि द्रष्टव्यत इति चेत्सत्यमेत
त्। ननु क्रियाविशेषणानां कर्मत्वं तावन्न्यायसिद्धमेव न तु वाचनिकं। स्तोकं पचतीत्यत्र पाकं करोतीति द्विती
यांतपाकपदेन धात्वर्थविवरणात्तद्विशेषणतया तत्सामानाधिकरण्येन स्तोकस्यापि कर्मताया एवोचि
तत्वात्। अत एव यजेतेत्यत्र विधिबलेन धात्वर्थस्य करणत्वावगमात् तत्र तद्विशेषणतया ज्योतिष्टोमेनेति
तृतीयैवेति वैयाकरणमतमभिसंधाय दोषांतरमाह। अपि चेति। तवत्विति। अरविंदं तुल्यो भातीत्यत्र साद
श्यस्य प्रकारत्वसंबंधेन ज्ञानान्वयानुपपत्त्या तुल्यपदस्य तुल्यत्वप्रकारके लक्षणात्सुन्यैकत्वात् तुल्यत्व
प्रकारकविशेषणतया अभेदश्च संसर्गतया ज्ञानं विशेष्यतया भासते। अरविंदवद्भातीत्यत्र तु सादृश्यल
क्षणास्वीकारेऽपि तस्य वतिप्रत्ययार्थतया निपातातिरिक्तनामार्थत्वाभावेन तस्य प्रकारत्वसंबंधेन ज्ञानान्व
यः संभवत्येवेति सादृश्यं विशेषणतया प्रकारत्वं च संसर्गतया ज्ञानं च विशेष्यतया प्रतीयते। ततश्च विशेष

© Dharmartha Trust J&K. Digitized by eGangotri

णांशेसंसर्गांशे च विषयभेदापत्तिरिति भावः। वतिप्रत्ययपर्यंतानुधावनं तु तुल्यार्थे विहितत्वात्तत्समानवि
षयकबोधस्यैवोचितत्वादिति ध्वननार्थं। अरविंदमिव भातीत्यनेनापि सह वैषम्यं ज्ञेयमेव। इवादेः सादृ
श्यमात्रयत्वसंबंधेन तुल्यादेस्तु तद्वान्भेदसंबंधेन उपमेयेन्वीयत इति वैषम्यांगीकारेपि अरविंदवद्भाति अ
रविंदतुल्यो भातीति द्वयोरुक्तरीत्या वैषम्यांगीकारे प्रमाणाभावात्। एतावन्मात्रस्यापि तथा दोषत्वा
भावादाह। अरविंदेति। अरविंदतुल्यत्वप्रकारकज्ञानाभावज्ञानस्यारविंदतुल्यत्वप्रकारकज्ञानज्ञानं
प्रत्यविरोधित्वादित्यर्थः। क्रियाविशेषणत्वप्रयुक्तक्लीबत्वपरिहारार्थं केषांचित्कल्पनांसिंहावलोकि
तन्यायेन दूषयितुमनुवक्ति। यदपीति। तात्पर्येति। तथा च क्रियाविशेषणानामिति नपुंसकत्वापत्ति
रिति दोषाभाव इति भावः। ननु तथैव परिभाषाकरणे दोषाभावः। किं वा सादृश्यमात्रस्य धात्व
र्थत्वाभावात्पूर्वोक्तमप्यपार्थत्वव्यामूहतमेवेत्यत आह। किं चेति। तथापीति। क्रियाविशेषणतात्पर्यग्राह

© Dharmartha Trust J&K. Digitized by eGangotri

अ·को·टी·
६१
61

कत्वेपीत्यर्थः। नहीति। यदपितुल्यपदं क्रियाविशेषणं तदा तत्वेन क्लीबत्वापत्तिः। यदि तात्पर्यग्राहकमात्रं त
दापि पुल्लिंगविशेषणत्वाभावेन तदापत्तिः। लिंगविशेषाविवक्षायां नपुंसकमेव प्रयुज्यत इति सामान्ये
नपुंसकमिति महाभाष्यकारादिभिर्व्यवस्थापितत्वात्तदाह। सामान्ये इति। तथा च विशेषानिश्चये वक्ता
रो भवंति। किमस्य जातं स्त्री पुमान्वेत्यादि। अतस्तुल्यपदस्यैव सादृश्यादिकमर्थः। तस्य च मुखादावन्व
यस्यैव युक्तमित्यर्थः। अपि च पूर्वोक्तविषयवैषम्यरूपदोषोऽप्यवसेयः। तथाहि। सादृश्यप्रकारकज्ञाने
लक्षणाभ्युपगमे प्रकारकेति संसर्गो वेद्यो विशेषणं वा। आद्ये प्रकारत्वसंबंधेन सादृश्यप्रकारकज्ञानवि
शेष्यकस्य द्वितीये च तादात्म्यसंबंधेन सादृश्यप्रकारकज्ञानविशेष्यकस्य शाब्दबोधस्य पूर्ववदेवोदया
त्। द्वितीये तावदरविंदमिव वा भातीत्येतद्वाक्यजन्यात्सादृश्यप्रकारकप्रकारत्वे संसर्गकज्ञानविशेष्य
त्वावगाहिनः शाब्दबोधाद्वैषम्यं स्पष्टमेव। आद्ये तु विषयसाम्यरक्षायामपि तुल्यपदस्य तात्पर्यग्राहक

© Dharmartha Trust J&K. Digitized by eGangotri

ताभ्युपगमे तद्योगे अरविंदादिपदे तृतीयानुपपत्तिः। तुल्यार्थैरिति सूत्रेणातदर्थकपदयोग एव तद्विधानात्। यदि तु प्र
थमं तुल्यपदस्य स्वार्थविवक्षया तद्योगे तृतीयां विधाय पश्चादेव तस्य तात्पर्यग्राहकता कल्प्यते। अत एव गौणमु
ख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायाद्गोर्वाहीक इत्यादौ गोशब्दस्य गौणत्वात्कथं तत्र वहुत्वादिकार्यमित्याशंक्य
मुख्य एव स्वार्थे गोशब्दस्य वृत्तत्वात्ततः पश्चादेव गौणत्वं। न चांतरंगत्वेन प्रवृत्तः पदसंस्कारो बहिरंगगौणत्वप्रतीता
वपि निवर्तत इति समादधिरे शाब्दिका एवमिहापीति न तृतीयानुपपत्तिरिति विभाव्यते। तदापि सादृश्यस्य धात्वर्थत्वा
त्तन्निरूपितत्वसंबंधेनारविंदादिपदार्थान्वयानुपपत्तिः। धात्वर्थनामार्थयोः साक्षाद्भेदान्वयाभावात्। अर्थनिरूपितत्वं
तृतीयार्थं कल्पयित्वा तद्द्वारकोऽरविंदादेः सादृश्यरूपधात्वर्थान्वयः कल्प्यते। एवमपि एकदेशान्वयो दुर्वार एव। यदि तु
सादृश्य एव लक्षणाज्ञाने तु शक्तिरेव अतो नैकदेशत्वं सादृश्यस्येत्युच्यते। तर्हि सादृश्यस्य मुख्यपदार्थत्वादुपमा
याश्रौतत्वापत्तिः। न चेष्टापत्तिः। त्वयापि तदनभ्युपगमात्। अथ सादृश्ये लक्षणायामपि श्रौतत्वं। तत्र शक्त्यैव श्रौत

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰लं॰कौ॰टी॰
६२
62

तोपगमात्। यद्वा सादृश्यज्ञानमेव लक्षणासंबंधिकस्थले एकदेशान्वयस्यापि व्युत्पन्नत्वात्। यद्वा अरविंदमपि ता
त्पर्यग्राहकमेव तथाचारविंदसादृश्यज्ञानमेव लक्षणाद्दे इत्यादिकं विभाव्यते। तथाप्यस्मदपेक्षया गौरवं स्पष्टमेव
स्यादिकं ध्वनयन्नाह। अलमिति। पूर्वोक्तस्थलेपि सादृश्यस्य धात्वर्थान्वयबाधकयुक्तिं प्रदर्शयिष्यन्। अन्यत्रापि सा
दृश्यस्य धात्वर्थान्वयं वारयितुमाह। गज इवेति। गजनिरूपितसादृश्यस्य गमने बाधाद्गजपदस्य तद्गमनपरत्वा
श्रयणं। तस्येति। गजगमनस्येत्यर्थः। प्रतियोगित्वेनेति। निपातार्थनामार्थयोर्भेदान्वयस्यापि व्युत्पत्तेः। तस्येति।
सादृश्यस्येत्यर्थः। इत्यादीति। पिकशब्दस्य तदीयरुते लक्षणा। तस्य इवार्थे सादृश्ये प्रतियोगित्वेन सादृश्यस्या
श्रयतया धात्वर्थे रुतेन्वयः। तेन पिकरुतसदृशरुतानुकूलकृतिमानिति बोधः। एवमन्यत्रापीति भावः। सादृश्य
स्य धात्वर्थान्वयवादिनामेकेषां मतं मतांतरोपन्यासमुखेन दूषयति। धात्वर्थेति। ततश्चैतादृशकार्यकारणभा
वबलेन धात्वर्थविशेष्यक इवार्थसादृश्यप्रकारकबोधानस्वीकर्त्तुमर्हः सादृश्यविभक्त्यर्थत्वाभावात् धात्वर्थ

© Dharmartha Trust J&K. Digitized by eGangotri

निष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधवीकारे व्यभिचारप्रसंगात्। अत्रप्रकारतासंबंधेनान्वयबो
धेविभक्तिजन्योपस्थितिर्हेतुरित्युक्तौ नीलो घट इत्यादौ व्यभिचारः नीलस्य प्रकारतयान्वयबोधात्तस्य च विभक्त्य
र्थत्वाभावात्। एवं घट इत्यादौ घटत्वस्य प्रकारतया बोधादुक्तदोषो दुष्पृष्यः। अतो धात्वर्थनिष्ठविशेष्यतानिरूपि
तेत्युक्तं। तत्र तु घटादिरूपनामार्थनिष्ठविशेष्यतानिरूपितेव नीलादिप्रकारतेत्यदोषः। ननूक्तकार्यकारणभावो
नांगीकर्त्तव्य इत्यत आह। अवश्येति। घटो न पश्यतीत्यादौ घटान्वितस्याभावस्य विषयतासंबंधेन धात्वर्थदर्श
नान्वये घटाभावं पश्यतीतिवत् घटाभावविषयकदर्शनं शाब्दबोधापत्तेस्तद्वारणाय यथोक्तकार्यकारण
भावः कल्प्यते। तत्कल्पने चाभावस्य निपातार्थतया विभक्त्यर्थत्वाभावाद्धत्वभावादेव न तथा बोध इति भावः। ग
मनकर्त्तर्येवेति। गजसदृशो गमनानुकूलकृतिमानित्यर्थः। नन्वेवं धर्मान्तरेण तयोः सादृश्यं सिध्येन्नतु गम
नेनेत्यत आह। गजसादृश्यं चेत्यादि। स्वगमनेति। गजगमनेत्यर्थः। अन्ये इति। आख्यातवाददीधितिविवरणे

© Dharmartha Trust J&K. Digitized by eGangotri

रुद्रभट्टाचार्यादय इत्यर्थः। अत्र रसगंगाधरोक्तदूषणमाह। किंचित्विति। भिन्नविधेयकेति। गज इव यः पुरुषः स ग
च्छतीत्यत्र गजसादृश्यविशिष्टपुरुषानुवादेन गमनस्य विधेयत्वं। पुरुषो यः स गज इव गच्छतीत्यत्र तु शुद्धपुरुषा
नुवादेन गजगमनसदृशगमनस्य विधेयत्वं प्रतीयत इत्यर्थः। एवं च विधेयतयेत्यस्य विधेयकोटिप्रविष्टतयेत्य
र्थः। अनन्वयेति। गजसदृशो देवदत्तो गमनानुकूलकृतिमानित्यत्र इवनस्यान्वयाबोधात्। एवं विधत्वापन्नका
रकमात्रस्याप्यनन्वयो बोध्य इति भावः। ननु धात्वर्थनिष्ठेत्यादिकार्यकारणभावस्य क्लृप्तत्वात्कथं सादृश्यस्य
धात्वर्थान्वयः अतः प्रतीतिमात्रं अकिंचित्करमित्यत आह। उक्तेति। ननु यथोक्तकार्यकारणभावानंगीकारे घटो
न पश्यतीत्यत्र घटस्य प्रतियोगितया नञर्थाभावान्वये तस्य च विषयतया धात्वर्थदर्शनान्वये घटाभावं पश्य
तीति बोधः स्यादित्याशंकते। नचेति। धात्वर्थेति। तथा च घटो न पश्यतीत्यत्राभावस्य नञ्जन्योपस्थितिविषयत्वे
न तत्र धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधः। न चैवं पाकेन याग इत्यत्र नञर्थान्योन्या

© Dharmartha Trust J&K. Digitized by eGangotri

भावस्यपाकादावन्वयोनस्यात्पाकस्यधात्वर्थतापातन्निष्ठविशेष्यतानिरूपितप्रकारतायासंबंधेनान्योभावस्या
न्वयबोधायोगादितिवाच्यं।नामार्थातिरिक्तत्वेनधात्वर्थस्यविशेषणात्।उक्तस्थलेचधात्वर्थत्वेपिपाकादेर्नामा
र्थत्वात्।धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधंप्रतिविभक्तिजन्योपस्थितेर्हेतुत्वंकल्पयता
परेणापिधात्वर्थस्यनामार्थत्वभिन्नत्वेनावश्यंविशेष्यत्वात्।अन्यथापाकोनयागइत्यादावुक्तकार्यतावच्छेदकाव
च्छिन्नस्यनञर्थसत्त्वेनविभक्तिजन्योपस्थितेश्चाभावेनव्यभिचारापत्तेरितितन्मतशेषः।अत्रेदंबोध्यं।एतादृशप्र
तिबध्यप्रतिबंधकभावकल्पनेनकलंजभक्षयेदित्यत्रविध्यर्थस्यबलवदनिष्टाननुबंधित्वस्यप्रतियोगित्वेननञर्था
भावान्वयेतस्यभक्षणेधात्वर्थेविशेषणतावशेषसंबंधेनान्वयोनस्यात्।अभावस्यनञ्पदजन्योपस्थितिविष
यत्वेनधात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधासंभवात्।नचत्वदुक्तरीत्याप्येतदनुपपन्नं।अभा
वस्यविभक्त्यर्थत्वाभावादितिवाच्यं।तत्रविशिष्यधातुजन्योपस्थितित्वेनकारणत्वांतरकल्पनात्।नचममाप्येवमे

© Dharmartha Trust J&K. Digitized by eGangotri

त्वर

वनिस्तादृ इतिवाच्यं।प्रतिबंधकसत्वेहेत्वंतरेणापिकार्यानुदयात्।वनंगजःद्रवगृहंदेवदत्तोगच्छती।त्यत्रचवनेगृहयोरभे
दान्वयःदेवदत्तेगजस्साहश्यंवनसंयोगानुकूलगमनसदृशगृहसंयोगानुकूलगमनकर्तृत्वं।तथाचोक्तधर्मेणगजस
दृशःपुरुषोवानाभिन्नगृहकर्मकगमनानुकूलकृतिमानित्यादिःशाब्दबोधः।एवंचधात्वर्थनिष्ठविशेष्यतानिरूपित
प्रकारतयान्वयबोधविशेष्यतासंबंधेनविभक्तिजन्योपस्थितेर्हेतुत्वेअवश्यंकल्पनीयेअरविंदमिवभाती।त्यादावपि
प्रकारतयासाहश्यस्योपस्थितानान्वयोपितन्मतेप्रथममुपन्यस्तोनिरस्तोवेदितव्यइत्याद्यस्वरसमेतन्मतेसूचयन्नेव
एवंमतमेवसमर्थयमानआह।वक्तृतइति।धर्मांतरेति।स्थूलत्ववत्त्ववत्त्वादिरूपेत्यर्थः।आवश्यकत्वादिति।स्थूलत्वा
दिप्रयुक्तसाम्यविवक्षायांगजागमनसदृशगमनेत्यादिबोधानुपपत्तेरित्यर्थः।तथाचे[illegible]धर्मांत
रप्रयुक्तसाम्यविवक्षायांतस्यकर्त्रन्वयस्वीकारस्यावश्यकतयात्वदुक्तरीत्याधात्वर्थएवसादृश्यान्वयाभ्युपगमोनि
र्बीजइतिभावः।नन्वेवमपिगमनप्रयोज्यसादृश्यविवक्षायांतस्यधात्वर्थान्वयोपिस्वीकार्येइत्यतआह।यत्रापीति।म

© Dharmartha Trust J&K. Digitized by eGangotri

नसमेवेति। उक्तविधया धात्वर्थसादृश्यान्वयासंभवादिति भावः। ननु धर्मान्तरेण सादृश्यविवक्षायां गज इव गच्छतीति
प्रयोगो न भवत्येवेत्यत आह। अत एवेति। तत्प्रयोजकस्थूलत्वादिवाचकपदाभावादित्यर्थः। न तथेति। गमनार्थकग
मिरूपधातुप्रयोगसत्वेन न धर्मलुप्तेत्यर्थः। असंभवेति। चंद्र इव रमणीयमित्यादौ रमणीयत्वादिबोधेपि तत्साधारणता
याः शाब्दबोधाविषयत्वात्। तस्याः पदार्थवाक्यार्थत्वाभावादित्यर्थः। उक्तरीतिमन्यत्राप्यतिदिशति। एवं पिक इवेति। अत्र
हृत्यादिधर्मेणैव सादृश्यं चमत्कारजनकतया कविप्रसिद्धं। गज इवेत्यादौ तूपात्तगमनादिव्यतिव्यतिरिक्तधर्मेणापि
तथेत्यत्र विशेषः। चक्रं देहि। रघुवंशेसी। तां वाल्मीकितपोवने परित्यज्य लक्ष्मणे गते इयमुक्तिः। एवं सादृश्यस्य गमनप्रयो
ज्यत्वज्ञानं न निर्वहेत्। प्रतीयते च तदवश्यं अतो गमनसादृश्यं शाब्दबोधविषय एवेति स्वाकार्यं। तच्च न सादृश्यस्य धात्वर्था
न्वयं विनेत्यर्थो त्तथा सेत्स्यतीत्यभिप्रायवानाशंकते। नन्वेतदिति। गजसादृश्येत्यत्र गजपदं गजगमनपरं तथा च गजगम
नसादृश्याभावव्याप्यवद्गमनमिति परामर्शोकारः गजगमनेत्यादिपाठस्तु स्पष्टार्थः। अत्र चोक्तपरामर्शः शाब्दसामग्या च

© Dharmartha Trust J&K. Digitized by eGangotri

त्येकेक्षणाः तदुत्तरंशाब्दंजायतामितीच्छाधिकरणंद्वितीयःशाब्दबोधोत्पत्त्यधिकरणंतृतीयःतथाचज्ञानस्यक्षणद्वया
वस्थायितयाशाब्दोत्पत्तिक्षणेपरामर्षनाशात्तदुत्तरंगजगमनसादृश्याभाववद्गमनमित्यनुमितिर्नस्यात्तत्पूर्व
क्षणेपरामर्षरूपकारणाभावात्।अतउक्तंअपेक्षाबुद्ध्यात्मकइतिपरामर्षविशेषणंतथाचापेक्षात्मकज्ञानस्य
क्षणत्रयावस्थायितयाशाब्दबोधोत्पत्तिक्षणेविनश्यदवस्थःपरामर्षोऽस्त्येवेतितदुत्तरंउक्तानुमित्युपपत्तिःअनु
मितिक्षणेपरामर्षाभावेपितदव्यवहितपूर्वक्षणेतत्सत्वादितिभावः।ननुभिन्नविषयेअनुमितिसामग्र्याज्ञानमा
त्रसामग्रीतोबलवत्त्वात्कथंतत्रगजइवगच्छतीतिशाब्दबोधोभविष्यतीत्यतआह।शाब्दंजायतामिति।इच्छाघटित
सामग्र्याबलवत्त्वकल्पनात्स्वभावतःशाब्दसामग्र्यादुर्बलत्वेपिइच्छाघटितत्वेनतस्याबलवत्त्वमितिइच्छावशाच्छा
ब्दबोधउपपद्यतइतिभावः।बोधइति।गजसदृशगमनानुकूलकृतिमानितित्वदभिमतःसादृश्यप्रकारककर्तृवि
शेष्यकइत्यर्थः।मानसंनेति।मानससामग्र्याःसर्वतोदुर्बलत्वकल्पनादित्यर्थः।ननुतादृशानुमित्यनंतरंशाब्दबो

© Dharmartha Trust J&K. Digitized by eGangotri

धातत्त्वतीयस्तल एव गजगमनसदृशंगमनमिति मानसंभविष्यतीत्यत आह। एवंतद्रूपेति। गजगमनसादृश्या
भाववद्गमनमित्यनुमितिरूपेत्यर्थः। तथा चानुमितिजननसमये विरोधिसामग्रीविधयाऽनुमितिसामग्र्याप्र
तिबंधान्न तथाविधमानसंभवितुमर्हतीति तदुत्तरक्षणेऽप्यनुमित्यैव विरोधज्ञानविधयाप्रतिबंधान्नतत्संभव इ
ति भावः। ननु तादृशस्थले गमने गजगमनसादृश्यं मा प्रतीयतामित्यत आह। सर्वानुभवेति। गजइवगच्छतीत्ये
तद्वाक्यार्थबोधानंतरं गमने गजगमनसादृश्यग्रहनियमादित्यर्थः। ममत्विति। तत्र शाब्दं जायतामितीच्छावशा
द्गजइवगच्छतीत्येतद्वाक्यात् शाब्दबोधे उत्पद्यमाने तस्य गजगमनसदृशगमनानुकूलकृतिमानित्याकारकत्व
स्य मया स्वीकारात् गमने गजगमनसादृश्यग्रहसिद्धेः। त्वया तु शाब्दबोधस्य गजसदृशगमनानुकूलकृतिमा
नित्याकारकत्वस्याभ्युपगमादिच्छाबलाच्छाब्दे जातेऽपि गमने गजगमनसादृश्यस्य तद्विषयत्वान्न तत्प्रतीतिर्निर्वाह
इति भावः। समाधिसौकर्यादाह। उच्यत इति। बहुक्षणविलंबकल्पनप्रयुक्तापरितोषादाह। किं चेति। दुर्घटमिति।

© Dharmartha Trust J&K. Digitized by eGangotri

अलं.का.म.टी.
॥६६॥
66

गमनेगजगमनसादृश्ययद्यपिपुरुषेशाब्दबोधस्यगजसादृश्यविषयकत्वविरहात्।गजसादृश्याभावप्रकारक
संशयंप्रत्यविरोधित्वात्गजसदृशोनपुरुषइतिबाधज्ञानप्रतिबध्यत्वानुपपत्तेः।तादृशज्ञानंप्रतिप्रतिबंधक
त्वस्याप्यसंभवात्।ग्राह्याभावानवगाहनात्।अदोषइति।संशयनिवृत्त्यनुपपत्त्यादिरूपदोषाभावइत्यर्थः।शा
ब्दबोधोत्तरभाविनापुरुषविशेष्यकगजसादृश्यप्रकारकज्ञानेनतन्निवृत्त्यादिनिर्वाहात्।तथापीति।गजसदृ
शोनपुरुषइतिज्ञानस्यगजगमनसदृशगमनानुकूलकृतिमानित्येतादृशबोधाविरोधित्वात् विषयभेदात्
एवंचसंशयनिवृत्त्यादिरूपकार्यस्यशाब्दबोधोत्तरज्ञानेनसंपादनविलंबंकल्पयित्वाकथंचित्परिहारसंभवेपिगज
सदृशोनेतिज्ञानसत्त्वेगजइवगच्छतीत्येतद्वाक्यजन्यशाब्दबोधानुत्पत्त्यनुभवोनसमाधातुंशक्यः।नचात्रापि
तादृशज्ञानोत्तरंएतद्गमनंनगजगमनसदृशमितिज्ञानेनैवउत्पन्नशाब्दबोधप्रतिबंधःसंभवतीतिवाच्यं।गजस
दृशोनेतिज्ञानोत्तरमेवतदापत्तेरनिवारणात्।नचतादृशबाधधीसत्त्वेगजइवगच्छतीत्येतद्वाक्यार्थबोधप्रति

रामः
॥६६॥

© Dharmartha Trust J&K. Digitized by eGangotri

बंधोऽसिद्ध एवेति वाच्यं। अनुभवापलापेऽपेक्षणीयतापत्तेः वस्तुमात्रगोचरीत्यामयात्वदभिमतबाधधीकालेपि शा
ब्दानुत्पत्त्यनुभवस्यारक्षणात्। तदर्थमेव तां शंकामवतारयति। नचेति। पुरुषगमनविशेष्यकगजसादृश्या
भावप्रकारकज्ञानस्य पुरुषविशेष्यकगजसादृश्यप्रकारकत्वदभिमतबोधप्रतिकूलत्वाभावाद्विषयभेदसाम्या
दित्यर्थः। सामग्रीति। गजसदृश इति ज्ञानस्य एतद्गमनं गजगमनसदृशमिति ज्ञानमंतरेणासंभवात्। धर्म
सादृश्यं विना धर्मिसादृश्यस्यानुपपत्तेरित्यर्थः। एतच्च नहीत्यादिना स्फुटं पुरस्तात्। नच धर्मांतरप्रयुक्तसा
म्यविवक्षायां गमनसादृश्यज्ञानं विनापि धर्मांतरसादृश्येन गजसदृश इति ज्ञानं संभवत्येवेति वाच्यं। तदा त्व
दुक्तबाधधीसत्वेपि गजसदृशो गच्छतीति एतद्वाक्यार्थबोधदर्शनापत्तेः। यदा तु पूर्वं गमनेन गजगमनसदृशमि
ति बाधबुद्धिरस्ति तदा गजसदृश इति योग्यज्ञानानुत्पत्त्या तदभावप्रयुक्त एव गजइव गच्छतीत्येतद्वाक्यार्थबोधाभा
वो न तु बाधबुद्धिप्रतिबंधकताप्रयुक्त इति न दोषः। एवं च सति मन्मते त्वदुक्तबाधज्ञानस्य जनकज्ञानविघटकतया

© Dharmartha Trust J&K. Digitized by eGangotri

नगजसदृशइतिज्ञानस्यचग्राह्याभावावगाहितयागजइवगच्छतीत्येतद्वाक्यार्थबोधेप्रतिबंधकत्वमुपपद्यतइति
बाधद्वयकालेप्युक्तशाब्दबोधानुत्पत्त्यनुभवसमर्थनं।त्वन्मतेतुशाब्दबोधस्यगजगमनसदृशगमनेत्या
दिरूपतयातत्रगजगमनसदृशंगमनमितिबाधज्ञानस्यप्रतिबंधकत्वसंभवेपिगजसदृशोनेत्यस्मदुक्तबाधज्ञा
नस्यप्रतिबंधकत्वासंभवादन्यतरानुभवविरोधइतिफलितार्थः।अतएवयथात्वन्मतेधर्मिसादृश्यानुपपत्त्याध
र्मसादृश्यानुपपत्त्याधर्मिसादृश्यभाननियमइतिउभयानुभवरक्षार्थमाशंकतेनचेति।एवंचगजगमनसदृश
गमनेत्यादिशाब्दबोधात्।एवंगजगमनसदृशंगमनमितियोग्यताज्ञानस्यावश्यंसत्वात्ततत्सत्वेचपुरुषोग
जसदृशइत्यस्यापिज्ञानस्योक्तरीत्यासत्वात्पूर्वंपुरुषोनगजसदृशइतिबाधधीसत्वेचधर्मिसादृश्याभावेधर्म
सादृश्यस्याप्यभावेनगजगमनसदृशंगमनमितिज्ञानासंभवात्त्वदभिमतबाधज्ञानस्ययोग्यताज्ञानविघटकत
यागजगमनसदृशंनगमनमित्यस्मदभिमतबाधज्ञानस्यचग्राह्याभावावगाहनविधयागजइवगच्छतीत्येत

© Dharmartha Trust J&K. Digitized by eGangotri

द्वाक्यार्थबोधंप्रतिएकस्यजनकज्ञानविघटकतयाएकस्यचविरोधिविषयकतयेतिबाधद्वयस्यापिप्रतिबंधकत्वसं
भवादुभयानुभवसमर्थनंसुघटमितिभावः।एतद्दूषयति।धर्मेति।नियमाभावादिति।मगनायिकयोःसाम्याभा
वेपितन्नेत्रसाम्यांगीकारात्।ननुधर्मसादृश्यंविनाधर्मिसादृश्यवत्धर्मिसादृश्यंविनाधर्मसादृश्यमप्यनुपपन्नं
मेवेत्याशंकांनि[illegible]मपाकर्त्तुमाह।नहीति।व्याघातेति।उपपत्तिव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगीह्युपपादकः
तद्व्यतिरेकप्रयोज्यव्यतिरेकप्रतियोगीचोपपाद्यः।तदुक्तंन्यायकुसुमांजलावाचार्यचरणैः।यत्प्रतियम्यस्यनायु
क्तिर्नानियंतोपपादकइति।परस्परस्यपरस्परोपपाद्यत्वेचैतदनुपपन्नं।नहिपीनत्वेनरात्रिभोजनमिवरात्रिभो
जनेनपीनत्वमपिकल्प्यतइतिभावः।ततश्चगजसदृशोनेतिज्ञानस्यजनकज्ञानविघटकत्वविधयागमनसदृ
शागमनेत्यादिबोधंप्रतिप्रतिबंधकत्वंनसंभवतीतित्वन्मतेऽन्यतरानुभवविरोधः।मयानुभवद्वयस्यैवोक्तविध
यासमर्थितत्वादितिफलितार्थः।एवंगजइवगच्छतीत्यैतद्वाक्याद्गजसादृश्यगजगमनसादृश्योभयप्रतीत्युपपा

© Dharmartha Trust J&K. Digitized by eGangotri

अलंकारस्री ॥६८॥ 68

रनानुरोधादपिसादृश्यस्यकर्त्र्येवान्वयोयुक्तइत्याह। अतइति। गजसदृशोगच्छतीतिशाब्दबोधाभ्युपगमेग
जसादृश्यस्यपश्चाद्गजगमनसादृश्यस्यचतदाक्षेपेणोपपत्त्याप्रतीतिद्वयसमर्थनम्। तन्मतेतुगजगमनेसा
दृश्यान्वयस्वीकारात्गजसादृश्यप्रतीतिसमर्थनंनसंभवतीतिभावः। ननुमाभूदाक्षेपेणगजसादृश्यसिद्धिः। मा
नसादेवतद्ग्रहसंभवात्। सत्यं। तथापिनियताप्रतीतिर्नस्यादित्यत्रतात्पर्यं। प्राक्मात्रमिति। तथाचपूर्वपदेति
नामेवानुमतमित्यर्थः। अनुचितएवेति। उक्तस्थलेज्ञानस्योपमेयत्वाभावादितिभावः। इदंचाभ्युपेत्योक्तं। वस्तुतः
पूर्वोक्तकार्यकारणाभावानुरोधेनसादृश्यस्यधात्वर्थान्वयोनुचितएवेतितात्पर्यम्। ननुगजपदस्यगजगमनल
क्षणयागजगमनसदृशगमनानुकूलकृतिमानितिबोधवादिनामस्मन्नामेदंदूषणम्। गजसादृश्यप्रयोजकग
मनेन्यादिबोधवादिनांसादृश्यस्यप्रयोजकत्वसंबंधेनगमनान्वयमुरीकुर्वतांरसगंगाधरकृतांकिंदूषणमभिहि
तंतेषांगजसादृश्यबोधस्यनिर्वाहादितिचेत्। उच्यते। एकंतावदुक्तमेवधात्वर्थेसादृश्यस्यान्वयानुपपत्तिरूपम्। ॥राम:॥

॥६९॥

© Dharmartha Trust J&K. Digitized by eGangotri

परंच गजसादृश्यगजगमनसदृशगमनान्यतरशाब्दबोधस्यानुपपत्तिरूपं तत्। तन्मते गजसादृश्यप्रयोजकत्व
स्यैवशाब्दबोधविषयत्वात्। अन्यदपि एवंकि संशयनिवृत्त्यर्थं नुपपत्त्यादिकमप्यवधेयम्। नह्युक्तवाक्यार्थ
बोधाद्गजसदृशो न वेति संशयनिवृत्तिः संभवति गजसादृश्यस्य तद्रीत्या पुरुषविशेषणत्वानवगमात्। गजसदृ
शो नेति बाधज्ञानस्य एतद्वाक्यार्थबोधप्रतिबंधकत्वं च न स्यात्। एतद्ग्राह्यविरोधिविषयकत्वविरहात्। एवं उक्त
शाब्दबोधात् गजसदृशो नेति बुद्धिप्रतिबंधोऽपि न स्यात् इति स्पष्टमेव। किंच। मृगो न भीमः कुचरो गिरिष्ठाः परावत
आजगंथा परस्याः। सृकं संशाय पविमिंद्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्वेति वाजसनेयके मंत्रः पठ्यते। अत्र
सिंहेन इंद्र उपमीयते। नशब्दस्य वेदे इवपदवदुपमार्थकत्वात्। नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्याय
मिति निरुक्तकृताभिधानात्। अन्वध्यायं वेदे तु उभयं निषेधार्थकत्वं सादृश्यार्थकत्वं चेत्यर्थः। कुचरः पृथ्वीसंचरणात्।
यद्वा क्वायं न चरतीति कुचरः। देवतायाः प्रभावातिशयेन सर्वत्र वर्त्तमानत्वात्। सिंहस्यापि स्ववीर्याहंकारेण तथात्वा

© Dharmartha Trust J&K. Digitized by eGangotri

अलंकारकौ॰टी॰
६९
69

तृ॰ गिरौ पर्वते तिष्ठतीति गिरिष्ठः। परावत्तह्रति ह्रर नाम छांदसं। आ अगंथ आगन्तासि। स्वकं प्रसरणशीलं तीक्ष्णं
तीक्ष्णां पविं वज्रं संशाय सम्यक् निशातीकृत्य शत्रून् वितादिमारय वीत्युपसर्गस्य ताडीति क्रिययान्वयः।
अवहितत्वेति। छांदसस्त्वेणतथाप्यनुज्ञानात्। एवंमस्त्वोविनुदस्त्वेत्यत्रापि। अत्रतावन्नि(?)हे भगवता महर्षिणाया
स्केनवेदभाष्यकारादिभिश्चाभियुक्तैः। भीमादिविशेषणानामिंद्रसिंहोभयान्वितोर्थो व्याख्यातः। तत्र भीमादिभिर्धर्मैः सिंह
सदृशस्त्वमागच्छसीति बोधे सादृश्यस्यचेंद्र एवान्वयोवगम्यते। स्वद्रीत्यादौ तु सिंहसादृश्यप्रयोजकागमनेत्यादिबोधस्वी
कारे कुचरादिपदानां सिंहान्वितार्थपरत्वोक्तिरनुपपन्ना स्यात्। अतस्तत्रोपमेयएवतदन्वयकल्पनस्यावश्यकतयान्य
त्रापि तथैवयुक्तम्। वैषम्ये बीजाभावात्। इत्यादिकं स्फोरयन्नाह। दिशिति॥ ॥इति वाक्यार्थबोधप्रकरणम्॥ ॥।
यथाशाब्दस्येति। स्यादिवयथादियोगइतिकारिकापाठाभिप्रायेण। इवपदादिति पाठेतु यथाशब्दोप्यादिपदसंग्राह्यः।
वृशवृटीनामित्यादिपराहृकारादिसंग्रहः। इवार्थवतेः स्वरूपेणोपादानात्। प्रत्ययाइति। स्वातंत्र्येणसदृशादिश

© Dharmartha Trust J&K. Digitized by eGangotri

द्वत्प्रयोगवारणार्थं।तेषांसादृश्यार्थत्वाभावमाशंकते।तेचयद्यपीति।ईषदसमाप्तोक्तस्यबृहदेश्यदेशीयरइतिसूत्रेणेत्य
र्थः।सामर्थ्यादिति।ईषदसमाप्तत्वेनकिंचिद्वैलक्षण्यलाभात्तेनचात्यंतसाम्यस्यलाभइतिकैयटस्याशयः।सादृश्यार्थकत्वा
भावपक्षंकांमध्यएवसमाधायप्रत्ययत्वकथनप्रयोजनमाह।तत्रेति।प्रत्ययानामिति।वतिप्रत्ययकल्पबादिप्रत्ययानामित्यर्थः।
यद्यपिवतिप्रत्ययोपितद्धितसंज्ञएवतथापितस्याव्ययसंज्ञायाःप्रपिसत्वात्कल्पादिभ्योवहिःकृत्यइवादीनांकल्पबादीनांच
मध्येप्रदानात्।इवादिवदव्ययत्वंकल्पबादिवत्तद्धितत्वंचायास्यतीतिलाघवार्थंपृथगभिधानं।समासादिपदानांचंद्रेणसममिति
वाक्येनचंद्रसममितिसमासेनचप्रयोगान्निभादावपितथाभ्रमोमाभूदित्यभिप्रायेणाह।निभादीनांत्विति।विग्रहइति।अवि
ग्रहोऽस्वपदविग्रहोवानित्यसमासइतिसिद्धांतात्अविग्रहमिति।तस्यविग्रहेणविवरणमेवनकार्यमित्यर्थः।अस्वपदेति।स
मासांतर्गतपदेनविग्रहोनकर्त्तव्यःकिंतुतदर्थकपदांतरेणेत्यर्थः।तदाह।चंद्रेणसममिति।नभवतीति।समासंविनाकेवलनिभ
पदस्यासाधुत्वेनप्रयोगानर्हत्वादित्यर्थः।आदर्शमिति।विभ्राडित्यनुवाकेसूर्यस्तुतिरितितद्विषयकरत्यंगत्वादत्रोपमायाअलंका

© Dharmartha Trust J&K. Digitized by eGangotri

70

रकत्वं। वीत्यस्य अदभ्रमित्यत्रान्वयः। छंदसि परेपि व्यवहिताश्चेति सूत्रात्। केतवः प्रधानभूता अस्य सूर्यस्य रश्मयः किरणा ज
नेषु विशेषेण दृश्यंते। ज्वलंतोग्नय इवेत्यर्थः। अत्र भ्राजनं प्रकाशार्थं तथा सामान्यधर्मः। प्राचीनैरिति। इवेन सह नित्यस
मासविधानात्। तत्प्रयोगे उपमायाचाक्यगतत्वोदाहरणविरोधादिति तेषामाशयः। अन्यथेति। वामन इवेत्यस्येवमेव प्रयो
गापत्तेः। जीमूतस्येति। जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे। अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महि
मा पिपर्त्विति मंत्रः। वर्मी कवची समदां शत्रूणां उपस्थे संनिधाने यदा याति गच्छति तदा तस्य वर्मिणो जीमूतस्य मेघस्येव
प्रतीकमंगं भवति। नीलमेघ इव दृश्यत इत्यर्थः। अनाविद्धया वैरिप्रहरणैरक्षतया तन्वा देहेन त्वं जय शत्रून्स प्रसि
द्धो वर्मणः कवचस्य महिम्ना शस्त्रक्षतप्रतिबंधकत्वरूपस्त्वां पिपर्तु पालयतु परशस्त्रेभ्य इत्यर्थः। समासेनेति। जीमू
तस्येवेति पदद्वयाभावच्छेदेनेत्यर्थः। असमासेति। पृथक्पदद्वयपाठादित्यर्थः। समासस्य नित्यत्वे तु पृथक्पदद्वयपाठो
न स्यात्। समासे पूर्वपदे पृथग्ग्रहाऽकरणात्। अवांतरपदसंज्ञा नेकत्वे उत्तरकालप्रवृत्तिकामेव पदसंज्ञायामाद

राम:

© Dharmartha Trust J&K. Digitized by eGangotri

या॰ वग्रहः क्रियत इति वैदिकसंकेतप्रदायारेत्तदभिप्रायेणैव भीष्मचंडकरमंडलभीष्मज्वालसंसरणतापितमूर्त्तेः प्रावृषे
ण्य इव वारिधरो मे वेदनां हरतु रश्मिवरेण्यः इति वाक्यगतपूर्णोपमायां रसगंगाधरे प्युदाहृतत्वादिति भावः। यथैते
षाम्टषीणामेव प्रस्कण्वस्य शरणमुद्धानमिति निरुक्तमाश्रित्यार्थमाह। प्रियमेधादीनामिति। आदिपदेन अत्रिविरूपां
गिरःसंज्ञकानां मुनीनां ग्रहणं। अंगिरस्वदित्यत्र अंगिरोवदिति वक्तव्ये अयस्मयादीनि छंदसीति भसंज्ञत्वाद्रुत्वाद्यभा
वः। जातवेद इत्यग्निसंबुद्धिः। प्रस्कण्वो नाम कण्वपुत्र ऋषिविशेषः। प्रस्कण्व हरिश्चंद्रावृषी इति निपातः। अत्राग्निवि
षयकप्रस्कण्वनिष्ठरत्याख्यभावोत्कर्षे तया उपमाया अलंकारत्वे। नक्षत्रेति। सेव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिके
रित्यमरः। नक्षत्रमाला मुक्तावलीविशेषः। मेरुपक्षे समुदितानक्षत्राणां तारकाणां माला पंक्तिर्यत्रेत्यर्थः। यदुक्तमिति।
काव्यप्रकाशकृतेति शेषः। रसादीति। आदिपदेन भावरसाभासभावाभासभावोदयभावसंधिभावशबलत्वानां संग्र
हः। सर्वत्रेति। तदभावे चमत्कारविरहेण काव्यत्वानुपपत्तेरित्यर्थः। तदनादरेति। रसादिरूपव्यंग्यप्राधान्यं न विवक्षितं। किं

© Dharmartha Trust J&K. Digitized by eGangotri

71

तुतद्रतिरिक्तव्यंग्यराहित्यमेवेत्यर्थः।ननुरसाद्यतिरिक्तमपिव्यंग्यंतत्रास्त्येवेत्यतआह।व्यंग्येति।तथाचरसाद्यतिरिक्तचम
त्कारजनकव्यंग्यराहित्यमेवचित्रत्वमितिभावः।एवमेतन्मतेरसादीनांचित्रत्वप्रयोजकाभावप्रतियोगिताबहिर्भावउ
क्तः।संप्रतिरसादीनामपिविशिष्टाभावंचित्रस्थलेयेसमानयंतितन्मतमाह।केचित्त्विति।तात्पर्येति।तथाचतत्ररसादि
रूपव्यंग्यराहित्याभावेपिरसादिव्यंग्येतात्पर्यविषयत्वरूपविशेषणाभावेनतात्पर्यविषयीभूतव्यंग्यराहित्यमस्त्येवेति
भावः।तदुक्तमिति।ध्वनिकृतेतिशेषः।षष्ठ्यर्थेति।तत्प्रकारकबोधंप्रतिनामजन्योपस्थितेर्हेतुत्वकल्पनात्।सप्तम्यर्थेति।
यद्यपिनैयायिकमतेवृत्तित्वमेवसप्तम्यर्थोनतुआधारत्वंभूतलवृत्तिर्घटइतिबोधस्यतैरभ्युपगमात्।तथापिप्राचीनम
ताभिप्रायेणेदं।अधिकरणत्वस्यसप्तम्यर्थस्यनिरूपकत्वसंबंधेनघटादावन्वयस्यतैरंगीकारात्।नव्यमतेआधारत्वमा
धेयत्वमित्येवव्याख्येयम्।उभयथापिसामान्यधर्मप्रयोगावश्यकत्वेतात्पर्यमिवेप्रतिकृताविति।तथाचतस्यइवार्थवि
हितत्वेनतादृशवतिप्रत्ययवत्तत्प्रयोगेउपमाश्रौतीस्यादित्यर्थः।एतादृशेति।शिलायंत्रवच्छिलेयंदधिशिलायाढ्इतिढप्र

© Dharmartha Trust J&K. Digitized by eGangotri

स्यः दृढमित्यर्थः। पुंडरीकमिव पौंडरीकं मुखमित्यत्रापीत्यर्थः। तत्रापि कठिनत्वरम्यत्वादि धर्मप्रयोगविरहे एतद्बोध्यमिति
ति। धर्मलुप्तास्यादित्यर्थः। तद्भूतपरत्वाभावेति। निपातातिरिक्तनामार्थत्वेन भेदेनान्वयासंभवादित्यर्थः। पर्यवस्यतीति। ध
र्मार्थकशब्दस्य धर्मिपरत्वादित्यर्थः। इवादीति। इवाद्यर्थेत्यर्थः। धर्मलुप्ताविभागस्य न्यूनत्वमाशंकते। यत्विति। प्रकारे इति।
प्रकारे सादृश्ये विवक्षिते गुणवाचकशब्दस्य द्विर्भावो न भवतीति सूत्रार्थः। वाक्यगेति। पदद्वयरूपत्वादिति भावः। ननु समा
सत्वेनैकपद्ये समासगतधर्मलुप्तायामेव तदंतर्भावः स्यादित्यत आह। नापीति। पटुपटुरित्यादावपीति। पटुपटुः स्त्रीत्यादा
वित्यर्थः। एवं च यथा समासस्येत्यादिषु अंतोदात्तत्वादिविधायकसूत्रेषु आतिदेशिकसमासे पि गृह्यते तद्वदत्रापि मुख्य
समासस्यैव ग्रहणे बीजाभावादित्यर्थः। चित्रमीमांसाकारमतं दूषयित्वा रसगंगाधरकारमतमाह। वैयाकरणसंमतमिति
शेषः। × केचित्त्विति। भाष्यकैयटेति। वाचकत्वे संमते हि द्योत्य इति व्याख्यानं विरुध्येतेति भावः। द्योतकत्वपक्ष इति × सवा
चको विशेषाणां संभवात्तद्द्योतको पि वेति वाक्यपदीयोक्तेः। सहकारित्वेति। तात्पर्यग्राहकविधयेति शेषः। तद्वाचकत्वस्येति।

© Dharmartha Trust J&K. Digitized by eGangotri

72

तद्बोधकत्वस्येत्यर्थः। तथाच तत्रैकपदस्य सादृश्ये लक्षणाद्विर्भावश्च द्योतक इत्यवश्यमाश्रयणीयमित्यर्थः। अत्र दीक्षितै
र्धर्मलुप्ताधिक्यमापादितमेतैस्तु द्विलुप्ताधिक्यमिति काव्यप्रकाशकारोपरि द्वयोरप्ययमाक्षेपस्तुल्य एवेत्यभिसंधाय
उभयथापि नाधिक्यमित्याह। यदीति। तथाच प्राचीनकृतविभागस्यैतेतदनुक्त्या न्यूनत्वमिति भावः। लब्धास्वादेन चिरंसु
खं दीपशिखाहृते निशाचरपतिना। सीता राक्षसवसतिं दृष्टिविषग्रहं विषौषधीव उपनीता। विषौषधीवेत्यत्र पक्षे इव पदेन
सह समासः। सेतुकाव्ये विभीषणं प्रति श्रीरामवाक्यं। एवं च यथा सर्पग्रहे विषौषधीसंबंधे तेषामनिष्टं तथा सीतानय
नेन राक्षसानामपि भविष्यतीति भावः। साधर्म्यमिति। स्वविरोध्यनिष्टहेतुत्वरूपमित्यर्थः। न चात्र राक्षसवसतिदृष्टिवि
षग्रहयोर्बिम्बप्रतिबिंबभावोप्यस्तीति कथं धर्मलोप इति वाच्यं। तस्य तत्सादृश्यानुपपादकत्वात्। आजिघ्रति स्पृश
ति चुम्बति स्थापयति हृदये जनितरोमांचः। जायाकपोलसदृशानि पथिको बंधूकपुष्पाणि। गाथाकोषे कस्यचिद्विरह
वस्थावर्णनं। क्रियासाम्य इति। तेन तुल्यं क्रिया चेद्वतिरिति सूत्रेण क्रियानिष्ठत्वेनैवोपमेयत्वस्य बोधनादिति भावः। ननु

© Dharmartha Trust J&K. Digitized by eGangotri

न्वेवं सर्वग्रंथेषु तुल्यार्थकवतियोगेनामार्थस्य उपमेयत्वकथनमसंगतमयुक्तं च। वत्यर्थसादृश्यस्य क्रियायामेवान्वय
स्य वाच्यत्वात्। तथा च वैयाकरणाः। संबोधनांतं क्त्वोर्थाः कारकं प्रथमो वतिः। धातुसंबंधाधिकारनिःपन्नमसमस्तनञ्
तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयं साधुत्वमष्टकस्यास्य क्रियये वावधार्यतां। अस्यार्थः। संबोधनांतस्य क्रियायामेवा
न्वयः। ब्रूहि देवदत्तेति। एकतिङ् वाक्यमिति कात्यायनोक्तेः। एवं च समानवाक्ये निघातयुष्मदस्मदादेशा इत्येकवाक्यवि
हितः तिङ् तिङ इति निघातः सिध्यति। तदुक्तं हरिणा। संबोधनपदं यच्च तत्क्रियाया विशेषणं। व्रजानि देवदत्तेति निघा
तोत्र तथा सति। क्त्वोर्थानामपि क्रियायामेव संबंधः। यथा सकृत्पचति द्विः पचति। पंचकृत्वा पचतीत्यादि। संख्यायाः
क्रियाभ्यावृत्तिगणने कृत्वसुच् इति वचनेन क्रियायोग एव तदनुशासनात्। एवं कारकस्यापि तस्यामेवान्वयः। करोती
ति कारकमित्यन्वर्थसंज्ञाविज्ञानात्। तंडुलं पचतीत्यादौ क्रियान्वयान्वयाभावे कारकत्वानुपपत्तेः। प्रथम इति। तेन तुल्य
मित्यनेन विहितो वतिः प्रत्ययः। तस्यापि क्रियायामेवान्वयः। यत्तुल्यं सा क्रिया चेदित्यभिधानात्। यथा देवदत्तवत्पठतीत्या

© Dharmartha Trust J&K. Digitized by eGangotri

दौ चैत्रवत्सुंदर इत्यादावप्यनुशासनानुरोधात्साधुत्वार्थमध्याहृतभवतीत्यादिक्रियायामेव तदन्वयः। धातुसंबंधे प्रत्यया इत्यधि
कृत्य विहितानां तुमुनादीनामपि क्रियायामेव संबंधः। यथा भोक्तुं पचतीति। पातुं जलमित्यादौ अध्याहृतानेयादिपदबोध्या
यामानयनादिक्रियायामेव तदन्वयः। असमस्तनञोपि न त्वं पचसीत्यादौ क्रियानिषेधस्यैव बोधात्तत्रैवान्वयः। घटो ना
स्तीत्यादावपि घटास्तित्वप्रतियोगिकाभावबोधाभ्युपगमात्। यस्य च भावेन भावलक्षणमित्यनेन विहिता सप्तमी गोषु
दुह्यमानासु गत इत्यादौ तस्या अपि भावेनेति क्रियार्थकभावपदानुरोधात्तत्रैवान्वयः। एवं षष्ठी चानादर इति सूत्रेण वि
हिता षष्ठी रुदति रुदतो वा प्राव्राजीदित्यादौ तस्या अपि क्रियायामेवान्वयः। चकारेण यस्य च भावेनेति पूर्वसूत्रांशानुकर्ष
णात्। आस्तामप्रकृतमन्यत्। वतिप्रत्ययस्य तु नामार्थान्वयः कथं। अत एव पर्वतो वह्निमान्महानसवदित्यत्र दृष्टांतवाक्योपात्तवत्य
र्थस्य पक्षीभूते पर्वतादावप्यन्वयोनुपपन्न एव। अत एव वह्निमान्भवितुमर्हतीति क्रियापदयुक्तमेव प्रतिज्ञां सांप्रदा
यिकाः कुर्वंति। यदि त्वनुशासनमप्यवधूय वत्यर्थस्य नामार्थान्वयोभ्युपगम्यते। तर्हि पुष्पेभ्य इत्युक्ते स्पृहयतीत्यध्या

हारेपि। न स्यात्। न चेष्टापत्तिः। तत्र साधुत्वार्थं तदध्याहार आवश्यक इति त्वत्सिद्धान्तात्। एतदप्युक्तं भवति। यदिप
क्षेपि वृत्त्यर्थकारकं वा नञादिषु। अन्वेति त्यज्यतां तर्हि चतुर्थ्यास्तद्धितस्यानेति वैयाकरणभूषणे। अत एव क्रियावि
शेषणत्वाद्वतिप्रत्ययस्याऽसत्त्ववाचकार्थाभिधायकत्वेनैवाव्ययत्वसिद्धौ वतेरव्ययमध्ये पाठो न कर्त्तव्य इति भाष्यकैय
टयोर्व्यवस्थापितमिति चेत् सत्यं। पर्यवसाने पुनस्तद्वतोरेव सादृश्यं फलतीत्यभिप्रायेणोक्तग्रन्थानां तदविरोधः संपा
दनीयः। अत एव स्थानिवदादेशो नाल्विधौ असिद्धवदत्राभादित्यादौ सादृश्यान्वयो नामार्थेहिव पर्यवसितमाद्ये
वप्रतीयते। वस्कृतस्कृतेन तुल्यमिति सूत्रे महाभाष्यकारैः क्रियेति प्रकृत्यर्थविशेषणं प्रत्ययार्थविशेषणं वेति प
क्षद्वयं व्याख्यातं। येन तुल्यं सा क्रिया चेत् यत्तुल्यं सा क्रिया चेदिति सादृश्यप्रतियोगिनः क्रियात्वविवक्षायां आद्य
स्य सादृश्यानुयोगिनः क्रियात्वविवक्षायां द्वितीयस्य पक्षस्य समुल्लासात्। तत्राद्यपक्षे प्रत्ययार्थस्य सादृश्यानुयो
गिनः क्रियात्वेन विशेषणं नास्तीति तृतीयासमर्थात् क्रियावाचिनो गुणतुल्ये प्रत्ययः स्यात्। यथा पुत्रेण तुल्यः स्थूलः

© Dharmartha Trust J&K. Digitized by eGangotri

74

स्यादेः द्वितीयपक्षे त्वनुसारस्य प्रतियोगिनः क्रियात्वविशेषणं नास्तीति तत्तीयासमर्थात्तत्क्रियावाचिनोपि क्रियातुल्ये
प्रत्ययः स्यादित्याशंक्य। तुल्यपदमहिम्ना प्रकृत्यर्थप्रत्ययार्थयोर्द्वयोरपि विशेषणसिद्धेः। तथाहि। यदा तावत्क्रिय
या प्रकृत्यर्थो विशेष्यते तदा प्रत्ययार्थस्य क्रियात्वलाभः सामर्थ्यात्। यदा तु क्रियया प्रत्ययार्थो विशेष्यते तदा प्रकृ
त्यर्थस्य क्रियात्वलाभः सामर्थ्यादिक्रियायाः क्रियासादृश्यानुपपत्तेरिति। तत्र प्रत्ययार्थविशेषणपक्षे क्रियायाः
साध्यस्वभावत्वेन तस्यां विधीयमानो वतिरसत्त्वभूतार्थाभिधायकत्वेन लिंगसंख्यानन्वयात्स्वयमेव यन्न व्येतीति तद
व्ययमिति लिंगसंख्यानन्वयित्वमव्ययत्वमिति लिंगसंख्यानन्वयित्वमव्ययत्वमिति लक्षणयोगादव्ययत्वं प्रतिपद्यत
इति तदर्थं तद्ग्रहणपाठो न कर्त्तव्यः। वतिना च क्रियासामान्यस्यैवाभिधानात्पचतीत्यादि क्रियाविशेषप्रयोगः। प्रकृ
त्यर्थविशेषणपक्षे तु क्रियाग्रहणेन क्रियावत उपलक्षणे क्रियाद्वारकं क्रियावतः सादृश्यमाश्रयणीयं। तच्च क्रिया
वान्प्रत्ययार्थः। ततो लिंगसंख्यावदर्थाभिधायकत्वादव्ययत्वं वतेर्न प्राप्नोतीति तदर्थो वतेः पाठो व्ययमध्ये कर्त्तव्यः। पा

रामः

© Dharmartha Trust J&K. Digitized by eGangotri

ठ सामर्थ्यात्तु स्वत्ववाचित्वेऽप्यव्ययसंज्ञेति स्पष्टं कैयटे। ततो द्वितीयपक्षाभिप्रायेण तस्य नामार्थान्वयोक्तिरित्यलमतिब
हुना। एवं बहुच्प्रत्यययोगेऽप्यार्थी धर्मलुप्तोदाहार्या। कल्पबादितुल्यार्थकत्वात्। यथा इन्दुमुखं बहुत्तरस्यं तवयद्र
णं तिनैनं मृगरूपआति तन्मृगतृष्णयेव। अस्येति। मोहमहिमानहिमांशुबिंबलक्ष्मीविडंबिमुखबहुत्तिषु पाशवीषु।
तृणेन सदृशं बहुतृणं। विभाषा सुपो बहुच् पुरस्तात्त्विति सादृश्यार्थक बहुचः पूर्वप्रयोगः। तदसंभवादिति। न केवला प्र
कृतिः प्रयोक्तव्या न केवलः प्रत्यय इति प्रकृतिविनिर्मुक्तप्रत्ययमात्रस्य प्रयोगानर्हत्वादिति भावः। काव्यप्रकाशकारे
ण विचारसौलभ्याय तदुदाहरणमेवोपन्यस्यति। सकलेति। सकलकरणपरविश्रामश्रीवितरणं सरसकाव्यस्य।
दृश्यते अथवा नश्रूयते सदृशं अंशांशमात्रेण। लाघवादाह। अत्रैवेति। वस्यमाणपरितोषादाह। काव्यप्रकाशकृ
दिति। अथ रामभट्टाचार्यव्याख्यानेन समाधिमाह। अत्राहुरिति। कथमिति। अप्रसिद्धप्रतियोगिकनिषेधस्य निरूपणा
भावादित्यर्थः। विरोधादिति। सादृश्यमुपमाभेदे इति भेदगर्भसादृश्यस्यैवोपमात्वादित्यर्थः। महेश्वरीत्या समाधि

© Dharmartha Trust J&K. Digitized by eGangotri

75

माह। अन्येत्वीति। लाक्षणिकमिति। सादृश्याश्रयस्यैव तद्वच्चात्तया सादृश्यप्रतियोगित्वलक्षणेत्यर्थः। यादृशेति। उपमा
नतावच्छेदकरूपावच्छिन्नोपमानबोधके इत्यर्थः। न च सदृशेति। नहि चंद्र इवेत्यस्माद्यथा साम्यप्रतीतिस्तथा सदृश इवेत्य
स्मात् विशिष्य उपमानतावच्छेदकानुपस्थितेरित्यर्थः। तथा चोपमानत्वातिरिक्तप्रकारेण तदुपस्थापकपदप्रयोग एवा
त्रोपमानप्रयोगो विवक्षित इति भावः। पदाभावेनेति। सादृश्यविशेष्यकबोधजनकपदाभावेनेत्यर्थः। सदृशपदस्येति।
लक्ष्यलक्षतावच्छेदकोभयसाधारणसादृश्यार्थकत्वसत्त्वादित्यर्थः। श्रौतत्वमिति। सादृश्यप्रतियोगिता यत्र शब्देन बुध्य
ते तत्रैव श्रौतीत्येतन्मतव्यवस्थापनात्। निरवेष्टापत्तिः। उपमानलुप्ताया आर्थत्वनियमस्वीकारादित्यर्थः। उपमानेति। उ
पमाननिष्ठविशेषणताऽनिरूपितविशेष्यताशालित्वादित्यर्थः। प्रकृते चेति। सादृश्यप्रतियोगिताश्रयस्योपमानपदा
र्थतया प्रतियोगितायाः पदार्थतावच्छेदकतया उपमानविशेषणतापन्नत्वादित्यर्थः। सर्वत्रास्वरसं सूचयन्मतांतरमा
वतारयति। काव्यप्रदीपेति। एतदभिप्रायविवरणद्वारेण पूर्वोक्तास्वरसं विशदयति। तस्यायमिति। उपमानलुप्ताया आर्थ

रामः

७५

© Dharmartha Trust J&K. Digitized by eGangotri

त्वनियमभंगभयेन पक्षोपमाननु मत्त्वमिति परैरिष्टापत्तिर्न कर्तुं शक्यते तत्राहृत्योदाहरणमाह। रक्षांसीति। अनर्घ्यराघव
नाटके विद्याधरस्य विद्याधरांतरं प्रत्युक्तिः। ननु अग्निं स्तुहरिभ्यश्चेति वार्त्तिकेन संपूर्वकात्स्नुणोतेरकर्मकत्वत्वात्मने
पदस्यानुशासनादत्र संश्रणुमह इत्यात्मनेपदमनुपपन्नं। रक्षांसीति। कर्मणः प्रयोगः सत्वात्। सत्यं प्रमाद एवायमिति के
चित्। अन्ये तु कथयद्ध्वा इत्यध्याहृत्य रक्षांसीत्यस्यैतत्रैवान्वयं कल्पयित्वा रक्षसां कर्मत्वाविवक्षया आत्मनेपदं समर्थयंते।
न च तथापि कर्मणः सत्वात्कथमकर्मकत्वमिति वाच्यं। अविवक्षितकर्मकत्वस्यैवात्राकर्मकत्वात्। वस्तुतः कर्मभावस्य
सकर्मकेष्वसंभवात्। तदुक्तं। धातोरर्थांतरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोकर्मिका क्रियेति। भारं व
हतीत्यत्र सकर्मकत्वेपि नदी वहतीत्यत्राकर्मकत्वं। अर्थांतरे स्पंदरूपे धातोर्वृत्तेः। जीवतीत्यत्र धात्वर्थांतर्भूतकर्मत्वात्। जी
वप्राणधारण इति धारणकर्मीभूतस्य प्राणस्य धात्वर्थांतर्भावात्। प्रसिद्धेरिति। मेघो वर्षतीत्यादौ जलस्य तत एवला
भात्। अविवक्षेति। नेह गम्यत इत्यादौ भावे लकारात्। अतः साक्षात्कर्मसंबंधाभावात् विनाप्यध्याहारं आत्मनेपदं समर्थ

९ वस्तुतस्तु प्रकृते रक्षांसीत्यस्य प्रथमांतत्वस्य सर्वसंमतत्वात्। तानि संतीति वाक्यार्थस्य कर्मत्वं कल्पनीयमेव ९

© Dharmartha Trust J&K. Digitized by eGangotri

76

यितुं शक्यं । अविद्यमानकर्मकत्वस्य त्वन्मतेऽपि बाधात् । अभूयमाणकर्मकत्वस्य च ममापि सत्त्वादिति न कोऽपि दोषः । कर्म
समोऽलं कर्मीणः इत्यमरः । तथा च जगत्त्रयविषयद्रूपकर्मक्षमे इत्यर्थः । यथाश्रावद्घटितमुक्ताद्वयशब्दघटितमाह । त्वमि
वेति । नैषधे भैम्याः कामोपालंभः । स्वमदहो दहनाज्ज्वलनाज्ज्वलयितुं परिरभ्य जगंति यद्यस्युत्तरार्द्धे । अत्राप्युपमानलुप्त
त्वस्वीकारे तु इवादिपदसत्त्वात् श्रौतत्वं स्यादिति भावः । यद्वक्ष्यति । अथ कथंचिदित्यादि । अत्र ददृशे शुश्रुवे इत्युभयत्र
कर्माख्यातस्य सविषयकार्थधातूत्तरवर्त्तित्वेन लक्षणया विषयत्वं अर्थः । त्वंपदार्थस्य कामस्य प्रतियोगितया इवपदा
र्थसादृश्येऽन्वयः । तस्याश्रयतया कोऽपीतिपदार्थेऽन्यस्मिन् आख्यातार्थविषयत्वस्य प्रतियोगितया नञर्थाभावे तस्य
विशेषणतया अन्यपदार्थे इति पदार्थान्वय इति नैयायिकमते । प्रथमांतविशेष्यकबोधस्वीकाराद्द्वेधाकारमाह । तथा
चेति । वेदेऽपीति । अपिशब्दान्नदेवेषु न यक्षेषु तादृग्रूपवती क्वचित् । मानुषेष्वथ तान्येषु दृष्टपूर्वाथवा श्रुतेति भैमीपरं म
हाभारतमवधेयं । कामवृत्तीति । त्वंपदार्थस्य कामस्यानुयोगितासंबंधेन इवार्थसादृश्ये तस्य च प्रतियोगितासंबंधे

रम:
७६

© Dharmartha Trust J&K. Digitized by eGangotri

नअन्यस्मिन्नितिरोस्येतिभावः। चंद्र इवेत्यादौ सादृश्यनिष्ठविशेष्यतानिरूपितप्रकारतायां प्रतियोगितायाएवसा
दृश्यनिष्ठविशेषणतानिरूपितविशेष्यतायां चानुयोगितायाएवसंसर्गत्वमितिसर्वानुभवसिद्धत्वात्। प्रकृ
तेचकामनिष्ठविशेषणतायां सादृश्यनिष्ठविशेष्यतानिरूपितायां आधेयत्वस्यसंसर्गत्वं सादृश्यनिष्ठविशेष
णतानिरूपितान्यनिष्ठविशेष्यतायांचप्रतियोगित्वस्येतितद्विरोधात्। अनुभवस्यापिस्वरसवैहिनस्तथाविर
हात्। स्वकल्पितनियमानुरोधेन तत्कल्पनेचातिप्रसंगादित्याद्यपरितोषसूचनायकथंचिदित्युक्तं। ननूपमानो
त्तममेवेवादीनां प्रयोग इतिनियमोनास्त्येव उद्वाहुरिववामन इत्यादौ व्यभिचारात् नतस्तद्भंगेपि षष्ठपक्तिरेवेत्यत
आह। श्रौत्यपीति। यद्दितु स्वनिष्ठसादृश्यप्रतियोगिनिषेधस्यैवप्रकृतोत्कर्षहेतुत्वमितिस्वोक्तिरसणमात्रनिवं
धेनपूर्वोक्तप्रतिज्ञाविरोधदोषमप्यनाकलय्य उपमानलुप्तायाः श्रौतत्वमिष्टापत्त्यैवपरिहर्तुमिच्छेत्तत्राह। इ
वादीति। नन्वेतत्प्रथममेवदूषितं उद्वाहुरिववामनइत्यादौ उद्वाहुपदोत्तरमिवादीनां प्रयोगेपि तदर्थस्योप

© Dharmartha Trust J&K. Digitized by eGangotri

77

मानत्वाभावादितित्कथं पुनरप्ययमेदोषमुंउद्भाव्यं तद्इतिचेत्सत्यं। यथादूषितार्थोभिप्रायमभ्युपेत्य तदस्वारस्यादुपमान
लुप्तायाःश्रौतत्वमापादितं इदानीं तु तत्रैवापत्तिमपाशंक्य तस्यैव निःकर्षः कथ्यते। तथाहि। यदुक्तं रमित्यादिग्रंथस्य सार्थ
निष्ठविशेषणतानिरूपितविशेष्यताशालिस्वार्थकत्वमित्यर्थः। इवादिपदार्थसादृश्यनिष्ठविशेष्यतानिरूपितविशे
षणताशालिनोऽर्थस्य उपमानत्वनियमात्। तदत्रापि व्यभिचारः। उद्बाहुरिवेत्यादौ प्रयोगपौर्वापर्येऽपि सादृश्यनिष्ठवि
शेष्यतानिरूपितविशेषणताशालिनां वामनादिपदार्थानामुपमानत्वस्य सत्वात्। न च तत्वमिवेत्यादौ वेव उक्तव्यभि
चारशंकेति वाच्यं। पक्षीयस्य व्यभिचारसंशयस्य प्रमाणमात्रोच्छेदकत्वेन दूषणत्वाभावात्। अत एव उपमायाः श्रौत
त्वव्यवस्थापकमिदमेव तैरंगीकृतं यत् उपमानत्वादिविशिष्टस्यादधीविषयत्वमिति अतइष्टापत्तिरियमनिष्टापत्ति
रिवेति नाभ्युपगंतुं न्याय्येति। एतेन तत्वमिवेत्यादिनैषधश्लोकस्य उपमानलुप्तोपमानत्वेन आधुनिकचंद्रालोकविव
रणाकुवलयानंदाहरणं निरस्तं। एतदेतत्सर्वं प्रकाशयन्नाह। [illegible]ति। नात्रोपमानेति। मालतीकुसुमसदृशमित्युक्तौ

य

राम:
७७

© Dharmartha Trust J&K. Digitized by eGangotri

मालतीकुसुमस्यैवोपमानत्वादित्यर्थः। एतेनेति। स्वप्रतियोगिकसादृश्याश्रयनिषेधस्यापि स्वोत्कर्षपर्यवसानमि
तिव्यवस्थापनेनेत्यर्थः। यदि हि तेनात्रोपमानस्यासत्त्वमेवाभिमतमित्युपमानत्वमेवात्र नास्तीत्यभिप्रायेणोपमान
लुप्तत्वाभाव इत्युच्यते तदा असत्त्वं नाभिमतं अपि त्वप्राप्तिरेवेति तदुपरि दोषः प्ररोहमासादयेत्। तेन तु मालतीकुसुम
स्यात्रोपमानत्वात्तस्य च श्रूयमाणत्वात्कथं उपमानलुप्तत्वमित्येव विवक्षितं। तत्र च उपमानस्य अप्राप्तिरेव विवक्षिता
इति समाधानमयुक्तं वा इति प्रायमेवेत्यर्थः। तदेतदाह। उत्कर्षादिति। कल्पितं हि स्वप्रतियोगिकसादृश्याश्रयनिषेधस्या
प्युत्कर्षपर्यवसायित्वं। उपमानत्वेन प्रसिद्धवस्तुनि उपमेयप्रतियोगिकसादृश्यनिषेधात्मके प्रतीपविशेष इति भावः।
किं बहुना तद्वृत्तिधर्मविशेषस्यान्यत्र निषेधः उत्कर्षहेतुरिति सर्वसिद्धं। तथा च श्रुतावेव। नत्वदन्यो मघवन्नस्ति मर्डि
तेंद्र ब्रवीमि ते वाचमिति। अत्र इंद्रान्यस्मिन्सुखजनकत्वाभावोक्त्या इंद्रस्य तत्सिद्धेः। नन्वेवमस्तु त्वदुक्तरीत्या प्रकृतोत्क
र्षपर्यवसानं तथापि कथमत्रोपमात्वं। प्रकृतानुयोगिकसादृश्यस्यैव उपमात्वात् इति चेत् तत्रापि कथं तत्। उपमानताव

© Dharmartha Trust J&K. Digitized by eGangotri

च्छेदकरूपावच्छिन्नप्रतियोगिताकत्वस्यापिचंद्रइवेत्यादौदर्शनात्।उपमेयनिष्ठविशेष्यतानिरूपितविशेषणताशालि
त्वस्यापिसादृश्येदर्शनात्प्रकृतेचतदभावात्।अथदर्शनमात्रेपिनतदुपमात्वप्रयोजकं किंतुप्रकृतोत्कर्षकत्वमा
त्रमितिचेत्तुल्यंममापितथापियत्सादृश्यप्रतियोगितायांउपमेयतावच्छेदकावच्छिन्नत्वस्याश्रयमात्रवृत्तित्वानवच्छे
दकधर्मसामानाधिकरण्योभयाभावःसाउपमेतित्वदुक्तलक्षणस्यात्राव्याप्तिः।प्रतियोगितायाउपमेयतावच्छेदकाव
च्छिन्नत्वेनतदभावाभावादितिचेत्।नूनमप्यापिकामाद्रीनामुपमेयत्वमेवेतिश्रद्धाजाड्यंनत्वयापरित्यक्तं।अस्माभिस्तु
स्यात्रोपमानत्वस्यैवाभ्युपगमात्।उपमेयतावच्छेदकावच्छिन्नत्वाभावस्यप्रतियोगितायांसत्वात्।नहिप्रकृतत्वाप्रकृत
त्वएवोपमेयतोपमानताप्रयोजकेकिंतुसादृश्यानुयोगित्वप्रतियोगित्वएवेतिबहुसंमतत्वात्।अग्रेयथास्थानंवक्ष्य
माणत्वाच्चेत्यलमतिविस्तरेण।एवंपूर्वोक्तमुदाहरणंनिरस्यमेउदाहरणांतरमाह।[illegible]चंद्रेति।चंद्रसदृशंमुखंतस्याः
सदृशोमतस्यमुखरसस्तस्याः।सकचग्रहरभसहठचुंबनं कस्यसदृशमस्याः।अत्रकस्यसदृशमित्युक्त्यातन्नवि

© Dharmartha Trust J&K. Digitized by eGangotri

धम

शिष्यत्वाय तेऽस्येवार्थो लभ्यते इति नानन्वयशंका कार्या। अत्रोपमानस्य कस्येति सामान्यशब्देनैव निर्देशादुपमानता
वच्छेदकरूपावच्छिन्नोपमानोपस्थितिजनकप्रयोगाभावादुपमानलुप्तत्वं परं तु धर्मस्यापि अप्रयोगात्कथमुपमानमात्र
लुप्तत्वमेकलुप्ताया एवात्र प्रकृतत्वादित्यपरितोषात् यस्य तुलामिति पाठे वाक्यार्थो बोध्य इति वक्ष्यति। यथा चंचत्कर इति। पि३
कन्प्रत्ययविधायकवार्त्तिकस्य अग्रे वक्ष्यमाणत्वादत्र तदनुपन्यासः। आरोपितेनापीति। अत एव तमेव भांतमनुभांति
सर्वमित्यत्र सूर्यादीनां ब्रह्मानुकारसमर्थनाय अयोदहनयोः स्वरूपसाम्याभावेऽपि क्रियासाम्यं भवत्येव। यद्यपि दह
नक्रियावह्निमात्रवृत्तिस्तथापि वह्नौ स्वरूपेण अयःपिंडे त्वारोपेणेति तस्या उभयवृत्तित्वात्साम्यं इत्युपपादितं उत्त
रमीमांसायां प्रथमाध्यायतृतीयचरणे वाचस्पत्यादिषु। वास्तविकेति। वास्तवपदस्य भावप्रधानत्वमाश्रित्य तदस्या
स्तीत्यर्थे ठक्। असिद्धं स्यादिति। नचेष्टापत्तिः। तं अगत्स्यभजन्मर्त्येश्वं वा चंद्रकलाधरमिति चित्रमीमांसायामेवोपमात्वां
गीकारात्। अस्माभिस्तु तद्भेदस्याधिकामात्रं निराकरिष्यत इत्यन्यदेतदिति भावः। प्रयोगस्त्वादिति। अतिशयोक्तौ चउ

© Dharmartha Trust J&K. Digitized by eGangotri

पमानत्तावच्छेदकरूपेणोवउपमेयबोधाभ्युपगमेनउपमेयार्थकपदाप्रयोगादितिभावः। सादृश्यार्थएवेति। यद्यपिसा
दृश्यार्थविहितानामभ्युत्प्रेक्षापर्यवसानंभवत्येव। तस्याअपिसादृश्योपजीवकत्वात्कस्तूरीतिलकंतिभालफलके
रेखामुखांभोरुहेरोलंबंतितमालबालमुकुलोत्तंसंतिमौलिंप्रति। याःकर्णेविकचोत्पलंतिकुचयोरंकेचकालागुरु
स्थासंतिप्रथयंतुतास्तवशिवंश्रीकंठकंठत्विषइत्यादौउपमाप्रक्रमोत्प्रेक्षेत्यलं। कारसर्वस्वकारादिभिरंगीकारात्
तथाप्यत्रसंभावनार्थत्वेसाधकाभावादौत्सर्गिकसादृश्यपरतैवकल्प्यतइत्यभिप्रायः। इदमेवस्फोरयन्नाह। दिगिति।
अतएवेति। वाक्यपदस्यतद्धितानुपलक्षकत्वेतद्धितेपिद्योतकलुप्ताभेदान्व्युत्पादयेदित्यर्थः। द्विधेत्यनेनपूर्वोपिकर्तृक
र्मोधारस्वरूपभेदद्वयंगृह्यतइतिभ्रमोमाभूदित्यभिप्रायेणकर्तृकर्मपरत्वेनव्याचष्टेकर्तरिणमुलीत्यादिदृश्यतेविद्रुमाता
म्रंसिंदूरारुणगजेंद्रकुंभच्छायंमंदरधातुकल्पंकिलवासुकिमंडलवर्तुलंरविबिंबं। सेतुकाव्येसायंसमयेमंडलोत्तरेत्तरंर
क्तत्वमांशुवर्णनं। गजेंद्रऐरावतः। णिअच्छलंवर्तुलेदेश। त्रयाणामपीति। यद्यपित्रयाणांसमासेपिउपमानानिसा

© Dharmartha Trust J&K. Digitized by eGangotri

मान्यवचनैरितियावदंशेसमासस्तत्रैवद्वितीयसमासपूर्वपदभागेउपमानत्तुद्वितीयांशेपि।तथाप्युपमेयस्याप्ये
कसमासांतर्गतत्वमित्यभिप्रायेणायंपृथगुपन्यस्तइतिध्येयं।उक्तविभागेचित्रमीमांसोद्भावितंन्यूनत्वमाशंक
ते।यत्वितिः।रीपदर्शमितिकर्मणामुल्।कीटगाशमिति।कर्तरिणमुल्।अंतःपुरीयतीत्याधारक्यच्।कुमारीयतीति।
कर्मक्यच्।स्तंभायतइतिक्यङ्।कोकिलालापिनीतिणिनिः।कुवलयश्यामलेतिसमासः।एवंचवाचकलुप्तायां
णिनिप्रत्ययेनसमासाद्विविभागःस्यापिरीक्षितेर्णमाद्यत्रचतदनुक्तेर्न्यूनत्वमितिभावः।उपपदमिति।उपमान
रूपस्योपपदस्यणिनिप्रत्ययांतेनसमासादितिभावः।यद्यप्येवंणमुलोपिपृथगुपादानमनर्हंतत्राप्युपपदसमा
ससद्भावात्।यद्यपिचतत्रसमासस्त्वेपितस्योपमार्थकत्वाभावात्णमुलएवसादृश्यार्थेविधानाच्चपृथग्गणनं
सादृश्यार्थकत्वेनैवात्रविभागकारणादित्युच्यतेतर्हिप्रकृतेपिणिनेरेवसादृश्यार्थेविधानंनतुसमासस्येति
णिनिरपिपृथगेवगणयितुमर्हइतितुल्यम्।तथापिअनयपसमासत्वमत्रविभाजकोपाधितयाविवक्षितं।णमु

लंतस्यचाव्ययत्वात्तथग्रुपादानमितिरहस्यं॥ उपमानादाचारेइतिसूत्रं॥ उपमानात्कर्मणःसुबंतादाचारेर्थेक्यच्स्यात्
कादंबिनीमिवसौदामिनीमिवचआचरतीत्यर्थः॥ चलन्नवाभ्रमालातुबुधैःकादंबिनीस्मृतेतिहलायुधः॥ तडित्सौ
दामिनीविद्युदित्यमरः॥ अधिकरणाच्चेतीतिपूर्वसूत्रस्थवार्त्तिकादित्यर्थः॥ ननुकर्त्तुःक्यङ्सलोपश्चेतिसूत्रेसकारलोप
संनियोगशिष्टःक्यङ्सकारांतादेवप्रातिपदिकात्स्यात्ततश्चचंद्रकरायतेइत्यादावकारांतात्कथंक्यङितीमामाशं
कांपरिहरन्सूत्रंव्याचष्टे॥ उपमानादिति॥ पूर्वसूत्रादुपमानादाचारेइतिपदद्वयानुवृत्तेः॥ उपमानादित्यनंतरंकर्त्तुःसु
बंतादितिपदद्वयमधिकंबोध्यं॥ उपमानवाचकेति॥ तथाचवाक्यभेदात्चकारस्यचअन्वाचयशिष्टत्वात्प्रत्ययःसर्व
तोपिभवतिसलोपस्तुसकारांतस्थलएवेतिनदोषइत्यर्थः॥ यद्यपिक्यङरयोवैकल्पिकाःपक्षेवाक्यस्यापिइष्टत्वात्॥
तथापिप्रकृतानुपयोगाद्विकल्पोत्रसूत्रार्थमध्येनोक्तइतिध्येयं॥ भेदादाविति॥ मेघादेरुपमानस्यप्रतियोगित्वेनभेदे
निरूपकत्वेनचवृत्तित्वेअन्वयाभ्युपगमात्॥ प्रत्ययार्थेति॥ प्रकृतिप्रत्ययौसहार्थंब्रूतइतिकात्यायनोक्त्याप्रकृतिप्रत्ययान्य

स्वार्थे

© Dharmartha Trust J&K. Digitized by eGangotri

तदर्थनिष्ठविशेष्यताप्रकारतान्यतरसंबंधेनबोधंप्रतिविशेष्यतासंबंधेनतदन्यतरजन्योपस्थितेः कारणत्वकल्प
नात्। प्रकृतेचमेघादिनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनशाब्दबोधस्यभेदादावुत्पत्तेः प्रकृतिप्रत्ययान्यतरज
न्योपस्थितेश्चतत्रविशेष्यतासंबंधेनाभावात्। भेदादीनांइवपदार्थत्वाभ्युपगमादित्यर्थः। वृत्तित्वरूपस्यइवपदार्थ
स्यआचारान्वयमप्युक्तरीत्यादूषयति। प्रत्ययार्थइति। प्रत्ययार्थनिष्ठविशेष्यतानिरूपितविशेषणतासंबंधेनशाब्द
बोधंप्रतिविशेष्यतासंबंधेनप्रकृतिजन्योपस्थितेः कारणत्वकल्पनात्। चैत्रः पचतीत्यत्र कृतेश्चैत्रेविशेषणत्वेनभानात्
प्रत्ययार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधः कार्यतावच्छेदकतयाननिवेशनीयइतिप्रत्ययार्थनिष्ठविशेष्यते
त्यादिकमेवोक्तं। प्रकृतेचप्रत्ययार्थआचारेवृत्तित्वादेरिवार्थस्यान्वयात्वृत्तित्वप्रत्ययार्थनिष्ठविशेष्यतानिरूपितवि
शेषणतासंबंधेनशाब्दत्वरूपकार्यतावच्छेदकावच्छिन्नोत्पत्त्यातस्यइवपदार्थत्वेनप्रकृतिजन्योपस्थितेश्चतत्राभा
वेनव्यभिचारापत्तेरितिभावः। वचनसामर्थ्यादिति। यद्यप्यन्वयेआकांक्षैवबीजंनतुवचनंतथापिवचनरूपप्रमा

© Dharmartha Trust J&K. Digitized by eGangotri

कृ

४१

णोपष्टंभेनतथैवाकांक्षोन्नीयत इतितात्पर्यं।तथाचमेघादेः साक्षाद्दाचारूपप्रत्ययार्थानन्वयेपिभेदादिविशेषणता
पन्नस्यप्रकृत्यर्थस्यमेघादेः परंपरयातत्रान्वयसत्वान्नदोषः।अतएवप्रत्ययार्थान्वयमात्रेव्युत्पत्तेः सचयथाकथं
चित्संबंधमात्रेणेतिद्रव्योपाध्यायविवरणेमिश्रैरप्युद्भावितं।एवंचस्थलविशेषप्रकृत्यर्थप्रकारकबोधंप्रतिप्रत्ययार्था
न्वय्यर्थकपदजन्योपस्थितेरपिविशेष्यतासंबंधकारणतावच्छेदकीकृत्यकार्यकारणभावः कल्प्यः प्रामाणिकत्वात्
।अतएवनातिरात्रेषोडशिनंगृह्णातीत्यत्रषोडशिग्रहणाभावइष्टसाधनमितिबोधोदीधितिकारादिभिःस्वीकृत
इतिभावः।द्वितीयदोषंव्यभिचारेणदूषयति।प्रख्यातार्थेति।चैत्रःपचतीत्यत्रपाकानुकूलवर्त्तमानकृतिमांश्चैत्रइ
तिबोधात्कृतिवर्त्तमानत्वयोः प्रत्ययार्थयोरपिपरस्परमन्वयात्प्रत्ययार्थनिष्ठविशेष्यतानिरूपितविशेषणतासंबंधे
नशाब्दत्वावच्छिन्नस्यवर्त्तमानत्वेपिसत्वात्प्रकृतिजन्योपस्थितेश्चतत्रविरहादितिभावः।नचैवमप्युक्तसंबंधेनशाब्दत्वा
वच्छिन्नेप्रकृतिस्ववाचकप्रत्ययान्यतरजन्योपस्थितेरेवहेतुत्वंकल्प्यतेवर्त्तमानत्वस्यप्रकृतिजन्योपस्थितिविशेष्यत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

भावेपिवर्त्तमानत्ववाचकप्रत्ययजन्योपस्थितेर्विशेष्यतासंबंधेनतत्रसत्वात्।नतस्थद्रव्यार्थद्वित्तित्वस्यआचार्यप्रत्य
यार्थोऽन्वयोनयुक्तः वृत्तित्वस्यः प्रकृतिप्रत्ययान्यतरार्थत्वाभावादितिवाच्यं।प्रभाकरनयेनकलंजंभक्षयेदितिवा
क्येकलंजभक्षणाभावविषयकंकर्यैदितिबोधाभ्युपगमात्।कार्यस्यतन्मतेप्रलिङर्थत्वात्प्रत्ययार्थनिष्ठविशेष्य
तानिरूपितविशेषणतासंबंधेनशाब्दत्वावच्छिन्नस्यनञर्थाभावेप्युत्पत्तेस्तत्रःप्रकृतिजन्योपस्थितेःस्ववाचकप्र
त्ययजन्योपस्थितेश्चान्यतरस्याप्यभावेनतथापिव्यभिचारप्रतिकारविधिरहात्।किंचचतुर्थाध्यायेऽभावकारणता
विचारावसरेनानुपमृद्यप्रादुर्भावादितिन्यायसूत्रं।अनुपमृद्यकारणमविनाश्यप्रादुर्भावोनभवतिकार्यस्यन
हिबीजमनुपमृद्यअंकुरःप्रादुर्भवति।अतःकार्यकालेकारणस्यसत्वविरहादभावस्यकारणत्वमागतमेवेतित
स्यार्थः।तत्रनानुपमृद्यप्रादुर्भावोयतस्तस्मादितिव्याचक्षाणोवाचस्पतिमिश्रेर्दीधितिकारादिभिश्चकंठरवेणोवप्रा
दुर्भावस्यनञर्थान्वयंकृत्वानञर्थस्यपंचम्यर्थहेतुत्वान्वयःस्वीकृतः।अनुपमृद्यप्रादुर्भावोभावादिति।तथाचहेतुत्व

© Dharmartha Trust J&K. Digitized by eGangotri

रूपप्रत्ययार्थेनिष्ठविशेष्यतानिरूपितविशेषणतासंबंधेनशाब्दस्यनञर्थाभावेप्युत्पत्त्यातस्यचप्रकृतिप्रत्ययान्यतरार्थत्वाभावेन
दुर्वारएवव्यभिचारः। एवं तेषांमोहः पापीयान्नामूढस्येत्तरोत्पत्तेरितिसूत्रेपिइतरोत्पत्त्यभावादितिअन्वयबोधाभ्युपगमात्।
नचतत्रापिप्रादुर्भूतपदोत्तरपंचम्यर्थेहेतुत्वेनञर्थाभावस्यनान्वयः। किंतुनञ्पदोत्तरपंचम्यर्थएव। तथाचनञोहेत्वर्थकपंच
मीप्रकृतित्वेनअभावेप्रकृतिजन्योपस्थितिरस्त्येवेतिनव्यभिचारः। नचतदुत्तरंपंचमीश्रवणापत्तिरितिवाच्यं। अव्ययादाप्सुपइ
त्यनुशासनबलेनतस्यालोपसंभवात्। नचप्रादुर्भावपदोत्तरपंचम्याअनन्वयापत्तिरितिवाच्यं। तस्याःप्रतियोगित्वार्थकत्वात्।
नचप्रतियोगित्वस्यसंसर्गतयैवभानात्तद्द्व्यर्थ्यमेवमनिपातातिरिक्तनामार्थयोर्भेदान्वयस्वीकारादन्यथाघटोनेत्यादाव
नुपपत्तेरितिवाच्यं। तथापिसाधुत्वार्थत्वसंभवात्। मैवं। अव्ययोत्तरविभक्तेरेवसाधुत्वार्थत्वात्। प्रथमैकवचनमेवाव्ययेभ्य
उत्पद्यतेतस्यैवलोपइतिपक्षस्यैवमहाभाष्यकारैःसिद्धांतितत्वात्। नञ्युत्तरंपंचम्युत्पत्तौप्रमाणाभावात्। यत्तुएवकारस्य
तदन्वयिपदसमानविभक्तिकत्वमितिलीलावतीशिरोमणौप्रतिपादितं। यत्तुअव्ययेभ्यःसर्वविभक्त्युत्पत्तिरितिअभ्युपगमप

© Dharmartha Trust J&K. Digitized by eGangotri

समाश्रित्य समर्थनीयं। नच्चैवं स्व पश्येत्यादौ स्वरादीनां कर्मत्वप्रतीतिः कथमिति वाच्यं। तेषां सत्ववाचित्वेन सर्वविभक्त्युत्पत्तेः। नच्चै
वमव्ययत्वं न स्यादसत्ववाचिन एव तथात्वादिति वाच्यं। पाठसामर्थ्यादव्ययसंज्ञाप्रवृत्तेः। एवं च यथोक्तव्यभिचारः स्फुट एवेत्यलं
मतिप्रपंचेन। एवं अध्याहृतस्येव पदस्य भेदादिकमर्थः। इति स्थितं। संप्रति भेदोपि क्यङादेरेवार्थ इति जयरामभट्टाचार्यमतमाह
अत्र वदंतीति। पौरमिति। काव्यप्रकाशोपन्यस्तोदाहरणाभिप्रायेण। पौरं सुतीयति जनं समरांतरे सावंतःपुरीयति विचित्रचरित्र
चंचुः। नारीयते समरसीम्नि कृपाणपाणेः यालोक्य यस्य लसितानि सपत्नसेना। सुतीयतीति कर्मक्यच्। अंतःपुरीयतीत्यधिकरण
क्यच्। नारीयत इति क्यङ्। इति त्रयाणामेकश्लोक एवोदाहरणं। क्यजादीनामिति। आदिपदात् क्यङ्संग्रहः। विचारसाम्यसूचना
यस्वयंक्यङ्प्रत्यये बोधमुक्त्वा क्यजादौ एतद्विप्रतिपत्त्युपन्यास इति द्रष्टव्यम्। आचारमात्रेति। मात्रपदाद्भेदव्यवच्छेदः। सुताद्यन्वि
तेति। प्रत्ययार्थस्य प्रकृत्यर्थेनैव सममुत्थिताकांक्षत्वेन तद्[illegible]दन्वयस्यांतरंगत्वात्। पौरादीति। एककर्मान्वयादेव निराकांक्ष
तया कर्मांतराकांक्षाविरहात्। न च प्रत्ययार्थाचारस्य निराकांक्षत्वेपि पौरमित्यादिपदोपकांक्षयैव तदन्वयः स्यादिति वाच्यं। अन्व

© Dharmartha Trust J&K. Digitized by eGangotri

८३

यप्रतियोगिनोर्मध्येऽन्यतरस्य निराकांक्षत्वे परपदार्थानन्वयात्। तदुक्तमाचार्यचरणैः। न चान्यतराकांक्षाऽन्वयबीजं अपितू
भयाकांक्षेति। शब्दखंडे मिश्रैरप्युक्तं। द्वयाकांक्षायां चान्वयधीर्नत्वन्यतराकांक्षायामिति। सुताद्यनन्वितेति। तथाच आचार
स्य कर्मानन्वयेन तत्साकांक्षत्वात्। तत्रपौरमित्यादीनामन्वयोपपत्तिरिति भावः। ~~तथाच आचार्यस्य~~ न चैवं पौराद्यन्वय
संभवेऽपि सुतादि प्रकृत्यर्थानन्वयतादवस्थ्यं निराकांक्षत्वसाम्यादिति वाच्यं। पराद्यन्वयोपपादनमात्रे तात्पर्यात्। तदाकांक्षा
अंतरंगत्वेन पुनस्तत्रान्वय इत्यभिप्रायात्। प्रकृत्यर्थेति। प्रकृत्यर्थनिरूपितविशेष्यताप्रकारकं तान्यतरराहित्य प्रत्ययार्थस्य
पदांतरार्थान्वयानर्हत्वात्। अन्यथेति। प्रकृत्यर्थानन्वितस्यापि प्रत्ययार्थस्य पदांतरार्थान्वयस्वीकार इत्यर्थः। न पचतीति। पा
कानुकूलकृत्यभाववानित्यर्थः। चैत्रः कृतिमानिति। चैत्रविशेष्यकपाकानुकूलकृतित्वावच्छिन्नप्रतियोगिताकाभावप्रकारकबाध
ज्ञानस्य चैत्रविशेष्यककृतित्वावच्छिन्नप्रकारताकबोधं प्रत्यविरोधित्वात्। नीलदंडाभाववानिति ज्ञानस्येव दंडवानिति ज्ञाने बा
धबुद्धौ प्रतियोगितावच्छेदकतातत्पर्याप्त्यधिकरणयोर्धर्मयोस्तत्तद्धर्मावच्छिन्नप्रकारकज्ञानत्वस्यैव प्रतिबध्यतावच्छेदकत्वात्। ता

राम:
८३

© Dharmartha Trust J&K. Digitized by eGangotri

दृशंचात्र पाकानुकूलकृतित्वं। प्रकारतावच्छेदकंतु कृतित्वमेव तच्च प्रतियोगितावच्छेदकतापर्य्याप्त्यनधिकरणमेव। अतश्चैत्रः

पचतीति वाक्यात् चैत्रः कृतिमानिति बोधस्य तादृशबाधकालेपि दुर्वारः। उक्तनियमस्वीकारे तु पाकरूपप्रकृत्यर्थानन्वितायाः

कृतेश्चैत्रादौ अन्वयासंभवात्। पाकानुकूलकृतिमानिति बोधस्य च यथोक्तप्रतिबंधसत्वेनानुत्पादात्तादृशबाधकाले तद्वा

क्यस्यन वाक्यार्थबोधजनकत्वमित्यर्थः। एवंच पदांतरार्थनिष्ठविषयतानिरूपितविषयतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति

प्रकृत्यर्थावच्छिन्नविषयतानिरूपितविषयतासंबंधेन प्रत्ययजन्योपस्थितिः कारणमिति पर्यवस्यति। अतः सुताद्यनन्वितस्यै

वाचारस्य पौराद्यन्वयानर्हत्वादाचारे प्रथमं सुतादिप्रकृत्यर्थान्वयाभ्युपगमे च निराकांक्षत्वात् तत्रैव पौराद्यनन्वयतादव

वस्थ्यमिति फलितार्थः। ननु चैत्रो न पचतीति बाधज्ञानसत्वे चैत्रः पचतीति वाक्याच्चैत्रः कृतिमानिति बोधानुत्पादेपि प्रकृतेप्र

थममाचारे पौराद्यन्वयः स्यादेव तत्र पश्चादपि कृतेः प्रकृत्यर्थान्वयविरहात्। अत्र च पौराद्यन्वयानंतरं सुतादावपि तदन्व

याभ्युपगमेन वैषम्यात्। यत्तु प्रकृत्यर्थानन्वितप्रत्ययार्थस्यान्यत्रनान्वय इत्युक्तं। तदकिंचित्करं। देवदत्तेन दृष्ट इत्यादौ देवद

© Dharmartha Trust J&K. Digitized by eGangotri

तोकृतिविषयदर्शनविषयदेदूतिबाधदर्शनात् निष्ठाप्रत्ययस्य तत्तीयार्थकृत्यन्वयानंतरमेव प्रकृत्यर्थदर्शनान्वयाभ्युप

८४ गमात्। तथाचोक्तव्युत्पत्त्य सिद्धिमेवलिखित्वा अद्यश्छित्वेत्यादौ क्ताप्रत्ययार्थस्याव्यवहितपूर्वकालस्यापेत्यनेन सम

84 मभेदान्वयः समर्थितो द्रव्यकिरणावल्युपायविवरणे पक्षधरमिश्रजलदठक्कुरादिभिस्तस्मात्प्रकृतिप्रत्ययार्थयोः परस्परा

न्वय एव आवश्यको न तु प्रकृत्यर्थान्वयात्पूर्वं प्रत्ययार्थस्यान्यत्रान्वयोपि। तावतैव न पचतीतिबाधकालेपचतीत्यस्मात्

कृतिमानितिबोधवारणादित्यपरितोषादाह। किंचेति। कृजादिशक्तीति। कृजादिनिष्ठशक्तीत्यर्थः। नचगौरवमिति। शक्ति

कल्पनमपेक्ष्याध्याहार एव लाघवादित्यर्थः। इच्छादिशक्तीति। इच्छादिविषयकशक्तीत्यर्थः। विक्लौपापत्तेरिति। नचेष्टापत्तिः।

तद्वाचकत्वस्यैव भाष्यकाराद्यभियुक्तसंमतत्वात्। अतएवेति। भेदस्यापि कृजाद्यर्थत्वादिति भावः। यद्यपि भेदस्य इव पदा

र्थत्वेपि सुतं सुतीयतीत्यादिप्रयोगापत्तिर्नास्त्येव। सुतादिभेदस्य सुताद्यन्वयानर्हत्वसाम्यात्। तथापि कृजादिस्थले

भेदोवश्यं प्रतीयत इत्यत्रैवायमुपष्टंभः। स च लाघवात्कृजाद्यर्थ एवेत्युक्तमित्यन्ये तत्र। सुतभिन्नेति। अत्र प्रकृत्यर्थस्य

राम: ८५

© Dharmartha Trust J&K. Digitized by eGangotri

सुतादेः प्रतियोगितयाप्रत्ययार्थेभेदेतस्यचविशेषणतासंबंधेनउपमेयेपौरादेतस्यवृत्तित्वेद्वितीयार्थेतस्यमुख्यविशे
ष्यभूतेद्वितीयाचारेपुनःप्रकृत्यर्थस्यसुतादेःप्रथमाचारेएवंसुतभिन्नपौरादिवृत्तित्वविशिष्टस्य उत्तविषयकाचारजा
तीयाचारस्यधात्वर्थस्यकृतावन्वयइतिक्रमः एवंचएकत्राचारेप्रकृत्यर्थस्यान्वयएकत्रचपौरादेरिति
उभयत्रतदन्वयोपपत्तिः परजन्योपस्थितिभेदसत्वादितिफलितार्थः सादृश्यविशेष्यकेति कयजा
दिकेप्रत्यर्थस्यउपमानत्वनियमात्यत्रसादृश्यविशेषणीभूतस्योपमानत्वनियमस्तत्रैवश्रौती
तिपूर्वमेतन्मतव्यवस्थापनादित्यर्थः पूर्णोपमेति कयजादीनामेवसादृश्यार्थकत्वेनतेषांश्रूय
माणत्वेनचवाचकलुप्तत्वाभावादित्यर्थः तदेवदर्शयति नत्विति 'विवरणेति यद्यपिविवरण
मनुमानविधयाकयजादीनांसादृश्यार्थकत्वएवसाधकंनात्विवपदाध्याहारेतथापिसादृश्यप्र
तीत्यावश्यकत्वदर्शनार्थमेवतदुक्तं नहितद्वाक्यार्थबोधविषयत्वविरहिणोर्थस्यवाचकेनप

© Dharmartha Trust J&K. Digitized by eGangotri

रेन तद्वाक्यार्थो व्याख्यायते इति तात्पर्यात् न च सादृश्यप्रत्यये विवादाभावात्तत्र कृतं साधकोपन्या
सेन किं सादृश्यं क्यजादेरेवार्थः उत अध्याहृतस्य इव पदस्येत्यत्रैव विप्रतिपत्तेरिति वाच्यं सादृश्य
प्रत्यये उक्तरीत्या दृढीकृते क्यजादीनामेव तत्र शक्तिकल्पने गौरवात् इवादिकल्पने च तेषां तद्वाच्य
कत्वस्य कल्पितत्वात्तत एव तत्प्रतीतौ लाघवादित्यभिप्रायात् अत एव सन्प्रत्ययादेरिच्छादिशक्ति
विलोपप्रतिवादिनिरस्यन्नाह आचार इत्यादि सचेति आचारस्य क्यजर्थताप्रतिपादकः सूत्रार्थ
इत्यर्थः अविरुद्ध इति इवाध्याहारेऽपि क्यजादीनामाचारार्थकतारक्षणादित्यर्थः। सन्प्रत्ययाद
स्य वैषम्यमाह न हीति तथा चेच्छास्थानीयसूत्रोपात्ते आचारे मया शक्तिरभ्युपगम्यत एव
सादृश्यं तु प्रतीयमानं किं अध्याहृतपदार्थ उत प्रत्ययार्थ इति वीक्षायां प्रत्ययशक्तिकल्पने गौर
वादनुशासनविरोधाच्च भेदाद्युपस्थितिरध्याहृतादिवपदादेव युक्तेति भावः किं च स्तुताद्यन्वि

© Dharmartha Trust J&K. Digitized by eGangotri

तेआचारेपौराद्यन्वयासंभवइत्यप्युक्तं प्रथममप्युक्तरीत्याप्नुतादिप्रकृत्यर्थान्विते आचारे पुनः
समाद्यंताधातवइतिवचनेनक्यजाद्यंतस्यप्नुतीयेत्यस्यधातुसंज्ञायांतस्यांविशिष्टेतत्रपौ
रादिकर्मकत्वान्वयसंभवात् प्नुतमिवाचरतीत्यनेनधात्वर्थेनकर्मातरस्यावश्यमाकांक्षित
त्वादितिद्योतयन्नाह दिगिति 'चंडीदाससारयइत्यादिपदेनतदनुवादीसाहित्यदर्पणादिसं
ग्रहः वाचकत्वसंदेहादिति तेषांद्योतकत्वमितिवैयाकरणाभ्युपगमात् समुदितमेवेति
पदस्फोटाभिप्रायकं रामनित्यखंडपदस्यैवरामप्रकारककर्मत्वविशेष्यकबोधजनकत्वेन
तुरामपदेनरामस्यप्रत्ययांशेनचकर्मत्वस्यप्रतिपादनमितितत्राभ्युपगमात् स्वस्वार्थेति
उभाभ्यांप्रत्येकंस्वस्ववाच्यार्थोपस्थापनेतदन्वयबलेनविशिष्टप्रतीतिसंभवादितिनेयायि
केरंगीकृतत्वात्' तदप्यतएवेति इवाद्यर्थएवसादृश्यमितिव्यवस्थापनादेवेत्यर्थः साध

© Dharmartha Trust J&K. Digitized by eGangotri

ननु १

अ·को·टी·
८६

काभावमुक्त्वा बाधकमप्याह किंचेति अधिकार इति उपमानादाचार इति सूत्रस्य क्यच्प्रत्य
यविधायकत्वात्कथमधिकारत्वोक्तिः कार्यविशेषोपादानेन पदार्थत्वाभावात् सत्यं स्वयं क्य
च्प्रत्ययविधायकत्वेपि कर्त्तुः क्यङित्यादावुपमानादाचार इति पदद्वयानुवृत्त्या तथात्वोक्तेः अ
तएवाह सूत्रांतरैकवाक्येति परंतु चंडीदासग्रंथे क्यङ्प्रत्ययमेवोपक्रम्य विचारात् तद्विधे
क्य: कवाक्यतापन्नत्वमुखेनैव उपमानादाचार इति सूत्रमुद्भावितम् तस्मादिति श्वादिप्रयोगादे
वसादृश्यप्रतियोगित्वरूपोपमानत्वनिर्वाहात् सदृशाचारस्य क्यजाद्यर्थत्वे तु तदुत्तरमुप
मानत्वप्रतीतावपि तदुत्पत्तिदशायां तथा न स्यात् तदभिप्रायेणैव उपमानत्वोपपादने तु
उपमानादिति पदानर्थक्यं स्यादिति नच तत्सामर्थ्यादेव क्यङ्प्रत्ययादीनां सदृशाचारार्थ
कत्वसिद्धिरिति न तद्वैयर्थ्यमिति वाच्यं एवमपि सदृशाचार इत्येव सूत्रन्यासापत्तेः अस्मद्री

© Dharmartha Trust J&K. Digitized by eGangotri

स्याच्चयथान्यासमेवस्यत्रोपपत्तेः उपसंहारग्रंथपर्यालोचनयाजयरथमभट्टाचार्याणामपि
इवाद्यध्याहारेनिरासनिर्बंधोनास्तीतिप्रतीयतइत्यभिप्रायवानाह कचादीनामिति ल
क्षणयेति एवंहितत्रस्वकृतं कचड्:र्थोचारोधर्ममात्रं उपमानपदस्यतन्निरूपितसादृश्ये
लक्षणा सादृश्यस्यचपदार्थान्तरत्वेनयेतस्यप्रयोजकतासंसर्गेण समानधर्मात्मकत्वे
त्वभेदसंसर्गेणधर्मेन्वयः तस्याश्रयतयाउपमेयेन्वयइति एवंचसादृश्येशक्त्यभावाद्वाच य=
कलुप्तत्वमितिभावः विशिष्टस्यैवपदस्यविशिष्टार्थेशक्तिरितिपक्षेसादृश्येपिशक्तिस
त्वात्कथंवाचकलुप्तत्वमित्याशंक्याह समुदायस्यैवेति एतावान्प्रकृतेरेतावान्प्रत्ययस्ये
तिविभागस्यात्रानभ्युपगमात् सादृश्येति श्रौतोपमायांसादृश्यमात्रवाचकपदसत्वेअ
र्थोपमास्थलेतुसादृश्यविशिष्टार्थमात्रवाचकसदृशादिरूपपदसत्वंइति तत्रवाचकसत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

पि अत्र तत्सादृश्यप्रयोजकाचरणकर्तृत्वशक्तत्वेन प्रयोजकत्वादिरूपार्थवाचकत्वस्यापि सत्वात्
न तदन्यतरमात्रवाचकत्वमिति वाचकलुप्तत्वमव्याहतमिति भावः क्विपो पाति नतु प्रकृतेः सा
दृश्ये लक्षणायामपि तस्य वाचकलुप्तत्वे किं बाधकं सादृश्ये तस्य शक्त्यभावात् तावतैव एतेन
मते वाचकलुप्तत्वव्यवहारात् तथाचरसगंगाधर एव कुचकलशेष्वबलानामलकायामथ
पयोनिधेः पुलिने क्षितिनाथकीर्त्तयहो हारंति हरंति हीरंतिइति क्विबं[illegible]ते वाचकधर्मलुप्ता
मुदाहृत्योक्तं तत्र हारादिशब्दालक्षणया हारादिसादृश्यं बोधयंति लुप्तोपि स्मृतः क्विबाचार
मिति पक्षे वाचकधर्मलोपं स्पष्ट एव हारादिशब्द एव लक्षणया तादृशसादृश्याभिन्नमा
चारमिति पक्षेपि सादृश्यस्यैव धर्मस्यापि बोधात्तन्मात्रबोधकाभावाल्लोप एवेति तल्लोपमु
पाले भइति चेत् उच्यते सादृश्ये लक्षणास्वीकारेपि वाचकलुप्तत्वानुपपत्तेरित्यरविंदसुंदरं

© Dharmartha Trust J&K. Digitized by eGangotri

मुखमित्येतद्वाक्यार्थबोधविचारावसरे प्रपंचितत्वात्तदभिप्रायेणात्र क्यङः क्विबादिसाधारण्ये
नानुपपत्त्युद्भावनात् समुदायस्यैव विशिष्टार्थशक्तिरिति पक्षेऽपि सादृश्यमात्रबोधकत्वाभावा
द्वाचकलोप एवेति द्वितीयपक्षं दूषयति वाचकमात्रेति इदं च क्यङादिकमवाधिकृत्य बोध्यं
क्विबंते वाचकमात्रलुप्तत्वाभावापत्तेरिष्टापत्त्यैव परिहारात् तत्रोभयलुप्तत्वांगीकारेण एक
मात्रलुप्तत्वानंगीकारात् ॥ ननु क्यङादिकमप्यधिकृत्य स्वरसगंगाधरोपरि नेदमनिष्टापादनम्
क्यङादावपि तैरुभयलुप्तत्वांगीकारेण वाचकमात्रलुप्तत्वाभ्युपगमात् तथाहि क्यचक्य
ङोर्वाचकलुप्तोदाहरणत्वं प्राचीनोक्तमयुक्तमेव तन्मात्रलुप्ताया एव वाचकलुप्तपदार्थत्वात्
अत्र च धर्मलोपस्यापि संभवेन द्विलुप्तांतर्भावस्य न्याय्यत्वात् न च क्यङाद्युक्त्याचार एव सामा
न्यधर्मोऽस्तीति वाच्यं धर्ममात्ररूपस्याचारस्योपमायामप्रयोजकत्वात् नारीयते समरसी

© Dharmartha Trust J&K. Digitized by eGangotri

म्निसपललितेनेत्यादौ प्रकारांतरेणोपस्थितानां कातरत्वादीनामाचारोभेदांध्यवसायेसत्येवसाधा
रण्यस्वीकारात् अन्यथात्रिविधरूपं ततखलुभायतायतेइत्यादौसुप्रसिद्धत्वादिरूपाचारोपस्थि
तिमात्रेणोपमानिःपत्तिप्रसंगात् नचेष्टापत्तिरनुभवविरोधात् सुपवर्चोभिःशोभितमंतरात्रि
तैरित्यादिबोधोत्तरमेवतदुल्लासात् अतआचारमात्ररूपोधर्मोनोपमानिर्वाहकइतिध
र्मलोपोप्यत्रावश्यकः उपमानप्रयोजकतावच्छेदकरूपेणधर्मवाचकपदशून्यत्वस्यैव
धर्मलोपशब्दार्थत्वात् अन्यथामुखरूपमिदं वक्त्रप्रफुल्लमिवपंकजमित्यादौवक्त्रत्वादि
रूपधर्मोपादानेनपूर्णोपमापत्तेरितितत्रैवव्यवस्थापितत्वात् अतःकवचनादावुभयलुप्तत्वा
पादानमपीष्टापादानमेवेतिकथंदूषणत्वेनतदुपन्यासइतिचेत् सत्यं तथापिप्राचीन
मतानुसारित्वदशायांतत्रतथाव्याख्यातत्वेनतदानीयथोक्तस्यानिष्टापादानपर्यवसा

© Dharmartha Trust J&K. Digitized by eGangotri

नसंभवेनदोषत्वेनोद्भावितुमर्हत्वात् अविशेष्यतेसैंतुपरमार्थतोत्रकथंवाचकैलोप
उक्तरीत्याधर्मलोपस्यापिसत्वादिति तदेतच्चंडीदासेनाप्युद्भावितमेव तथाचाह वस्तु
तस्तुस्तुतीयतीत्यादौस्नेहनिर्भरत्वाद्गम्यमानतयाधर्मलोपोदाहरणान्यमूनि एवंवि
धविचारविचारविरहरम्यायामपिचोभयलोपोदाहृतियोग्यानीति क्यङादीनामेवौ
पम्यप्रतिपादकत्वमितिव्यवस्थाप्यतदनंतरमयंग्रंथः तथाचवाचकस्यसत्वाद्धर्मस्यचा
नुपादानाद्धर्ममात्रलोपोदाहरणत्वमेवयुक्तं यदापिक्यङादीनामौपम्यार्थकत्वपर्यंतंन
विभाव्यतेतदापिधर्मस्याप्युपमानिर्वाहकस्यानुपादानादुभयलोपोदाहरणत्वं सर्वथा
पिनवाचकमात्रलुप्तत्वमितितस्यार्थः तत्कथंनात्रधर्मलोपोपीति तत्रायंप्राचामभिप्रा
यः धर्मत्वव्याप्यरूपेणधर्मबोधकपदोपादानस्थलेनधर्मलोपोवक्तुंयुक्तः इत्यादिपदेस्तु

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मत्वस्वरूपेणैव तद्बोध इति चंद्र इव मुखमित्यादौ धर्मलुप्तत्वमप्याहुस्तं आप्यत्वं च न तदतिरि-
क्तत्वमात्रेण तु न्यूनवृत्तित्वं वस्तुत्वादेः केवलान्वयिधर्मस्योपादाने तस्य धर्मत्वन्यूनवृत्ति-
त्वानुपपत्त्या धर्मलोपापत्तेः न चैवं मुखस्वरूपमिदं वस्तु घट इव पटो द्रव्यमित्यादेरपि पूर्णो-
पमात्वं स्यात् वस्तुत्वद्रव्यत्वादिरूपेण धर्मोपादानसत्त्वादिति वाच्यं इष्टापत्तेः तथा हि
किमत्र उपमात्वमापाद्यते उत पूर्णत्वं आहोस्विच्चमत्कारः नाद्यो इष्टत्वात् नान्त्यः आपा-
दकाभावात् पूर्णत्वस्य उपमात्वस्य वा चमत्कारप्रयोजकत्वविरहात् किंतु विषयविशेष-
स्यैव तथात्वात् यत्तु त्रिविधरूपं ततत्वलुभारतायते इत्यादौ सुप्रसिद्धत्वादिरूपाचारोपस्थि-
त्या उपमानिष्पत्तिप्रसंग इति तदप्यसत् तत्राप्युपमानिष्पत्तौ बाधकाभावात् परं तु सुपर्व-
त्वादिधर्मप्रयुक्तसादृश्यप्रतीतावेव चमत्कारोल्लासो न तु प्रसिद्धत्वादिप्रयुक्ततद्बुद्धिमात्रात्

तत्रोपमायाएवनिष्पत्तोउपमानादाचारइत्यादिसूत्राणामनुभवस्यचविरोधापत्तेः नहिक्व
ऽणादिस्थलेधर्मलोपस्वीकारेणापिनात्रोपमानिष्पत्तिरितिवक्तुंशक्यं धर्मलुप्तोपमोदाह
रणत्वंक्यङादीनामितितेनापिस्वीकृतत्वात् धर्मलोपोदाहरणानीतिचंडीदासग्रंथस्यद्वि
लुप्तांतर्भावस्यन्याय्यत्वादितिरसगंगाधरग्रंथस्यचप्रागेवोपन्यासात् नहिव्यापकधर्मो
नवच्छिन्नस्यतद्व्याप्यधर्मावच्छिन्नत्वंवक्तुमर्हति पृथिवीत्वाद्यनवच्छिन्नस्यजलादेरपिपृथि
वीविशेषमध्यपरिगणनस्यानुक्तिसहत्वात् नचनारीयतइत्यादावेवतेरुपमानिष्पत्तिर
भ्युपगतानतुभारतायतइत्यादावितिवाच्यं विशिष्यधर्मानुपादानस्योभयत्राप्यविशेष
णवैषम्यानुपपत्तेः -------- विरोधस्यांतरावगमोत्तरमपितदनुदयप्रसंगात्
तस्मान्नारीयतइत्यादावाचारस्यैवधर्मत्वाद्विषयविशेषमहिम्नाचमत्कारोल्लासाच्चन

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मलुप्तत्वं द्वंद्वस्तत्र कर्तुर्भगवतः पाणिनेप्यभिमतं नह्याचाररूपस्य धर्मस्य सादृश्यानु
पपादकत्वेउपमानादाचारे इति सूत्राणामुक्तिसंभवः वस्तुतस्तु तत्तदुपमानोपमेयसम
भिव्याहारवशात् क्यङादीभ्यां विशेषप्रकारेणैव आचारोपस्थितिर्भवति आचार इति तु ना
नाविधशक्यतावच्छेदकानुगममात्रं न तु तेन रूपेण शाब्दबोधेऽपि तस्यादिपदेषु बुद्धिस्थत्वादि
वत् नारीयत इत्यादौ च कातरत्वादेर्नारीधर्मस्य यथोक्तसमभिव्याहारबलादुक्तरीत्याला
भ इति न धर्मलोपापत्तिः यथा ह्युपमानादित्युपमानत्वेन रूपेण नानाविधानां संग्रहः तथा
आचारत्वेन रूपेण तद्धर्माणामपि एतावांस्तु विशेषः यत्र धर्मः प्रसिद्धस्तत्र तदुपादानमना
वश्यकं यथा हंसायते नैषिकेति क्वचित्स्पष्टार्थं तत्प्रयोगोऽपि यथा हंसायते चारुगतेन कां
तेत्यादौ यत्र तु न तथा प्रसिद्धिस्तत्र तदुपादानमावश्यकं यथा त्रिविष्टपं ततत्वलुभारता

© Dharmartha Trust J&K. Digitized by eGangotri

यतेइत्याद्योस्सुपर्वभिः शोभितमित्यादेः नचैतादृशानुभवेमानाभावः आचारत्वेनैवतदुपस्थि
तेरितिवाच्यं तावन्मात्रस्यसादृश्यानिर्वाहकत्वमितित्वदुक्तरीत्यास्वत्राद्यसंगत्यापत्तेः त
दाशयेनैवप्राचीनैरपिकण्डादीनांधर्मवाचकत्वांगीकारात् अतएवतत्रभाष्यकारैरपिकु
टीयतिप्रासादेप्रासादीयतिकुड्यामितिधर्मार्थकशब्दांतरहीनमेवोदाहृतं एवंअंजायमा
नेयोअहिंजघानेतिभाष्योदाहृतश्रुतावपितथैवप्रयोगः अंअः परंलक्षणयातद्वत्परंअ
हिर्वृत्रासुरसर्पइत्यभिधानं तदेवमुपन्यस्तनानाप्रमाणानुगृहीतानुभवबलात्स्वीकुरु
वाआचारमात्रस्योपमानिर्वाहकत्वंप्रतिजानीहिवाकण्डादिभ्योविशेषप्रकारकंबोधमि
तिसर्वथाकण्डादयोधर्मवाचकाइतिसिद्धमित्यलमितिनिर्बंधेन। प्रकृतमनुसरामः॥ कण
ड्वादीनांसादृश्यबोधकत्वनिरासायमतांतरमाह उपमानेति एतन्मतेजयरामभट्टाचा

© Dharmartha Trust J&K. Digitized by eGangotri

योक्तिं दूषणमाह अत्रापीति अन्वेषणीयइति समानधर्मस्यैव नैयायिकमते सादृश्य
पदार्थत्वादितिभावः मीमांसकमतेमवलंब्यपूर्वमतं योजयति उभयनिष्ठेति उपमाना
दिति यद्यपिउपमानेकर्मणिचेत्येवसूत्रस्वरूपं कर्मणिकर्तरिचोपमानेउपदेधातोर्णमु
लम्भवतीतिसूत्रार्थः तथापिकर्मणिचेत्यंशएवात्रसूत्रैस्वरूपकथनपरः तेनचैकदेशाद्धा
ताउपमानेकर्मणिचेतिसूत्रंविवक्षितं उपमानादिति तुउपपदाद्धातोर्णमुलप्रत्ययप्राची पमानो
पते यद्वा यद्वाउपमानंअततिप्राप्नोतिस्वप्रकृतिभिः तथानुपूर्वंवर्त्तित्वसंबंधेनेतिअतधा
तोःक्विपप्रत्ययेप्रथमांतएवणमुलोविशेषणं यद्वाउपमानशब्दोभावव्युत्पत्त्यासादृश्य
परः अन्यत्पूर्ववत् ननुतीक्ष्णद्युतिदर्शंपश्यतीत्यत्रशोर्वारद्वयंप्रयोगोपुनरुक्तोव्यर्थश्चे
त्यतआह तत्प्रकृतीति यस्माद्धातोर्णमुलप्रयुज्यतेतस्येत्यर्थः ण्यन्तुप्रासनेति यस्माद्धा

© Dharmartha Trust J&K. Digitized by eGangotri

तोर्णमुल् विहितः स एवानुप्रयोक्तव्य इत्यर्थकेन कषादिषु यथाविध्यनुप्रयोग इति सूत्रेणे
त्यर्थः। णमुलो भेदशक्तिकल्पनेऽपि निदाघघर्मांशुदर्शं निदाघघर्मांशुं पश्यतीति प्रयोगो
दुर्वार एव आसज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य तस्मिन्नपि सत्त्वात् इत्य
भिप्रायेणाह किंचेति ननु प्रकृत्यर्थस्य प्रत्ययार्थे भेदे अन्वयितावच्छेदकावच्छिन्नप्रतियो
गिताकत्वसंबंधेनान्वयाभ्युपगमात् कथमुक्तप्रयोगापत्तिः आसज्य इत्यादिधर्मस्यान्व
यितानवच्छेदकत्वात् तदवच्छिन्नप्रतियोगितायाः संसर्गत्वासंभवात् निदाघघर्मांशुत्वा
दिरूपतादृशधर्मावच्छिन्नप्रतियोगिताकभेदस्य च निदाघघर्मांशुप्रभृतावसत्त्वादित्याशंक्या
ह अन्वयितेति तथा च णमुलर्थभेदे प्रकृत्यर्थस्योक्तप्रतियोगितयान्वयनियमाभ्युपगमे
यत्रैकस्यैवोपमानोपमेयत्वं तत्रान्वयानुपपत्तिः उक्तसंसर्गेण प्रकृत्यर्थभेदान्वयस्य तत्रबा

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰कौ॰टी॰
९२

धितत्वात् । ननु लुमुलक्षले तादृशप्रयोगो नास्त्येवेत्याशंकां परिहरन्नाह लंकेति रसगं
गाधरेऽनन्वयोदाहरणमेतत् नैऋतो यातुरक्षसीत्यमरः चवर्गीयजकारादिरपिजातुरा
क्षोराक्षसार्थ इतितद्याख्यातारः ननु तत्र भेदस्यानन्वय एव इवपदाध्याहारवादिनात्वया
पिइवार्थभेदस्य तत्रान्वयबोधवारणाय तथैव वाच्यत्वादित्याशंकते नचतत्रेति कल्प
यित्वेति तथा च इवपदस्य भेदशक्तेरुभयसिद्धत्वात्तत्रानुपपत्त्या भेदानन्वयस्वीकारेपिण
लुप्रत्ययस्य भेदशक्तेः प्रमाणतया सिद्धत्वेन तच्छक्तिं कल्पयित्वा तदनुपपत्त्यानन्वयक
ल्पनमयुक्तमेवेत्यर्थः किंच युगपदुभयार्थबोधकपदानामेकार्थानन्वये र्थांतरस्याप्यन
न्वयव्युत्पत्तिविरोधादपि नैवमित्याह अन्यथेति एकार्थान्वयाभावेप्यन्यार्थान्वयस्वीका
र इत्यर्थः । ननु यत्र तदर्थान्वययोग्यत्वे तत्पदस्यासाधुत्वं तत्रैव तदर्थान्वयव्यतिरेकेण ना

क॰
९२

© Dharmartha Trust J&K. Digitized by eGangotri

र्थांतरमात्रेतत्सदप्रयोगः यथाकृतेरतीतत्वदशायां पचतीतिलटोऽसाधुत्वात् वर्त्तमानेल
डितिवचनात् अत्रतुभेदांशानन्वयेपिनतस्यासाधुत्वप्रसक्तिरितिभेदातिरिक्तार्थान्वयेबा
धःस्यादेव अन्यथाइवपदाध्याहारवादिनस्तवापिकथंभेदानन्वयेपितदन्यार्थान्वयइत्य
तआह शक्यतेति तत्पदशक्तिपर्याप्त्यधिकरणेत्यत्रतात्पर्यं तथाचभेदानन्वयेतदन्यार्थ
मात्रस्यशक्तिपर्याप्त्यनधिकरणत्वात्तद्बोधार्थंलक्षणास्यात् अतएवपुष्पवंताविस्या
दावेकयोक्त्यापुष्पवंतोदिवाकरनिशाकराविति चंद्रसूर्ययोर्व्यासक्तशक्तिस्वीकारात्के
वलचंद्रत्वादिप्रकारकबोधेलक्षणयैवेतिसंप्रदायः ग्रंथांतरसंवादमप्याह अतएवेति
उभयत्रव्यासक्तायाःशक्तेरेकैमात्रप्रकारकशाब्दजनकत्वासंभवादेवेत्यर्थः प्रमाणशब्द
इति शाब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वेसतिशाब्दजन्य

© Dharmartha Trust J&K. Digitized by eGangotri

वाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वस्य प्रकृतिलक्षणत्वात्तत्र स्मृतिपुराणादिसाधारण्याप
प्रमाणशब्दमात्रएव प्रकृतिपदस्यात्र तात्पर्यं तत्र चैकैश्चित्खंडशक्तिस्वीकारेणशब्दस्य
प्रकृतिपरत्वं शक्त्येव विशिष्टशक्तिपक्षे विशेषणविशेष्यभावविनिगमकाभावेन गौरवात्
अतो न लक्षणेत्युक्तं तत्र च दूषणं व्यासक्तशक्तेस्तथाप्यनपायेन एकांशमात्रबोधकत्वेल
क्षणैव स्यात् इति न्यायमालायां द्वितीयसूत्रव्याख्यानावसरे जयरामभट्टाचार्यैरेव लिखि
तमिति अवश्यं व्यासक्तशक्तिमत्तां पदानामेकमात्रार्थबोधकत्वे लक्षणेति अत्रापि सा स्या
देवेति फलितार्थः । अत्रापीति इदं च त्वयाप्यवश्यमभ्युपेयं इवपदस्यापि व्यासक्तशक्ति
कत्वेन भेदविनिर्मुक्तान्यार्थबोधे लक्षणाध्रौव्यादिति भावः श्रौतीत्वेति ननु सादृश्येल
क्षणायां आर्थीउपमेति मते एतद्दोषसंभवेपि यत्पदार्थे विशेषणस्योपमानत्वनिय

© Dharmartha Trust J&K. Digitized by eGangotri

मस्तत्रैवम्प्नोतीति व्यवस्थापयतां जयरामभट्टाचार्याणां मते कथमेतदापादनं सादृ
श्यलक्षणायामपि लुप्तार्थे सादृश्यविशेषणतापन्नस्य कर्मादिकारकस्य उपमानत्व
नियमस्य क्षतिविरहादिति चेत्सत्यं सादृश्यलक्षणायामेवार्थत्वमिति व्यवस्थावादि
भिरप्येतत्पक्षमालम्ब्य लुप्तप्रत्ययस्य भेदादिप्रतीतिस्वीकारसंभवात् तान्प्रत्येवार्थत्वा
पादनात् न च तेषां मते त्रैष्ठापत्तिः उपजीव्यविरोधात् न चार्थान्तरमेव तदुपजीवनमिति
वाच्यं तदाप्रत्ययार्थत्वं कल्पयितेत्यादि पूर्वोक्तदूषणमेवमुभयसाधारण्येन तात्पर्यात्
तदेतदेवाह दिशितिइत्येकलुप्तोपमाविवरणम्॥ श्रीः अन्वेषयन्मरिच्यासि कंटक
कलितानि केतकीवनानि मालती कुसुमसदृक्षं भ्रमर भ्रमन्नपि न प्राप्स्यसि अत्र कुसुम
स्यैवोपमानत्वात्कथं तल्लोप इत्याशंकते यद्यपीति पूर्वोक्तरीत्या समाधत्ते तथापीति

© Dharmartha Trust J&K. Digitized by eGangotri

यत्तवसतीजायाअसत्यः सुभगद्वयं तत्किंस्फुटयत्तुवीजंतवसमानोयुवानास्ति तत्सह
शयुवांतराभावादेवत्वज्जायायाःपुरुषांतरसंगमाभावोऽस्माकंत्वस्वपतीनपहायत्वत्सं
बंधइतिकिमुभयत्रापिहेत्वंतरगवेषणायेत्यर्थः नत्वत्रत्वत्समानोयुवानास्तीत्यस्ययुवा
भावस्यबाधितत्वेनतत्सादृश्यरूपविशेषणाभावपर्यवसायित्वेनत्वत्सदृशाभावएवविव
क्षितइतिकथमुपमाअनन्वयस्यैवोचितत्वादित्यस्वरसादाह यद्वेति इदंचसर्वंमालत्या
दिनिष्ठसादृश्यप्रतियोगिनमित्यर्थस्वीकारप्रागुक्तनिष्कर्षरीत्यामालत्यादिप्रतियोगिक
सादृश्याश्रयमित्येवबोधाभ्युपगमेतुगोवर्द्धनाचार्यपद्यमुदाहार्यं वासरगमननोरपि
वियदवनिश्चवामनेकपदं जलधिरपिपोतलं — घ्यःसतांगतःकेनतुलयामः अत्रकेने
सामान्यनिर्देशादुपमानलोपः तुलयामइत्युक्त्यातस्यज्ञानाभावएवतात्पर्यंनत्वसत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

पि तत्सत्वेपिज्ञानाभावेनतत्प्रतियोगिकसादृश्याश्रयत्वेनप्रकृतत्वनिरूपणानुपपत्तिसि
द्धौअसत्वेतात्पर्यकल्पनेगौरवात् सतांमतः किंसमंब्रूमइतिचवाक्यगतंबोध्यं स्वरू
पतएवेति एतद्ग्रहस्यैवप्राचीनैरपरिगणनात् तद्धितेपीति तथाचात्रधर्मिणांपरिगणि
तत्वेपिविभागेन्यूनत्वमितिभावः समासंविनाउक्तसूत्रार्थानुपपत्तावेवतदन्यथानुप
पत्तिबलात्समासःस्यान्नत्वन्यथेतिसमासव्यतिरेकप्रयुक्तांसूत्रार्थानुपपत्तिंप्रदर्शयि
ष्यन्सूत्रार्थंव्याचष्टे इवार्थेति अनुपपत्त्यंशंविभज्यदर्शयति नचइवार्थइति इदंचप्र
सिद्धिवशादुक्तं सुप्सुपेत्यनेनापिसमाससिद्धेःकैयटेनाभिहितत्वात् वर्तेतइति स्वसम
वेतयथोक्तक्रियायांलक्षणयेतिभावः इवइतेति यद्यपिकाकागमनस्यचसमागमोयद्वृत्तेर्व
धोस्यकृतः उपनतमेतदकस्मादासीदुतकाकतालीयमितिचित्रमीमांसोदाहरणाभि

© Dharmartha Trust J&K. Digitized by eGangotri

अ.कौ.टी.
९५
95
ना:

प्रायकं तयोरिति काकागमनतालपतनयोरित्यर्थः तत्रैववाचकलोपमपिदर्शयति
इवशब्दस्यचेति अतर्कितेति काकतालीयोदेवदत्तस्यवधइतिवाक्याभिप्रायेण उक्ते
श्लोकेअकस्मादितिधर्मस्यापिनिर्देशात् तृतीयचरणस्यान्यथानिर्माणेतत्रापिधर्मलो
पोद्रष्टव्यः ननुकडारादी[illegible]मपिस्यात्तंत्रगुणप्रयोगायोग्यत्वात्तद्विभागोप्येवमसंगतः
स्यादित्यपरितोषादाह वस्तुतस्त्विति कैयटेनेति द्वितीयाध्यायेसमासइतिकैयटेन
विशिष्यानभिधानात्तच्छलांतरानुसरणेऔकडारादेकासंज्ञोप्रोक्तडात्समासेवृत्तिसूत्रे
इत्यर्थः पंचमाध्यायेइवार्थे तथाचइवार्थेसमासइतिकैयटव्याख्यानात्सिद्धंसमासस्ये
वसादृश्यवाचकत्वं तदर्थविहितवतिप्रत्ययादिवदितिभावः किंचत्वयापितदर्थेविहित
स्यतद्वाचकत्वमत्रैस्वीकृतमित्याह अवश्यंचेति तथाचछप्रत्ययस्यइवार्थेविहितस्य

रु:
९५

© Dharmartha Trust J&K. Digitized by eGangotri

सादृश्यवाचकत्वमभ्युपगम्यतत्प्रकृतिभूतस्यइवार्थविहितस्यैवसमासस्यसादृश्य
वाचकत्वेनास्तीत्यभिधानेतुरगारूढस्यैवतुरगविस्मरणमितिभावः। तद्धितप्रकृतिभू
तसमासगतोपमायाआधिक्यंनिराकृत्यतद्धितार्थोपमायाअप्याधिक्यंनिराकरोति
एवमिति उपमानपरत्वेति तालकृतकाकवधस्यैवोपमानतायाःसर्वसिद्धत्वात् तथाच
पंचमाध्यायेकैयटेनोक्तं तालेनतुयःकाकस्यवधःसदेवदत्तस्यदस्युनावधस्योपमान
मितिवधादिःकाकतालीयादिशब्दवाच्यःसंपद्यते छप्रत्ययप्रत्ययरास्यतत्परत्वेविनातदु
त्तरंतद्धितोनस्यादितिभावः नन्वुक्तसमासस्यसादृश्यवाचकत्वेमानाभावःअध्याहृता
दिवपदादेवतद्बोधोपपत्तेः नचइवार्थेविषयादित्यनुवादसामर्थ्यात्तथेतिवाच्यं तत्समा
सेनसादृश्यप्रतीतावेवतस्यतात्पर्यात् तस्याश्चइवपदादेवोपपत्तौसमासस्यतच्छक्तिक

कृ

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰को॰टी॰
९६
96

त्वनेगौरवात् ॥ यद्यपि समासाश्रुतिस्तत्रैव यदि समासोऽपि इवार्थे छप्रत्ययोऽपि तत्रैव तर्हि स
मासेनोक्तत्वात् छप्रत्ययो न प्राप्नोतीति शंकापरं भाष्यम् तदपि तत्समासात् सादृश्यप्रती
तिरित्येतावन्मात्रतात्पर्यकं अत एव तत्र कैयटेन वचनसामर्थ्यात्स्यादिति चेत् शस्त्री
श्यामादिभ्योऽतिप्रसंग इति व्याख्यातं नहि शस्त्रीश्यामेत्यादावपि समासस्यैव सादृश्य
वाचकत्वमिष्यते तत्र वाचकलुप्तायाः सर्वैरप्युदाहृतत्वादिति चेत् सत्यम् तथापि नात्र
वाचकलोपोपात्त्यपीत्यपिशब्देनोपमानलोपाभावस्य विवक्षितत्वात् तथाहि काकता
लशब्दयोस्तत्र गमनपतनयोर्लक्षणा सर्वसंमता तयोर्देवदत्तागमदस्युपनिपात
निष्ठोपमेयता निरूपितोपमानत्वं च सर्वेषां संमतं पंचमाध्याये कैयटेनाप्युक्तं वृत्ति
विषये काकतालशब्दो काकतालसमे वर्तते क्रियावाचिनो तत्र काकागमनं देवदत्तागमन

रु॰
९६

© Dharmartha Trust J&K. Digitized by eGangotri

स्योपमाने तालपत्त्रं दस्य उपनिपातस्येति एवं स्थिते लाक्षणिकोपमानवाचकपदयोः श्रूय
माणत्वात्कथमुपमार्थलोपः न च लक्षणास्वीकारेपि तत्र शक्त्यभावादुपमानलोप इति वा
च्यं उपमानार्थकशब्दस्य बलमात्रस्य विवक्षितत्वेन वाचकत्वपर्यन्तस्य वैयर्थ्यात्प्रमाणा
भावाच्च अत एव वाचकलुप्तत्वमपि सादृश्यार्थकपदमात्राभावे सत्येव एवं व्यवस्थापितं
विवक्षितं च सर्वेषां ग्रन्थकाराणां तथैव नहि सादृश्यलाक्षणिकपदयोगेपि लुप्तत्वस्वीकारे
आर्थीपूर्णोपमा कुत्रचिद्विषयमर्हेति आर्थोपमायां सादृश्यवाचकपदाभावनियमात् न
न्वेतदर्थमेव सादृश्यतद्विशिष्टान्यतरवाचकपदाभावे वाचकलुप्तत्वमिति रसगंगाधरादौ व्य
वह्रियते तत्र सादृश्यवाचकपदाभावेपि सादृश्यविशिष्टवाचकपदसत्त्वेन लुप्तत्वानापत्तिरि
ति चेत्सत्यं तथापि अस्मदपेक्षया गौरवं स्पष्टमेव सादृश्यार्थकपदाभावस्य वाचकलुप्तत्व

© Dharmartha Trust J&K. Digitized by eGangotri

अ·को·टी·
९७
97

व्यवस्थापकत्वे तु भयनिवेशापेक्षया लाघवस्य सत्वात् आस्तां प्रागेव बहुशो दूषितं प्रासंगिकमेतत्
प्रकृते उपमानार्थकत्वाल्लाक्षणिकपदसत्वान्नोपमानलुप्तत्वसंभवः यथात्रापि तूपमानवाचक
पदाभाव एवोपमानलोपव्यवस्थापको वक्तव्य इति चेत् गोसदृशादिकं तावत् स्पष्टमास्तां एवं क्यङ्प्र सति
त्ययेपि तूपमानलुप्तोपमा स्यात् न चेष्टापत्तिः केनाप्यनभिधानात् चित्रमीमांसारसगंगाधरयो
रपि क्यङाद्यावुपमानलुप्तानभ्युपगमाच्च ननु क्यङ्स्थले कथमुपमानलोपापत्तिरिति चेत् अव
हितो भव त्वादृशबुधाः ओजसोऽप्सरसो नित्यमिति तत्सूत्रस्थवार्त्तिकेन विशिष्य ओजायते इत्यत्र क्यङ्
प्रत्ययः सर्वसिद्धः तत्र च ओजःशब्दो लक्षणया तद्वत्पर इति वैयाकरणैः कण्ठत एव व्याख्यातं अस्ति
च तत्रैव वैदिकोऽपि प्रयोगः ओजायमानं अहिं जघानेति न चात्र मात्रलक्षणया दुस्सहत्वादिधर्मविव
क्षया ओजस एवोपमानत्वसंभवादिति चेत् न धर्मान्तरानुसरणक्लेशवैयर्थ्यात् ओजस्विनउ

क·
९७

© Dharmartha Trust J&K. Digitized by eGangotri

पमानत्वेविशेषणतयाउपस्थितस्यओजसएवसाधारणधर्मतायांलाघवात् पौलोमीकुचकुं
मकुंकुमरजस्वाजन्यजन्मोद्भूताःशीतांशोरुच्चयःपुरंदरपुरीसीमामुपस्कुर्वते एताभिर्लिहतीभि
रंधतमसान्युद्भूतीभिर्दिशःशोणीमा — एताभिरंतरतमंव्योमेदमोजायतेइतिमुरारिपद्येन
द्भूतएवोपमानतायाअवश्यवाच्यत्वात् किंच उपमानादेवकाण्डादयोविहिताः उपमानत्वंलक्ष्यै
थेस्यापिसर्वसंमतं अतोलाक्षणिकादपिउपमानविहितप्रत्ययोत्पत्तौनकिंचिद्बाधकं संकोचे
मानाभावात् स्वीकृतंचात्रैवत्वयापिलाक्षणिकशब्दात्तद्धप्रत्ययोरिकं तत्वेनविशेषणकाण्डादयो
लाक्षणिकान्नस्युः तत्रोपमानपदंसाक्षादेवश्रूयतेतद्धप्रत्ययेत्वाक्षेपादितिचेत् किंततःशास्त्र
तात्पर्यविषयत्वस्योभयत्रापितुल्यत्वात् अन्यथाततःप्रत्ययानुपपत्तेः तदुक्तं सूत्रेष्वेवहितत्सर्वं
यद्वृत्तौयच्चवार्तिकेइति अतएवाम्बाभिधानीमादत्तइत्यादौगर्दभाभिधानीव्याहृतेरशब्दभूताया

© Dharmartha Trust J&K. Digitized by eGangotri

अं·कौ·टी
९८
98

अपि येदतात्पर्यविषयत्वेन विधेयत्वपर्यवसानं अरुणैकहायन्या पिंगाक्ष्या सोमं क्रीणातीत्यत्र
मीमांसकमते अरुणयेत्यादीनां क्रियायामेवान्वयात् गवारुण्ययोः परस्परावच्छेदस्य पार्ष्णिकत्व
स्वीकारेपि तस्य शाब्दीयत्वं च अन्यथा न रुणया पिंगवा सोम क्रयापत्तेः ततश्च लाक्षणिकत्वा
त् क्यङादिप्रत्यये उपमानलुप्तत्वापत्तिर्दुर्निवारेव एवं साधारणधर्मादीनामपि लक्ष्यत्वस्थलेध
र्मलोपापत्तिरपि स्यात् तथा पुष्पवन्तौ सदृशौ मुखं इत्यत्रापि उपमानलोपापत्तिः पुष्पवत्पदस्यादि
एकयोक्त्या पुष्पवन्ताविति उभयाः व्यासक्तशक्तिमत्वेन चंद्रत्वप्रकारकत्वे सति सूर्यत्वप्रकारकशा
ब्दत्वं कार्यतावच्छेदकं त्वतंत्रं तत्र चंद्रत्वादिमात्रप्रकारकबोधत्वस्य तच्छक्तिज्ञानकार्यतानवच्छेदक
त्वात् तादृशबोधो लक्षणयैवेति स्वीकारात् न चेष्टापत्तिः काव्यसमभिव्याहारावर्थोत्तरानुसरणात्के
वलानुपपत्तेः लक्ष्योपमानकस्थल एव तत्त्वसौलभ्यात् तथैवास्त्विति चेत् पुष्पवन्ताविव रम्यं मुखं

कृ·
९८

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यादौ श्रौत्या अप्युपमानलुप्ताया उपपत्तेः नह्येदमपीष्टापत्त्या परिहर्त्तुं शक्यं तस्या आर्थत्वनि
यमस्य सिद्धांतसिद्धत्वात् त्वयाप्यभ्युपगमाच्च तत्रापीष्टापत्तिमभिदधानस्तु उन्मत्तप्राय एवो
पेक्ष्यः किंचैवं पुष्पवत्कल्पं मुखमित्यादौ तद्धितेऽप्युपमानलुप्ता स्यात् न चेष्टापत्तिः त्वयाप्यनं
गीकारात् तथापि त्वया तद्धितेऽप्युपमानलुप्ताभ्युपगतेव चंचत्क इत्यादाविति चेत् न हि इदं मां प्रत्या
पादनं येनेष्टापादनमित्यदोषः स्यात् किंतु त्वां प्रत्येव त्वया च तद्धिते उपमानलुप्तानभ्युपगमाद
निष्टापादनमेवेति ममापि तथैवाभ्युपेयमिति चेत् तर्हि स्वपक्षे लज्जा चेत्युभयपरित्यागात् स्पष्टमे
व निग्रहोऽङ्गीकृतः किंच पुष्पवद्रम्यं खेमुमिति वाक्ये कोपमानलुप्ता त्वयाप्युपमा स्यात् न चेदं मां प्र
तीष्टापादनमेव काकतालीयमिति तु प्रत्ययप्रकृतिभूतेऽसमासे तदानयनादिति वाच्यं तत्स्वयं ता
नुसरणाप्रयासात्तु पपत्तेः किंच पुष्पवंताविव मुखमिति वाक्येपि धर्मोपमेयोभयमैलुप्तोपमाप

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰का॰टी॰
९६

त्तिः तथाचकाव्यप्रकाशएवतदुपगमविरोधः किंचहुनाधर्मोपमानोपमेयार्थकलाक्षणिकपदा
न्युपादायसर्वत्रैवतद्वृत्तेलुप्तापत्तिरितिसंक्षेपः तदेतत्सर्वमभिद्योतयन्नाह अलंपल्लवितेनेति॥
असौसरससदंतमंडलकपोलप्रतिमागतोमृगाक्ष्याः अंतःसिंदूरितशंखपत्रकरणिंवहतिचंद्रः
प्रकृतोदाहरणांशंविविच्यदर्शयति अत्रमृगाक्षीति यद्यपिसप्तम्युपमानेत्यादिवार्त्तिकशरीरंमहा
भाष्याद्दृश्यतेतथापिप्रकृतोपयुक्ततयासप्तमीत्यंशंमपहायैववार्त्तिकंपठति उपमानेत्यादि।
उक्तवार्त्तिकविषयकंप्राचांव्याख्यानंदूषयति वस्तुतस्त्विति नन्वेतदसंगतं तथाहि यस्योपमान
पूर्वपदस्यपदांतरेणसहसमासोविधेयस्तत्रत्यंउत्तरपदंअत्रगृह्यतेनतुबहुव्रीहिरेवयेनद्वितीया
क्षिपरस्यलोपःस्यात् अतएवशाकप्रियःपार्थिवःशाकपार्थिवइत्यत्रशाकपार्थिवादीनामुत्तरप
दलोपश्चेतिवचनेनशाकप्रियेतिसमासेयदुत्तरपदंप्रियपदरूपंतस्यैवलोपोनतुएतद्वचनवि

क्रः
९६

धेयसमासोत्तरपदभूतस्य पार्थिवपदस्य किं बहुनाममम्युपमाने स्यादिप्रकृतवार्त्तिकेनेषय
त्रकरोद्धितं यस्य सकरधनइत्यत्रैव उत्तरपदलोपः सएवं समासे उत्तरपदभूतस्य छितशाद्स्ये
वनत्वे तद्धि धेय बहुव्रीहिसमासोत्तरपदभूतधनशाद्स्य करधनइति रूपासिद्धिप्रसंगात् एवं
चोक्तसंप्रदायस्य विरोधाभावात् कथमत्राद्धृतीया शब्दस्य लोपइत्युक्तमिति चेत् सत्यं यथा
श्रुतग्रंथात् उक्तदूषणप्रतिभासेपि ग्रंथस्याभिप्रायांतरेणैव प्रवृत्तत्वात् तथाहि संप्रदायादि
ति बहुव्रीहि पूर्वपदभूते उष्ट्रमुखेति शब्दे मुखशब्दएवोत्तरपदं न त्विवादिरपि येनोत्तरपदे तथा
इवादीनामप्युक्तवचनेन लोपः स्यादिति भावः। अत एवं इति अत्राप्युपमेयपदमुपमानपरमे
वकरणव्युत्पत्त्याश्रयणात् तथा चोपमानभूतमुखपदस्यैवोक्तवार्त्तिकेन लोपइव पदस्य चग
तार्थत्वादेवानिवृत्तिः स्पष्टं चेदं कैयटएव अत उभयोरप्युक्तवार्त्तिकेन लोपइति प्राचां व्याख्यानम

© Dharmartha Trust J&K. Digitized by eGangotri

युक्तमेव यद्गामुखपदस्यमुखसादृश्येलक्षणा उभयथापीवाद्यानांनोक्तवार्त्तिकेनलोपद्गतिभावः
समपदमिति सामान्यपदमित्यर्थः तेनसामान्यपदेनकारिकास्थेनउपमानलोपएववाचनिकइवा
दिनिवृत्तिस्तथोद्देश्येयद्यपिवैको विवक्षितइतिभावः नन्ववांतरवैचित्र्यसत्वेपिपृथगभिधानमनर्हं एवं
विधवैचित्र्यसद्भावसंभवादित्यतआह आकरेति आकारसंमतिमेवदर्शयति तथाचेति अनेको
पमाननिरूपितसादृश्यमित्यर्थः गेहमेववित्तरहितंनिर्झरकुहरमिवसलिलरहितीकृतं गोधन
रहितंगोधनमिवतस्यावदनंतववियोगे व्याधिरिववैद्यरहितोधनरहितःसुजनगेहवासइव रि
पुरुद्धिदर्शनमिवदुःसहस्तववियोगः केचित्तुसामान्यधर्मानुपादानेपितदाक्षेपकस्यशाब्दत्वं
यथा वाप्यांस्नातिविचक्षणोद्विजवरोमूर्खोथवर्णाधमः फुल्लांनास्यतिवापसोपिहिलतांवानाभि
ताबर्हिणा ब्रह्मक्षत्रविशस्तरंतिहियथानावातथैवेतरस्त्वंवापीवलतेवनौरिवजनेष्वध्यासि सर्वे

© Dharmartha Trust J&K. Digitized by eGangotri

भज अत्रसर्वोपभोग्यत्वरूपधर्मोपपादकमाद्यंतेदाहरणत्रयं धर्मइति श्रूयमाणइतिपूर्वेण
न्वयः। ज्वलतिवडवानलइवस्फुरतिचशैलइवरामवर्णैर्भिहतः रसतिजलदइवोदधिःक्षुभितोलं
घयतिमारुतइवनमस्तलंसेतुकाव्येश्रीरामशराहतसमुद्रक्षोभवर्णनम् अत्ररावैर्मणाभिहत
त्वंसमुद्रांशेतत्तद्भिन्नधर्मप्रयोजकमितिएवमादिशेषः सूर्यस्येवेति ऋषिस्तुतिरपियंअथाप्यु
षयःस्तुयंतइतिनिरुक्तकारोक्तेः वक्षथइति महदर्थेकं वसिष्ठाइति श्रेष्ठार्थकंसंबोधनं वा युष्मा
नू अन्वेतवे अन्वेतुंअनुकर्तुमितियावत् तुमर्थार्थेतवेप्रत्ययःछांदसः श्येनेति भरतकारिकायां
श्येनादिपदानांतत्तदसिलक्षणा बहुष्विति अनेकप्रतियोगिकसादृश्यस्यउपमेयोत्कर्षातिशया
धायकवत् एकप्रतियोगिकानेकवृत्तिसादृश्यस्यएकप्रतियोगिकैकवृत्तिसादृश्यापेक्षयाविलक्ष
णचमत्कारजनकत्वंनास्तीत्यस्यपृथगस्माभिरनुक्तिरित्यर्थः। इयंचेति यथाएकस्मिन्नुपमेये

© Dharmartha Trust J&K. Digitized by eGangotri

एकप्रतियोगिकसादृश्यवर्णनं अभिन्नधर्मे निवास्यं तद्वद्दिशापि उपमानैरेव भिन्नधर्मसंभवादि
त्यर्थः हरिवंशेपीति वज्रनाभवधे प्रभावतीं प्रति प्रद्युम्नस्योक्तिः बहूपमानकबहूपमेयकोपमा
याः भरतकारिकाद्वित्तीयार्द्धोपदिष्टायाः समुदाहरणं इत्थं सामान्यधर्मैक्य इत्येव तद्देतादृ
अत्रैवेति अधर इवेति माधुर्यं अधरस्यानुभवसिद्धो रसविशेषः उक्ते स्तु गुणविशेषः तथा च भ
रतः बहुशोयच्छ्रुतं वाक्यमुक्तं वापि पुनः पुनः नोद्वेजयति तस्माद्धि तन्माधुर्यमिति स्मृतं विशद
वर्णत्वं स्वच्छरूपत्वं उक्ते स्तु प्रसादरूपो गुणः स च भरतेनोक्तः अप्यनुक्तो बुधैर्यत्र शब्दोर्थो वा
प्रतीयते सुखशब्दार्थसंयोगात्प्रसादः परिकीर्त्तितः यद्यप्युपमेयोपमायां सादृश्यार्थकश
ब्दस्याप्यैक्यनियमो दृश्यते तथाप्यत्रोपमेयस्याभिन्नपदार्थत्वात् इवादेरप्यनियमे दोषाभावा
त्कि पदानंतरवर्तिप्रत्ययप्रयोगः यदि तु इवादि पदैक्येपि प्रमाणमुपलभ्यते तदा उक्तिरिवेत्येव

© Dharmartha Trust J&K. Digitized by eGangotri

पाठो द्रष्टव्यः वक्रत्वमिति दृशो वक्रत्वमपांगविजृंभणात् गतेश्च विलासहेतुकवैलक्षण्या
त् धियस्तु सूक्ष्मार्थग्राहित्वात् वाण्यास्तु तादृशार्थगर्भत्वात् भ्रुवः संस्थानविशेषवत्वादिति
बोध्यं संतीति हर्षचरिते बाणस्योक्तिः उत्पादकानूतनार्थोत्प्रेक्षणासमर्थाः पक्षे अष्टचरणत्वे
नतद्रुतपादाः केषांचित्सुकवीनां सत्वात् कविता वच्छिन्नाभावो क्तौ बाधवारणाय बहुवइति अ
न्यप्रतियोगिकेति यद्यप्युपमायाः सादृश्यरूपतया प्रयोज्यत्वाभाववत्वमित्येतावतैव निर्वाहो
भवत्येव तादृशप्रयोज्यत्वाभाववत्स्वशक्तसादृश्यकत्वमित्युक्त्या च उपमेयनिष्ठत्वमस्यायाति
न तु सादृश्यनिष्ठत्वं तथापि प्रतियोगितारूपोपमापक्षमभिसंधाय स्वपदस्य प्रतियोगित्वपर
तयान्वृत्तिपदस्य च निरूपितार्थकतया उक्ताभावविशिष्टस्वनिरूपितसादृश्यकत्वमित्यर्थपर्यव
सानं बोध्यम् उग्राढेति राघवपांडवीयकाव्ये पुरारंभवर्णनं आद्यविशेषणस्य निविडदुर्दिन

© Dharmartha Trust J&K. Digitized by eGangotri

तयाचंचलत्वेन वृत्तिरित्यर्थः आरात्समीपतआरब्धंगात्रस्यमलनंयेनमलिनपटवासेस्यामलनं
स्पर्शेनमर्दितमितिविग्रहः अहमिति मालविकाग्निमित्रनाटके अग्निमित्रस्यराज्ञउक्तिः कर्णेनेवे
ति मुद्राराक्षसे अमात्यराक्षसोक्तिः विष्णुगुप्तस्त्वाणक्यइत्यर्थः हिडंबाया राक्षस्याअपत्यंहैडं
बेयः घटोत्कचइतियावत् यथाकर्णेन अर्जुनवधार्थमवस्थापितयाशक्त्याश्रीकृष्णेनयत्नादवि
घ्नकरतयास्ववध्यत्वाभिमतोघटोत्कचोघातितः तथाचंद्रगुप्तवधार्थंराक्षससंज्ञेनामात्येन
स्थापितयाविषकन्यकयाचाणक्येनाद्धराज्यहारितयास्ववध्यःपर्वतकःसंज्ञोराजाघातितइ
तिसमुदायार्थः ' प्रियइवेति नैषधानंदनाटकेशुष्कतडागमालोक्यनलवचनं वर्षोदकमिति मृ
च्छकटिकाख्यनाटकेचारुदत्तोक्तिः ' लेखेति चंद्रलेखायाःषोडशभागात्मककलायाबाहुल्यकलापि
कायाःकामशास्त्रादिकलाभिन्नत्वात् रसस्यशृंगारस्यजलस्यचेत्यर्थः निःकेतवमिति कांतिपक्षे

© Dharmartha Trust J&K. Digitized by eGangotri

अन्यापेक्षापकर्षरहितमितीच्छापक्षेनिरुपधीत्यर्थः सुखस्यस्वतःपुरुषार्थत्वेननिरुपधीच्छाविष
यत्वात् रसगंगाधरादौ आदिपदेनचित्रमीमांसासंग्रहः कथमिति नामार्थतयातादात्म्य
संबंधेनैवान्वयस्ययुक्तत्वादित्यर्थः तदभेदेति धर्माभेदेत्यर्थः तदेवदर्शयन्नाह धर्माभेदेति
किंत्विति विद्यमानसत्यारोपसरच्छिन्नतयोरभेदारोपेलालाज्ञिहंसाभेदारोपाभ्युपगमादितिभा
वः सर्वेति वस्तुतोभिन्नयोःपरस्परसादृश्यादभिन्नतयाध्यवसितयोर्द्विरूपादानंबिंबप्रतिबिं
बभावइतिचित्रमीमांसादर्शनात् असाधारणानामपिधर्मांतराणांसादृश्यमूलेनाभेदाध्यव
सायेनसाधारणत्वकल्पनादुपमासिद्धिरितिरसगंगाधरदर्शनाच्च इत्थंचभेदस्यस्फुटप्रतिप
त्त्यर्थमुक्तं अनुगामिस्थलेपिवस्तुतोमुखचंद्रादिगतरमणीयत्वादेर्भिन्नतयातादात्म्याध्यव
सानंविनानुपपत्तेरितिबोध्यं किंचबृहदारण्यकश्रुतौयथावृक्षोवनस्पतिस्तथैवपुरुषोमृषा

© Dharmartha Trust J&K. Digitized by eGangotri

अ.कौ.टी.
१०३
103

तस्यपल्लोनिलोमानिलगस्योत्पाटिताबर्हिः इत्याद्यनंतरंआख्यानांतरतोदारुणिमज्जामज्जो
पमाकृताइत्यत्रधर्मसादृश्येनधर्माभेदेनवैभौत्युभयोमपिउपमालिप्यत्तिःस्फुटैव एवमन्यत्रा
पीतिदिक् एतदस्वरसस्तवनायेवाह यस्येति एधार्यंतइति सकारांतादेधसशब्दात्क्यङ्
प्रत्ययेसकारलोपः अकारांतादेवतत्प्रत्ययेतुस्पष्टं व्याख्यातमिति उत्कृष्टव्यक्तिवृत्तित्वमे
वजातेरुत्कृष्टत्वमित्यर्थः उत्कर्षोपकर्षौचोपमेयापेक्षयाबोध्यौ तत्स्थानीयेति तत्प्रतिबिं
बभूतेत्यर्थः निद्रामंदेति अत्रआद्यचरणोक्तस्त्रीधर्मस्थानीयधर्मस्यविद्युद्वल्लीष्वनुपादाना
स्य दुपमानेधर्म[illegible]हानिरित्यर्थः यदितुतद्विशेषणंतत्समयपयोग्यतामात्रेणस्त्रीष्वनिर्दिष्टम
तोनदोषइत्युच्यतेतर्हिवीरस्मितिशावणविशेषणप्रतिबिंबधर्मस्यमेघदिश्यनभिधानान्यू
नत्वमवधेयं शावणमेघयोरप्युपमेयोपमानत्वपर्यवसानात् स्तनादीति षष्ठीसमासेनना

कौ.
१०३

© Dharmartha Trust J&K. Digitized by eGangotri

भिग्रहणात् तदाद्यपेक्षयेति मध्यमपदलोपादिनार्थो बोध्यः। उपमानोपमेययोः स्त्रीत्व
क्लीवत्वरूपलिंगभेदमुक्ता क्लीवत्वपुंस्त्वभेदमाह यथावेति अत्रैवोपमेयस्य स्त्रीत्वेनापि लिं
गभेदमाह च्युतासीति शुद्धाः शर्करादिमधुरद्रव्यसंयोगहीना पक्षे शुद्धत्वं अन्यविषयका
नुरागहीनत्वं कुलवधूः पतिव्रतेत्यर्थः लिंगभेदोप्यत्र बोध्यः अन्योन्याश्रयादिति नचैवंपरं
परितोपमा॰ पक्षयोरुभेदापत्तिरिति वाच्यं प्रकृतरश्मीनामर्थानां च सादृश्यहेतुधर्मस्याप्य
प्रसिद्धत्वात् परस्परसादृश्यापन्नकाव्यचंद्रसंबंधित्वस्यैवार्थरश्मीनां साधर्म्यस्य वाच्यत्वा
त् अर्थरश्मीसाधर्म्योत्पूर्वैवकाव्यचंद्रसादृश्यस्यैवासिद्धेः मुद्रारेरं तः पुराख्यारोपेचसुखसंचा
रास्य हेत्वादि॰ नापिनिर्वाहात् असंभवश्चेति चंद्रिकायांपद्मस्य सकुलितत्वनियमात्
ननुमुग्धे॰ वचंद्रिकेत्युत्प्रेक्षैवास्तु तत्र वा सासंभवोनदोषः प्रत्युतानुकूल एव यत्रापुनर

© Dharmartha Trust J&K. Digitized by eGangotri

यंलोकादप्रसिद्धः कविकल्पित इत्यादेरुत्प्रेक्षाव्यवस्थापकत्वादिति चेत्सत्यम् उपमात्वविवक्षायामेव दोषत्वा
भिधानान्न दोषः नलिंगेति एतद्रहस्यं तु प्रागेव प्रपंचितं अनुभवन्निति रघुवंशे वसंतवर्णनम्
पटुरपि निपातैः समर्थोपात्यर्थः भुजो लतेइवेति उपमितसमासः प्रियकंठग्रहस्य भुजसाध्यतया
तत्प्राधान्यापवादकरूपकानंगीकारात् यमकारो भवेदेकांश्लोवेवोशत्लोत्तथेतिलकारडका
रयोरैक्यानुशासनाद्यमकनिर्वाहः उपमानोपमेययोः स्त्रीत्वपुंस्त्वभेदमुदाहत्य क्लीवत्व
स्त्रीत्वाभ्यां भेदमुदाहरति यथा चेति गुरुः सदसीति साक्षादनुनयानर्हत्वसूचनं पदांभेशि
रःछायोपनयनं प्रसादार्थप्रणामाभिप्रायं उत्तरार्द्धे वाष्पस्यागो मानभंगसूचनार्थः निर्मुक्ते
ति अनर्घराघवे दशरथं प्रति विश्वामित्रोक्तिः निर्मुक्तो मुक्तकंचुकइति सर्पप्रकरणेऽमरः अत्रे
शेषादीनामुपमानानां पुंस्त्वं यशसां तु क्लीवत्वं स्त्रीलिंगोपमाने साधारणधर्मे समासमुदा

© Dharmartha Trust J&K. Digitized by eGangotri

हरति यथाचेति मुक्तमिति माघैरेवतकवर्णनं उपमाप्रपंच इति सादृश्यपर्यवसायित्वा
त्तथात्वमित्यर्थः शुद्धांतेति शाकुंतलमालोक्य दुष्यंतस्योक्तिः शुद्धांतश्चावरोधनमि
त्यमरः अत्रैववचनभेदमप्युदाहरति एवमिति जनस्यैकवचनांतत्वात्तल्लतानांच
बहुवचनांतत्वादित्यर्थः सत्पक्षेति न्यायकुसुमांजलावाचार्याणां मंगलाचरणं
न्यायः पंचावयववाक्यं सप्रसूनांजलिरिवेत्युपमितसमासः सतिप्रामाणिके पक्षेसा
ध्यधर्मिणि प्रसरः संबंधो यस्य सतां परामर्षे कुशलानां परिसर्वतोभावेन मलः संबंधः व्या
प्तिरितियावत् विमर्दनं विरोधितर्कोद्भावनेन विम्लानः स्वकार्यसाधकत्वाभाववर्हितः
अम्लतमोक्षः पक्षसुगंअन्वयिव्यतिरेकि रूपं पक्षे पक्षपदं दलपरं सतामनुपहतघ्राणेंद्रि
याणां परिमल आमोदः विमर्दनमुपभोगः अम्लत्त सहृशगरस हेतो माध्वीकस्य मकरंदस्य

© Dharmartha Trust J&K. Digitized by eGangotri

जनकः अंजलिशब्दस्याप्यत्रैकवचनांतत्वात्कथं वचनभेद इत्यत आह ॰अत्रेति तथाचविवक्षितेव
चनभेद एव यद्वा व्याख्यानवाक्यमेवोदाहरणमितिभावः अन्यत्राप्यौचित्यवशात्प्रतिप्रसवं आ
तथानिंदायामिति उपश्लोकयतिरस्कारप्रतीतिर्हि जातिहीनस्य त्वत्वे दूषकताबीजं तस्यैवावि
वक्षायां तु बीजाभावान्न दोषत्वमित्यर्थः उपमानपदेनेति तद्वाचकपदेत्यर्थः वाचकत्वस्य
षष्ठ्यर्थत्वात् ॰प्रसिद्धिंतीति मालतीमाधवे मकरंदोक्तिः कलभः करिशावक इत्यमरः कू
टपाकलो गजानां वातरोगविशेषः गर्जवातात्मको हन्यात्तथा वै कूटपालक इत्युक्तेः सु
कुमारेति नववयोवस्थायाः प्रतीतेरित्यर्थः तथाच सुकुमारकायमित्यस्य कलभांशा
न्वयेन मानमिति भावः द्व्यहरेरिति चूर्णोति चंद्रः क्रमुकति कनकगिरिः खदिरसार इति ख
दांशुरिति रसभैंतरंगिण्यामुत्तरार्द्धे काव्यप्रकाशेति शब्द इतस्तात्पर्यतश्च तदर्थस्यात्रानु

© Dharmartha Trust J&K. Digitized by eGangotri

वादइति ततोर्वाचीनो क्षीनामपित्तदुक्तिमध्येनिवेशोनदोषः । ऽप्रत्यमिति उइतिपादपूरणे यमी
तिसंबोधनं । लिवुआशाचस्यछंदसित्वतापर्यायत्वमित्यभिप्रेत्याह लतेवेति प्रत्यग्रेतिवत्सरा
जोक्तिः विविक्तत्वंरमणीयत्वं कोसुंभेति शेषिकोऽपर ऽप्रग्निरिवेति नचवेदवक्तुरशान्त्यनुन्न
यनात्कथंदोषत्वमितिवाच्यम् नह्येषांतदुन्नायकत्वेनदोषत्वंकिंतुबोधविलंबरसापकर्षादि
जनकत्वेनैवतस्यचलोकवेदयोरविशिष्टत्वात् पुत्रमिति रघुंप्रतिकौत्सवाक्यं आशास्य
मन्यत्पुनरुक्तभूतंश्रेयांसिसर्वाण्यधिजग्मुषस्तेइतिपूर्वार्द्धं । रेपोषमित्यत्रेरेषशब्दोधना
र्थकइतिदर्शयन्नाह धनेनेति अर्थरैविभवाअपीत्यमरः उपमानोपमेयोभयविशेष्यक
बोधउपमादुष्टत्वव्यवस्थापकेनायकेश्चिदाश्रितोप्यन्यैःप्रथममेवनिरस्तइत्याशंकते नचे
ति उतोइति उतत्वःपश्यन्तइदर्शकचमुतत्वःपश्यन्नदृष्टलोत्येनांइतिपूर्वार्द्धं उतेत्यपिशब्दा

© Dharmartha Trust J&K. Digitized by eGangotri

र्थे त्वशब्दः सर्वादिरन्यपर्यायः प्रत्यक्षेणाशब्दस्यैस्वरूपमुपलंभमानेपिप्रकृत्यादिविभागतद
र्थापरिज्ञानान्नसम्यग्वेत्तीत्यविद्वन्निंदापूर्वार्द्धार्थः उत्तरार्द्धार्थेत्वाह महाभाष्येति एतेनता
दृशबोधस्यप्रामाणिकत्वसूचनं उशतीत्यस्यविवरणंकामयमानेति तन्वमित्यत्रअभिपू
र्वइत्यत्रवाछंदसीत्यनुवृत्तेर्यणादेशस्तस्यविवरणं स्वमात्मानमिति विवव्रेइत्यस्यछाद
सत्वकारव्यत्ययेनलडर्थेकत्वमित्याह विवृणुतइति प्रकाशयतीत्यर्थः त्वस्मैअन्यस्मैइत्य
त्रभेदस्यप्रतियोग्यपेक्षायांपूर्वार्द्धोपस्थितस्याऽविदुषएवतत्वेनान्वयः तथाचविद्वानत्र
लभ्यतइत्याह वाग्विदइति चक्षुषएवेति चाक्षुषज्ञानएववीक्षणस्यनिरूढत्वात् नन्वे
वंतदैक्षतबहुस्यांप्रजायेयेत्यादावीक्षणपूर्वकसृष्टिश्रवणादचेतनस्यसांख्याभिमतस्यप्र
धानस्यजगत्कारणत्वंनेत्यर्थकस्यईक्षतेर्नाशब्दमितिवेदांतसूत्रस्यानुपपत्तिः ब्रह्मणोपि

© Dharmartha Trust J&K. Digitized by eGangotri

वि

चाक्षुषज्ञानाभावेनत्रापीक्षणस्यगौणत्वापत्त्यागौणत्वेनतस्यकार्योन्मुखत्वमर्थमाश्र
यप्रधानेपितदंशस्यसंभवेनसांख्यमताद्विनिगमकाभावादितिचेत्सत्यं तथापिवेदां
तमतेशिष्टवाचकस्यसामान्यपरत्वेलक्षणायामपिशक्यतावच्छेदकव्यापकजातिपरत्वं
सांख्यमतेतुतदपिनेतिविशेषसंभवात् वस्तुतईक्षतेर्ज्ञानसामान्यवाचकत्वेपिप्रकृत
संगतेः पक्षस्यापिस्वचाक्षुषहेतुत्वात्कारणत्वमात्रमुपेक्ष्याह करणत्वमिति अश्वप्रा
धान्यादिति रूपकसमासेउत्तरपदार्थस्यविशेष्यत्वनियमात् वीक्षणानुपेति ग्प्रधानस्य
करणत्वेनवीक्षणंप्रत्यन्वयानुपपत्तिरयोग्यत्वादित्यर्थः नचेति तथाचअश्वसदृश्यादृशे
तिपूर्वपदार्थप्राधान्यात्अन्वयोपपत्तिरित्यर्थः सामान्यधर्मेति उपमितंव्याघ्रादिभिःसा
मान्याप्रयोगे इतिवचनात्सामान्यधर्मप्रयोगेउपमितसमासविरहात् तस्मादिति वि

© Dharmartha Trust J&K. Digitized by eGangotri

अ.का.टी.
१०७
107

षयिणोऽन्नस्यविषयम्. तद्व्याकारात्म्यापत्त्येववीक्षणक्रियायामुपयोगात्. ननुधर्मान्तरप्रयुक्त
साम्यविवक्षायामपिप्रसन्नत्वरूपसामान्यधर्मप्रयोगात्कथंसमासः सामान्यधर्मसामान्या
भावएतद्विधानादित्यतआह उपमानिमित्तेति विवक्षितेत्यर्थः तथाचसाम्यप्रयोजकत्वा
भिमतधर्मसामान्यवाचकपदाभावेसमासविधानात्तत्रापिधर्मेनिष्ठाभिमतत्वाभावप्रयुक्त
विशिष्टाभावसत्त्वात्समासइतिभावः भाष्याब्धिरिति क्वाहंमंदमतिस्ततः छात्राणामुपहा
सत्वंयास्याम्यपिपिशुनात्मनामितितदुत्तरचरणत्रयमित्ययं केयटस्यप्रयोगः नह्निभाष्याब्धि
रितिरूपकंविवक्षितं प्राकृतभाष्यप्राधान्यभंगापत्तेः अतोवितततदुरवगाहत्वादिधर्मप्रयुक्त
साम्यविवक्षयागांभीर्यस्यतत्प्रयोजकत्वमपह्नूयतत्सत्त्वेपिउपमितसमासाभ्युपगमादि
त्यर्थः नचतत्राप्येतन्मतेपरिणामाभ्युपगमेनैवभाष्यप्राधान्यसंभवात्कथमेतदुपन्यासः

जं:
कः
१०७

© Dharmartha Trust J&K. Digitized by eGangotri

पक्षसमत्वादिति वाच्यं सूत्रस्य यथोक्तार्थकत्वेन अतिरिक्तकल्पनायोगात् न च सूत्रे एणसा
मान्याप्रयोग इत्येवोक्तत्वात् उक्तरीत्या तदर्थसंकोचोनुचित इति वाच्यं सामान्यैप्रयोगस्य
बाधितत्वात् उपमानिमित्तत्वेन धर्मविशेषणोपि धर्ममात्रस्योपमानिमित्ततया बाधितादेव
स्थ्यात् तदुपमानिमित्तत्वेन विवक्षितो वा धर्मस्तदप्रयोग इत्येव सूत्रार्थपर्यवसानात् बाध
काभावादिति प्रत्युत श्चार्वंश्चादमित्यस्य रूपकसमासं प्रत्येव बाधकत्वादित्यपि बोध्यं प्रकारां
तरेण परिणामप्रत्याख्यानमाह एवं चेति वदनमात्रस्येति चंद्रपदार्थतादात्म्येन प्रकारताम
नापन्नस्येत्यर्थः शिशिरीकारकत्वेति मुख्यतदित्यर्थः स्वरूपेणेति तादात्म्यसंबंधावच्छिन्नांमु
खविशेष्यतानिरूपितां प्रकारतामनासाद्येत्यर्थः। ननु उभयप्रतियोगिकाभेदस्य कथं रूपकत्वं
उपमेयविशेष्यकोपमानाऽभेदारोपस्यैव रूपकत्वप्रसिद्धेरत आह विषयेति भावप्रत्ययाव

मात्र ˅

यो

© Dharmartha Trust J&K. Digitized by eGangotri

अ·को·टी·
१०८
108

ष्यप्रतियोगितावच्छेदकपदार्थयोरुभयत्रान्वयः तदन्यतरेति उपमेयोपमानान्यतरेत्यर्थः रूपक
प्रकरणाद्वक्ष्यमाणरीतिमनुसंधायाह एवंचेति विषयेणेति तत्रपूर्वनिपातनियमानुरोधेनपूर्व
पदार्थस्यैवविशेषणत्वाभ्युपगमात् वाक्येतुविवक्षाविशेषवशादुभयस्यापिविशेषणत्वसं
भवात् कथंचित्स्यादपितथाबोधइत्यतःसमासइत्युक्तं एतच्चसर्वमग्रेस्फुटं लक्षणेति चंद्र
पदस्याह्लादकत्वेयोगसत्त्वेपिपंकजादिपदवद्रूढ्यर्थविशेषणत्वेनयौगिकार्थबोधस्यावयवशक्त्यर्थ
बोधस्यनियमितत्वात्केवलयौगिकार्थबोधायलक्षणायाआवश्यकत्वात् लक्षणादेति गौण
सारोपलक्षणायाइत्यर्थः अनुत्कर्षेणेति अभेदानुयोगित्वेनवर्णनीयप्रतीतेरेवतदुत्कर्षबो
धकतयाउभयःसंमतत्वात्तद्वैपरीत्यकल्पनेमानाभावात् संभवादिति नचात्रापितादृशं
ति[illegible]रूपसामान्यधर्मप्रयोगोस्त्येवेतिवाच्यं तन्निमित्तकसाम्यस्यानभिमतत्वात् आ

रि

रू·
१०८

© Dharmartha Trust J&K. Digitized by eGangotri

ननस्मितपदोत्तरतृतीयायाअभेदोऽर्थः विरहिणामपीति सर्वेयुवतोषजनकत्वस्यनतोला
भादित्यर्थः स्फुतिविरहेणेति योपेत्यस्यपृथक्पदत्वेबाधकाभावादित्यर्थः नचात्रसमासवि
वक्षायांकागतिः मुखस्मिताभिन्नचंद्रज्योत्स्नयोरवात्रउपमानिमित्तत्वादुपमितसमासा
संभवादितिवाच्यं प्रागुक्तरीतेरवाश्रयणीयत्वात् विद्याधरणेति राजपदेनचंद्ररूपविषये
निर्दिष्टेतत्रारोप्यमाणस्यनृपस्याक्रमणरूपकार्योपयोगिनःप्रतीतेःपरिणामोव्यज्यतइ
त्यर्थः उभयार्थत्वादिति राजाप्रभोनृपेचंद्र इतिकोषदर्शनात् वाच्यत्वादिति तादात्म्यंप्रतियो
ग्यनुयोगिनोःशब्दोपात्ततयामुखचंद्रेणस्यादितोविशेषोनिरुक्तेः पदैक्यभेदयोरप्रयोजकत्वा
दन्यथाविद्यमानसत्त्यादावपिवाच्यरूपकांगीकारविरोधापत्तेः एतेनेति चित्रमीमांसायांहि
परिणामध्वनित्वंदूषितं तत्रह्यारोप्यमाणस्यनृपस्यनृपात्मनैवकर्मत्वेनाक्रमणोपयोगेन

© Dharmartha Trust J&K. Digitized by eGangotri

नतु चंद्रात्मनेति विषयतादात्म्यापत्त्या प्रकृतानुपयोगादिति रसगंगाधरे तु परिणामध्वनित्वं यु
क्तमेव विजृंभणं हि प्रागल्भ्यमात्रं न कवेरभिप्रेतं येन यशःकर्तृकात्क्रमणेन रूपात्मनैव विषयिणो
रूपस्य कर्मता रूपत्वउपयोगः स्यात् किंतु स्वसमानजातीयद्वितीयराहित्यरूपः प्रौढविशेषः आक्र
मणं तु न्यक्कार एव एतादृशविजृंभणे चंद्रकर्मकस्य वाक्रमणस्योपयोगान्नतु रूपकर्मकस्य
तेन यथोक्तप्रागल्भ्यानुपपत्तेः एवं च विषयित्वेन अध्यस्यमानस्यापि रूपस्य विषयभूतं चंद्रा
त्मनैव प्रकृतोपयोगाद्विद्याधरोक्तं निरवद्यमेवोक्तं तदुभयमप्यनुपपन्नं रूपस्यापि राजप
दार्थतया परिणामस्य व्यंग्यत्वायोगादित्यर्थः अर्थशक्तीति यद्यप्ययं शब्दशक्तिमूलत्वेनैव
तत्र लिखितः पयोधरपदस्य परिवृत्त्यसहत्वात् तथाप्यर्थशक्तिमूलपरिणामध्वनिप्रकर
णे इत्यत्र समाप्त इति विशेषो बोध्यः अत्र तापशमनहेतुत्वेनोपस्थितेः पश्चान्मंदरूपसंबोध्य

© Dharmartha Trust J&K. Digitized by eGangotri

अ·का·डी·प्र·१६९

विप्रेष्यकस्मरतापकतावैशिष्ट्यबुद्धौ सत्यां सहृदयस्य तादृशतापशमकरमणीयस्तनरूप
विषयताद्रूप्यबुद्धिर्भवतीति परिणामध्वनिरिति तस्यार्थः तस्माद्यत्रनानार्थशब्दस्यैकत्र तात्पर्य
नियामकं प्रकरणादिकमस्ति तत्रैव परिणामस्य व्यंग्यत्वं युक्तमिति ध्येयं तथा इंदुनापरसोद
ये सिंधुना वं ~~संस्म~~ धुना विना ममायं विषमस्तापः केन वा शमयिष्यत इत्यत्र वकुर्विरहित्वेन
न व्यंग्यरमणीयमुखाभिन्नत्वेनाभिमतस्येंदोर्विरहसंतापशमनहेतुत्वात् मुखचंद्राभिन्नत्वेन बो
धितेन विरहतापशमनरूपप्रकृतकार्यानुपपत्तेश्चेंदस्य विषयिणो विषयभूतमुखाभिन्नत्वं व्यं
ग्यमिति परिणामध्वनिर्युक्त इत्यप्यवधेयं यदपि तारानायकशेखराय जगदाधाराय धाराधर
छायाधारककंधराय गिरिजासंगैकशृंगारिणे नद्याशेखरिणे दृष्टातिलकिने नारायणेनाश्रि
णे नागैः कंकणिने नगेन गृहिणे नाथाय सेव्यं नतिरिति वैयधिकरण्येन परिणाम इति चित्रमीमां

© Dharmartha Trust J&K. Digitized by eGangotri

सोक्तं तत्र दूषितं रूपकमेवेदं न तु परिणामः गिरिजासंगैकशृंगारिणि भगवति भवे प्रणामस्य प्रक्रांत
त्वात् शृंगारितया च शेखरादिभूषणानामपेक्षितत्वात् आरोप्यमाणानां शेखरादीनां स्वरूपेणोवो
पयोगात् न तु नद्यादितादात्म्येनेति नद्यादिपदोत्तरमभेदार्थकतृतीयावशान्नद्यादितादात्म्येन शे
खरादीनामवगमाद्विषयाभिन्नत्वेन विषय्युपस्थितौ सत्यामपि विषयतादात्म्येन प्रकृतानुपयोगात्
इति तदपि चिंत्यं नारायणेनाश्लिष्टो इत्यंशस्य शृंगारितायामनुपयोगात् तदुपादानबलेन प्रकृ
ते शृंगारित्वस्य नमस्कार्यत्वं प्रयोजकत्वावगमात् अन्यथा क्रमभंगापत्तेः अस्त्रस्य नारायणताद
त्म्यापत्त्यैव तद्गुणीभावेन शिवोत्कर्षपर्यवसानात् केवलशेखरादीनां शृंगार्यंतरसाधारण्येन न
द्यादितादात्म्यापत्त्यैव तदुत्कर्षापगमाच्च एवं द्विभावः पुष्पकेतोर्विबुधविटपिनां पौनरुक्त्यं विक
ल्पश्चिंतारत्नस्य दीप्सातपनतनुभुवो वासवस्य द्विरुक्तिः इत्थं देवस्य दैत्याधिपमथनकलाकेलि

© Dharmartha Trust J&K. Digitized by eGangotri

३२

कारस्य कुर्वन्नानंदं सज्जनानां जगति विजयते श्रीनृसिंहः क्षितींद्रः इत्यत्र यद्रूपणमुक्तं राज्ञो नृ
सिंहस्य प्रतिपिपादयिषितो कोविदानंदजननजगदुत्कर्षो आरोप्यमाणाद्द्वितीयमन्मथादितादू
प्येण यथासंभवतो न तथा केवलस्वरूपेणेति विषयिणः स्वात्मनैवोपयोगो न तु विषयात्मनेति न
परिणामत्वमिति तदपि सावद्यं मन्मथादिप्रत्येकसाध्यतत्तत्कार्येषु एकस्यैव राज्ञो हेतुत्वेन चम
त्कारातिशयसमुल्लासाद्राज्ञः स्वरूपेणैव तत्रोपयोगादेवोत्कर्षसिद्धौ विषयतादात्म्यापेक्षाया
अनावश्यकत्वादिति विभावनीयं शारीरत्वइति परिणामस्वरूपपर्याप्त्यधिकरणत्वेइत्यर्थः॥
मानाभावादिति विशिष्टस्यैवैं तथात्वे पितदेकदेशस्य विषयिणि विषयताद्रूप्यस्य शाब्दधीवि
षयत्वात्कथं विशिष्टस्य व्यंग्यत्वमित्यत आह एकदेशस्येति तत्र प्राचीनसंमतिमाह अत एवे
ति धन्यासीति नायिकायाः सखी प्रत्युक्तिः नीविग्रथनं नार्यो जघनस्थस्य वाससइति नामसा

+ परिणामालंकारत्वाभ्युपगमाद्विषयिणि विषयताद्रूप्य ~~स्य शाब्दधीविषयत्वात्कथं विशिष्टस्य~~ मात्रस्यापि तत्र धुरीर
त्वाभावादित्यर्थः४॥ ननु विशिष्टस्यैव ३+

© Dharmartha Trust J&K. Digitized by eGangotri

मौला शयामीत्यत्रस्वाभिप्रायाविः करणमात्रस्याविवक्षितत्वादात्मनेपदाभावइति शाब्दिकाः आव
श्यकत्वादिति अन्यथानुपपत्तेः पूर्वमेव प्रतिसंधानात् विरोधलक्षणया अन्यपदस्याऽधन्यार्थक
त्वादित्यर्थः चंडीदासइति इदमुपलक्षणं ढुंढुंनेति त्वदुक्तपरिणामधून्युदाहरणेपिविषयिणोवि
षयतादात्म्यस्य व्यंग्यत्वेपि उत्तरार्द्धविरहतापोपशमनरूपप्रकृतकार्योपयोगितायाःशाब्दविष
यत्वादुक्तगतेरवश्यंशरणीकार्यत्वादित्यर्थः केचित्तुसामान्येननिरूपितस्यार्थस्यसुखप्रतिप
त्तयेतदेकदेशंनिरूप्यतयोरवयवावयविभावउपमानउदाहरणेतं कारः उपमानइत्यर्थोत
स्यासवारणंतत्रव्यंग्यत्वात् तदुक्तिश्चइवयथानिदर्शनदृष्टांतादिशब्दैर्बोध्या नचइवादीनांसा
दृश्यार्थकतयासामान्यविशेषभावार्थकत्वंनास्तीतिवाच्यं लक्षणयातत्संभवात् अन्यथासंभा
वनार्थकत्वमपिनस्यात् इवपदेनयथा अमितगुणोपिपदार्थोदोषेणैकेननिंदितोभवति निखि

अप्तानाशादृं यथाप्र
तिकृतंमया

© Dharmartha Trust J&K. Digitized by eGangotri

लरसायनराजो गंधेनोग्रेण लशुनद्रुव अत्र समस्तपदार्थे लशुनयोर्दोषयोर्गंधयोश्च सामान्यविशे
भावः नचेयमुपमैवेति वाच्यं विशेषस्य सामान्यावच्छिन्नप्रतियोगिताकभेदरहितत्वात् उप
मानतावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्य चोपमेयवृत्तेः उपमाव्यवस्थापकत्वात् अतएवा
त्र सादृश्यादिशब्दानामप्रयोगः संगच्छते नाप्यर्थांतरन्यासविशेषः तत्र इवादिपदप्रयोगविर
हात् नचार्थत्ववाच्यत्वमात्रं तावतास्यान्नत्वतिरेक इति वाच्यं सामान्यार्थसमर्थको हि विशे
षवाक्यार्थो द्विविधः अनुवाद्यांशस्यैव विशेषरूपत्वं विधेयांशस्तु सामान्यगत एवेत्येकः अं
शद्वयेपि विशेषत्वमेवेत्यपरः तत्राद्य उदाहरणालंकारो द्वितीये त्वर्थांतरन्यासविशेष इति
विभाग इत्याहुः प्राचीनानुसारिणस्तु उपमैवेयं निर्विशेषं न सामान्यमिति न्यायेन प्रथमो
क्तसामान्यस्य किंचिद्विशेषपर्यवसानावश्यकतया तेनैव सहचरमोक्तविशेषस्योपमा

© Dharmartha Trust J&K. Digitized by eGangotri

र्निष्पत्तिसंभवादेकविशेषवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य विशेषांतरेप्यबाधितत्वात्
सामान्यविशेषभावस्य प्रथमं प्रतीतावपि अंततः सादृश्य एव विश्रामाच्चेत्याहुः वस्तुतस्तु पर
वीक्षोपात्तसामान्यस्य विशेषांतरमादाय न पर्यवसानं उत्तरार्द्धोपस्थितविशेषमादायैव तदा
वश्यकत्वात् अन्यथा तदुपादानवैयर्थ्यात् उभयोः सामर्थ्यसमर्थकत्वप्रत्ययापाताच्च अतोर्थांत
रन्यास एवायं अनुवाद्यांशस्य विशेषरूपत्वं विधेयांशस्तु सामान्यगत एवेत्यवांतरभेदेपि

त॰ तद्वैविध्यस्यैवोचितत्वात् इवादिपदप्रयोगस्तु सामान्यव्याप्तियद्दृष्टस्थलविशेषप्रदर्शना
र्थः अत एव सदृशादिपदानामप्रयोगोपि संगच्छते एवं च दोषस्तत्पदार्थस्यापि गर्ह्योहेतुरि
तिहेतुहेतुमद्भावस्य लघुनस्थल एव ग्रह इति ॥ परमार्थतस्तु निदर्शना विशेष एवायं विशेष
वाक्यकार्यतावच्छेदकधर्मस्य सामान्यवाक्यगततादृशधर्मव्याप्यतायामेव विशेषणत्वमा

© Dharmartha Trust J&K. Digitized by eGangotri

मान्यस्यसमर्थनरूपार्थान्तरन्यासस्यव्यवस्थापयिष्यमाणत्वात् प्रकृते च उन्नतंपदमुपे
तियोलघुर्हेलयैवसपतेदितिध्रुवं शैलशेखरगतोदृषत्कणश्चारुमारुतधुतःपतत्यध
इत्यतोवैलक्षण्यान्निरुक्तेः उन्नतपदप्राप्तोलघुर्निश्चयेनपतति शैलाग्रवर्त्तीमंदमारु
तोद्धूतोदृषत्कणइवेत्यतोपितत्समानाकारकप्रतीतेरेवउदयात् विश्रब्धघातदोषःस्वव
धायखलस्यवीरकोपकरः वनतरुभंगध्वनिरिवहरिनिद्रातस्करःकरिणइत्यादावपित
थात्वदर्शनात् परंतुइवपदप्रयोगाभावेद्वितीयवाक्येतत्क्रियापदस्यपुनःप्रयोगः इवपद
सत्वेनुतद्बलादेवतत्रतदन्वयोपपत्तेर्नतथेति वाक्यभेदस्तूभयत्राप्यविशिष्टः यत्तुउदाहर
णालंकारेइवादिपदप्रयोगेवाक्यभेदाभावोनिदर्शनादिशब्दप्रयोगेतुनसइत्युक्तं तन्मंदं
सामान्यधर्मवाचकपदस्यपृथक्प्रयोगविरहेपिवाक्यभेदस्यावश्यकत्वात् वाक्यैकवाक्य
तायाश्चोभयत्राप्यविशेषादितिसंक्षेपः तदेतत्सर्वंध्वनयन्नाह इत्यलमिति इत्युपमाभे
॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

दगर्भसादृश्यावगाह्युपमानिरूपणानंतरं भेदनिर्मुक्तसादृश्यावगाहितयानन्वयः प्राप्तसंगतिक
इत्याहानन्वयेति द्वंद्वात्परं श्रूयमाणं प्रत्येकमभिसंबध्यत इति न्यायेन उपमानोपमेयत्वे त्यत्र
त्वपदार्थस्योपमानपदार्थेनाप्यन्वयः तदेव स्पष्टयति उपमानत्वेति ननु ह्रासः प्रस्तुतमिवेह
सद्वप्रस्तुतमित्युपमेयोपमायां पूर्वोपमायामुपमेयतावच्छेदकं प्रस्तुतत्वमेवोत्तरोपमाया
मुपमेयतावच्छेदकमिति तिन्नातिव्याप्तिरत आह यद्वेत्यादि तत्र तु प्रस्तुतत्वावच्छिन्नप्रतियो
गिताकसादृश्ये प्रस्तुतत्वावच्छिन्नानुयोगिताकत्वं नास्ति इति न व्यभिचार इत्यर्थः अन्यसदृश
निषेधार्थकत्वस्य लक्षणे प्रवेशभ्रमं निवारयति अनन्वयपदार्थमाहेति अन्यस्य सदृशाभि
ति षष्ठीसमासे इंदुरिंदुरिवेत्यादिना घटाद्युपमाननिषेधानुपपत्तेरसंगतिः स्यादत
आह कर्मधारय इति नन्वेवमपि नाभीष्टसिद्धिरुपमानांतरस्यापि किंचिदन्यत्वादत आह स्व
भिन्नमिति संनिधानवशात्प्रकृतस्यैव प्रतियोगितयाभेदेन्वय इति भावः ननु सदृशपदस्य सा

© Dharmartha Trust J&K. Digitized by eGangotri

दृश्याश्रयपरत्वात् कथमुपमानलाभ इत्यत आह सदृशपदस्येति अनन्वयपदस्य योगश =
क्त्याउक्तार्थपरत्वं दर्शयति नविद्यत इति नविद्यतेऽन्वयो यत्रेत्यर्थे नञोऽस्त्यर्थानां वाच्यो वोत्तरप
दलोपश्चेति वार्त्तिकेन बहुव्रीहौ कृते विद्यमानपदलोपः अन्वयश्च किंनिरूप्य इत्याकांक्षायां
स्वभिन्नस्योपमानत्वेनेत्युक्तं उपमेयभिन्नस्य सादृश्यादेरेवान्वयसत्त्वाद्बाधवारणाय उपमा
नत्वेनेति नत्वेदपि समासकोटिप्रविष्टमिति द्रष्टव्यं भैमीनेत्रमिवेति यद्यप्यस्या इवास्या इति
यथाश्रुतेन भैमिप्रतियोगिकसादृश्याश्रयस्य भैम्या नेत्रं उक्तविशेषणविशिष्टमिवेत्याया
ति तथाप्यवयववर्णनस्यैव प्रक्रमात् अस्या नेत्रमिवास्या नेत्रमित्यन्वयो नेत्रपदावृत्त्यावश्यं
कार्य इत्यर्थः नतावदिति इदं स्वइवार्थस्य भेदस्योपमेयान्वय इति पक्षमङ्गीकृत्योक्तं व्यासस्येति
घटपटोभयत्वावच्छिन्नप्रतियोगिताकभेदस्य घटादावपि सत्त्वादित्यर्थः इष्टेत्यादि एर्वक्षणादि

© Dharmartha Trust J&K. Digitized by eGangotri

वृत्तित्वविशिष्टस्यैतत्सत्त्वादिवृत्तिविशिष्टस्य चंद्रे चैतस्य भेदप्रतीतेः नापीति वाच्यमित्यनेनान्वि
तं फलभेद इत्यनंतरं उपमाभेदक इत्यस्यानुषंगः तमेव फलभेदं दर्शयति चंद्र इवेत्यादिना सि
द्धत्वादिति धर्मे चंद्रवृत्तित्वज्ञानकाले चंद्रस्य धर्माश्रयत्वमपि बुध्यते समानवित्तिन्यायात् ततश्च
तद्बोधस्य पुनर्वैयर्थ्याच्चंद्रस्यान्यदुपमानं नास्तीत्येव बुद्धिर्भवति शब्दाधिक्यादर्थाधिक्यमितिन्या
यादित्यर्थः ननु शाब्दबोधे समानवित्तिवेद्यत्वन्यायो नास्त्येव तस्य व्युत्पत्तिविशेषनियतत्वात् मानसं
वा तत्ज्ञानं शाब्दप्रतिबंधकं अन्यथा योग्यताज्ञानस्यावश्यकतया शाब्दोच्छेदापत्तेः सत्यं एत
द्दोषस्याप्यत्र बोध्यत्वात् बाधकाभावादिति श्रुतिप्राप्तेप्रकरणादीनामनवकाशादितिन्यायेन
शब्दगम्यमर्थमुपेक्ष्य प्रकारांतरेण तद्बोधानुसरणस्यानुचितत्वादित्यर्थः ननु धर्मस्य तदन्वय
संभवेपि इवार्थभेदस्य तदन्वयायोग्यतया नैवं बोधः स्यादित्याशंकते नचेति यद्यपि विशिष्टतया

© Dharmartha Trust J&K. Digitized by eGangotri

भेदः पूर्वमेवोक्त इत्यत इयं शंका न पुनरुद्देतुमर्हतीति तथापि सिद्धांतवक्ष्यमाणेत्याद्युक्तविधभेद
स्यतद्वाक्यजन्यशाब्दबोधविषयत्वाभावनिश्चयदशायामिदमुक्तं भेदमात्रोपपत्तिमाश्रित्याह एतत्
कालीन इति आवश्यकत्वादिति अन्यथाग्रावच्छेदेन कपिसंयोगाभाववान् वृक्ष इति ज्ञानस्य मू
ले वृक्षः कपिसंयोगीत्येतद्बोधविरोधित्वापत्तेः तथा च बाधबुद्धेर्यदवच्छेदकतया भासते तदवच्छेदेनै
व प्रतियोगिविशिष्टधीर्न भवति अत्र च बाधबुद्धौ तत्कालावच्छेदकतया भासते विशिष्टबुद्धौ त्वेतत्काल
इति न विरोधित्वमिति भावः बोधापत्तेरिति योग्यताज्ञानघटकस्य शाब्दबोधप्रवेशावश्यकत्वादि
त्यर्थः अत एवेति उक्तावश्यकत्वरूपहेतोरेवेत्यर्थः संयोगसंसर्गकपर्वतविशेष्यकवह्निप्रकारक तो
योग्यताज्ञानसत्त्वे पर्वतो वह्निमानिति वाक्यात् समवायसंसर्गीकृत्य पर्वतविशेष्यकवह्निप्रकारक
शाब्दबोधो न भवति विशेष्यप्रकारयोर्योग्यताज्ञानविषयतापन्नयोरेवभासनवत्संसर्गस्यापीताद्

© Dharmartha Trust J&K. Digitized by eGangotri

शस्यैवभानादित्यर्थः पदार्थयोर्विशेष्यतायांपदोपस्थितत्वस्यैवसंसर्गविशेषस्यशाब्दबोधविषयतायां
योग्यताज्ञानविषयत्वस्यनियामकत्वमित्यत्रतात्पर्यं नन्वेवमपिएतत्कालादेःसंसर्गत्वेनप्रकृतेभा
नविरहात्पदार्थत्वाभावाच्चकथंशाब्दबुद्धिविषयत्वमितिचेत् सत्यं चंद्रपदस्यतादृशचंद्रलक्षणा
स्वीकारात् नन्वेवमपियोग्यताज्ञानविषयत्वस्यतद्विषयत्वनियामकत्वकल्पनमसंगतंलक्षणा
स्वीकारेपदार्थत्वेनैवतदुपस्थितिसंभवादितिचेत् सत्यं चंद्रपदार्थस्यपूर्वकालावच्छिन्नप्रतियो
गित्वेनभेदेतस्यचैतत्कालावच्छिन्नानुयोगित्वेनचंद्रपदार्थेन्वयइत्यर्थात् नन्वेवमप्येतत्कालीनश्चंद्रइ
त्याकारकबोधानुपपत्तिरेवासंसर्गांशानिविष्टपदार्थस्यान्वयप्रतियोगिपदार्थविशेषणत्वेनबोधा
योगादितिचेत्सत्यं तादृशबोधस्यैवविवक्षितत्वात् वस्तुतस्तुचंद्रपदस्यैतत्कालीनचंद्रलक्षणाया
एतत्कालीनश्चंद्रइत्यादिरेवबोधः पदोपस्थितपदार्थानांतद्योग्यताज्ञानविषयसंसर्गस्यचाव

© Dharmartha Trust J&K. Digitized by eGangotri

प्यंशाद्देभानमित्यत्रेत्याऽतएवेत्यादिकथनमिति [illegible] संक्षेपः अस्माकमपीति ननुभवदभिमत

स्थलेपिआरोपितभेदेनोपमैवालंकारइतिप्रामाणिकसंमतमित्यनन्वयालंकारोऽनवकाशएव

तथाहि उत्तरमीमांसायांप्रथमाध्यायतृतीयपादेदहरउत्तरेभ्यइत्यधिकरणे अथयदिदमस्मिन्ब्रह्म

पुरेदहरंपुंडरीकंदहरोस्मिन्नंतराकाशइतिश्रुतौब्रह्मपुरंशरीरं जीवस्यब्रह्माभिन्नतयातन्नि

वासरूपत्वात् दहरंपरिच्छिन्नंअल्पमितियावत् पुंडरीकंतत्संनिवेशंहृदयमित्यर्थः तत्संबंधितया

तदंतर्गतआकाशउक्तः सकिंभूताकाशउतपरंब्रह्मेतिसंदिह्यभूताकाशस्यविवक्षितत्वेयावा

न्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशइतिश्रूयमाणउपमानोपमेयभावोनसंभवतीति

शंकायांपूर्वपक्षिणाअवच्छिन्नानवच्छिन्नभेदेनबाह्याकाशहृदयावच्छिन्नाकाशयोर्भेदमारोप्यउप

मानोपमेयभावःसमर्थितः सिद्धांतेपिभेदारोपेणतदुप पादनमगतिकगतिरितिनात्रतदंगीकर

© Dharmartha Trust J&K. Digitized by eGangotri

णंयुक्तमित्यभिहितं तथाचभाष्यकृतः अगतिकाह्लीयंगतिर्यत्काल्पनिकभेदाश्रयणमितिवाचस्पति
मिश्रैरपिभामत्यामुक्तं तद्व्याख्यानावसरे तेनतस्योपमेयत्वंरामरावणयुद्धवत् अगत्याभेदस्यैव
मारोप्यगतोसत्त्वांनयुज्यते तदपिकल्पतरोव्याख्यानंह्यस्तनाद्युतनत्वादिनायुद्धेभेदारोपःक्रियते
गगनंगगनाकारंसागरःसागरोपमः रामरावणयोर्युद्धंरामरावणयोरिवेत्यत्रेति एतावताहिएवं
विधस्थलेभेदारोपेणाउपमेवेत्यभिप्रायोलभ्यते त्वयाचनात्रभेदविवक्षोच्यतइतिविरोधः एवंमी
मांसायामपितद्व्यपदेशाधिकरणेश्येनेनयजेतेत्यत्रगुणविधित्वपक्षेश्येनपदस्यपक्षिविशेषनि
रूढत्वात्तस्यचविधेयत्वापत्तौयथाश्येनोनिपत्यादत्तएवमयंद्विषंतंभ्रातृव्यमादत्तइतिउपमा
नोपमेयभावोनसंगतःस्यात् स्वस्यस्वसादृश्याभावात्इत्युक्तं तथापंचमाध्यायेतेनतुल्यमितिस
त्रेकैयटेनाप्युक्तंशाययितेनतुल्यंशाययितव्यमित्यत्रनास्त्युपमानोपमेयभावः यथागोरिवगौरितियेने

© Dharmartha Trust J&K. Digitized by eGangotri

वहेतुनाऽऽकाशोस्तेनैवापरोपीतिकउपमानोपमेयभावइति अत्रोच्यते नतावत्गगनगनमित्यत्रभेदारो
पेणोपमेस्येतद्विरोधः तत्रभेदविवक्षयामुपमायाअस्माभिरपिस्वीकारात् यदात्पमानांतरव्यावृ
त्तावेवतात्पर्यंतदानन्वयएवकैयटग्रंथादपिहि उपमानोपमेयभावोनास्तीत्युक्त्यातत्रसादृश्यपर्यव
सानंनास्तीत्यर्थोलभ्यतेतेनचान्यप्रतियोगिकसादृश्यानाश्रयत्वविवक्षायांनकोपिविरोधइति अ
नुभवसिद्धस्यग्रंथविरोधेनापलापानर्हत्वाच्चेति एवंचउपमानानिसामान्यवचनैरितिसूत्रेयन्म
हाभाष्येदृश्यते यद्युपमानोपमेययोरैक्यंतदागौरिवगौरित्यत्राप्युपमानोपमेयभावःप्राप्नोतीति
तदपिउक्ताभिप्रायकमेवेति इवार्थइति लक्षणयेतिशेषः खंडशक्तिपक्षेपिअर्थैकदेशमपहाय
तदेकदेशप्रवृत्तौलक्षणावश्यकत्वात् शक्यतापर्याप्त्यधिकरणएवशक्तेःसिद्धांतसिद्धत्वात् अत
एवलक्षणाप्रसंगभियादहराधिकरणेआकाशस्याकाशसाम्याश्रयणंनिराकृतं उक्तग्रंथस्य

© Dharmartha Trust J&K. Digitized by eGangotri

अ.को.टी.
११७
117

तत्रानुपयोगाच्चेति ध्येयं व्यंग्येवेति स्ववृत्तिधर्मवत्तयाचमत्कारानुज्जीवनादित्यर्थः आद्यमुदाहृतमि
ति आघूर्णितं पक्ष्मलमक्षिपक्ष्ममित्यत्र आघूर्णितत्वादिविशेषणानामनुगतानां नेत्रद्वयान्वयि
त्वादित्यर्थः आद्यंशाद्वेक्षेपांतानुगामिधर्मवद्वाक्यमित्यर्थः एवं द्वितीयमित्यत्रापि क्लीवत्वमुपपा
द्यं विवस्वानिति अत्र प्रकाशकत्वातिशयादिरूपधर्मोऽनुपात्त इत्यर्थः ध्वनिरिति यद्यप्युपमानां
तरव्यावृत्तिरत्र शब्दोपात्तैव तथापि तन्निरूपितं तत्सादृश्यस्यैवानन्वयशरीरतया तस्य व्यंग्यत्व
मित्यर्थः त्वां कृत्वेति सुंदरकांडे सीतां प्रति रावणस्योक्तिः रूपकृदित्यनेनानादौ संसारे नानाविधसौं
दर्यनिर्माणजन्याभ्यासातिशयस्सूचनं उपरत इति रूपकरणान्निवृत्त इत्यर्थः एवं च पूर्वं रूपनि
र्माणाभ्यासेन सीतारूपातिशयजननवत् एतद्रूपनिर्माणाभ्यासेन एतदुत्तरनिर्मितपैरूप्यर्था
दुत्कर्षेऽपि सेत्स्यतीति नाशंकनीयं नन्वेतदुत्तरं रूपनिर्माणान्निवृत्त्या एतदुत्कृष्टरूपाभावसिद्धावपि

रु.
११७

© Dharmartha Trust J&K. Digitized by eGangotri

यदभ्यासेनैतद्रूपस्यैव निर्माणं तज्जन्यनायिकांतररूपाणां एतत्समानकालीनानां एतत्सादृश्यं
स्यादेवेति चेत् न तादृशाविलक्षणाभ्यासेनैतद्रूपस्यैव निर्माणमित्याशयात् तदाह नह्यस्यादितो
तरादृशेनरूपोपमेति तवेत्यस्य सापेक्षत्वाद्रूपान्वयः उपमीयत इत्युपमा त्वद्रूपं उपमेयं यस्याः इति
समासः स्वकीयरूपनिष्ठोपमानताद्वारेणोपमानत्वं बोध्यं यद्वा त्वदृःप्रत्ययस्य कर्मण्यविहितत्वा
त्कथमुपमीयत इत्येतिमुत्तरस्या उपमापदस्योपमेयपरत्वमिति विभाव्यते तदा छांदसत्वमाश्रयणी
यं अथ तस्याप्यगतिकगतित्वात्तत्राप्यपरितोषस्तदा उपमापदस्य तद्धर्मपरत्वमाश्रयणीयं पृथि
वीतल इति च लोकमात्रपरं रूपकरणेनास्योपमेहत्वभावादन्यत्रापि तादृशरूपोपलभ्यनुपपत्तेः अ
त्रत्वदुपमान्या नास्तीति अन्यस्या एवैतन्निष्ठसादृश्यप्रतियोगिभूतायाः प्रतिषेधादभेदगर्भसादृश्यस्या
भिमतत्वात्त्वमेव त्वत्सदृशीत्यनन्वयो ध्वन्यते यथा वा नेपथ्ये आगर्त्तिमत्त्येषु तुलार्थमस्या योऽपि तियोग्या

© Dharmartha Trust J&K. Digitized by eGangotri

नुपलंभेन: यद्यस्तिनाकेभुवनेप्यबाधस्तदानकौतस्कुतलोकबाधः इदंचभैमीस्वर्वृत्त्यसाधारणध
र्मनिमित्तकस्वसजातीयप्रतियोगिकसादृश्यवतीवक्तृत्वात् घटादिवदित्यनुमित्याभैम्याअन्यस
दृशत्वसिद्धौ अर्थात्तद्वृत्तिसादृश्यप्रतियोगिनायिकांतरसिद्धिरित्याशंक्योच्यते इह भैम्युपमानभूता
याभूतलेयोग्यानुपलंभादेवाभावसिद्धिः भूतलंयदिभैमीवृत्तिसादृश्यप्रतियोगिनायिकाधिक
रणंस्यात् तदातद्वृत्तयोपलभ्येतेत्यापादनसंभवात् अथयदधिकरणंयदसंनिकृष्टंतत्रतस्य
कथंतदभावनिर्णयः अधिकरणज्ञानरूपकारणविरहात् इति चेत् उपलंभस्यप्रत्यक्षशा
ब्दादिसाधारणस्यविवक्षितत्वात् तथाचदेशांतरेतत्सत्वेतद्दर्शिजनांतरवाक्यादिनातत्प्रती
तिसंभवात् स्वर्गपातालयोस्त्वनुमानेनतदभावःसाध्यते तथाहि स्वर्गपातालेभैमीवृत्तिसादृश्य
प्रतियोगिनायिकाविरहितेभैमीदर्शनविषयंकालंकेछावत्स्ववृत्तिकत्वादितिसामान्यमाप्तिमूलका

© Dharmartha Trust J&K. Digitized by eGangotri

नुमानेनाभिमतार्थः सिध्यति नचात्रप्रतियोग्यप्रसिद्धिः भेदाभेदसाधारणसादृश्यविवक्षयाभे
म्याएवतादृश्याःप्रसिद्धेः नचैवंतदभावेनैवसिद्धसाधनं भेम्यभावाश्रयत्वेनान भिमतत्वेस
तीतिपक्षविशेषणात् तथाचबाधेनभेम्यभावमादायसाध्यानुपसंहारात् केचित्तुस्वर्णपाता
लवृत्तिनाधिकाभेमीवृत्तिसादृश्यप्रतियोगित्वाभाववत्यःस्वसमानेदृशानांभेमीदर्शनविषयको
त्कंठेच्छानिवृत्त्यजनकत्वादित्यनुमानेमित्याहुः एवंचभेमाभिन्नतदुपमाननिषेधभेम्यामेवभे
म्युपमानत्वंव्यज्यतइति इदंत्ववधेयं वाच्यानन्वयेयथाश्रुतमात्रस्यचमत्कारानाधायकत
याउपमानांतरव्यावृत्त्यनुसरणमितिसर्वेसिद्धं यत्रतूपमानांतरव्यावृत्तिरेववाच्यातत्रतस्या
श्चमत्कारोल्लासकत्वात् तदनुल्लासकस्वनिष्ठस्वप्रतियोगिकसादृश्याश्रयत्वव्यंजनंनध्वनिव्यव
हारप्रयोजकं वाच्यापेक्षयातस्यानतिशयादितिवस्तुगतिः तथापिग्रंथांतरानुसारेणस्पष्टार्थं

© Dharmartha Trust J&K. Digitized by eGangotri

अ.को.टी.
११९

119

चतदुद्भावनमितिदिक् । केचित्पृथगाणितस्यासमालंकारस्यानन्वयेंतर्भाव्यत्वात्तत्रैव तमाशंकते य
त्त्विति एवमन्यत्रापियस्ययत्रांतर्भावस्तस्य तत्रैवोद्भावनं अन्यथांतर्भावयितुमशक्यत्वादित्यवधे
यं सर्वथैवेति उपमानलुप्तायामुपमायामतिव्याप्तिवारणायेदं तत्रप्रतीतिविषयस्यैवोपमानत्वनि
षेधतात्पर्यात् प्रतीत्यविषयस्योपमानत्वसंभवेन सर्वथोपमाननिषेधस्याविवक्षितत्वात् नन्वसम
स्यालंकारांतरत्वेनन्वयस्यालंकारांतरत्वानुपपत्तिः तत्राप्यसमालंकारध्वनिनैवोपपत्तेरितिचेत्
सत्यं अलंकारांतरे [illegible]णालंकारांतर[illegible]ध्वननस्यालंकारानपवादकत्वात् एतद्धीस्येवानन्वयध्व
निनापिनास्यगतार्थत्वमित्याह अयंचेति उपमावद्धंग्यापीत्यन्वयः पृथगिति दीपकादिवदिति
शेषः तदेवस्पष्टयति अन्यथेति । नन्वसमालंकारध्वनिनानन्वयस्येव वैयर्थ्यंकुतोनस्यादित्यग
मकत्वाभावादित्यतआह आरोपइति अनन्वयस्योभयसिद्धतयातद्ध्वनिनास्यैवगतार्थयितुमुचि

कृ:
११९

© Dharmartha Trust J&K. Digitized by eGangotri

तत्वादितिभावः ननुउभयसिद्धत्वमप्रयोजकं अनन्वयस्यगतार्थत्व मापादयतातस्यपृथक्त्वेना
नभ्युपगमस्यैवसंभवादसिद्धंच किंच अनन्वयस्यशरीरं स्वस्यस्वसादृश्यं अस्यत्पमाननिषेधः त
त्रानन्वयेनचमत्कारार्थंउपमानांतरव्यावृत्तिरूपजीव्यते एवंचोपमेयोत्कर्षप्रयोजकमनुपमत्वमे
वासमालंकारस्वरूपमितितस्यैवालंकारध्वनित्वमुचितंनतुवैपरीत्यं असमस्थलेस्वेनस्वसादृ
श्यस्यव्यंग्यत्वेचमत्कारानुपपत्तेः तावन्मात्रस्यचमत्कारसामर्थ्येचअनन्वयेपिउपमानांतरव्या
वृत्तिध्वननवैयर्थ्यापत्तेः एवंचासस्योपजीव्येनानुपमत्वेनानन्वयस्यैवगतार्थत्वमुक्तमिति अत्रो
च्यते चमत्कारजनकमात्रोपमानांतरव्यावर्त्तनरूपं तच्चानन्वयेव्यंग्यं असमेचवाच्यमितिय
त्रतद्व्यंग्यंतस्यैवालंकारत्वमंगीकार्यं सएवह्यर्थोवाच्यापेक्षयाव्यंग्यःसन्नधिकंचमत्कारमावह
तीतिसर्वसंमतत्वादिति किंच कालत्रयेउपमाननिषेधोसमलंकारः तदंतर्भाव्यैवउपमाननि
षेधस्त्वनन्वयव्यंग्यः एवंचासमस्यन्यूनवृत्तित्वमनन्वयस्यचासमव्यापकत्वेनतयाधिकविषयत्वं

© Dharmartha Trust J&K. Digitized by eGangotri

स्पष्टमेवेतिकथंवैपरीत्यमितिदिक् । अलंकाररत्नाकरकारस्तु तेनतदेकदेशेनवाऽसितभेदेनोपमान
तयाकल्पितेनसादृश्यमनन्वयः उपमेयेनैवोपमानतयाकल्पितेनोपमेयस्यापाततोभासमानंसा
धर्म्यमेकोनन्वयःप्रसिद्धएव यथा युद्धेर्जुनोर्जुनइवप्रथितप्रतापइति उपमेयैकदेशस्यतथैवो
पमानताकल्पनपरः यथाएतावतिप्रपंचेसुंदरमहिलासहस्रभरितेपि अनुहरतिसुभगतस्या
वामार्द्धंदक्षिणार्द्धस्य उपमेयस्यैवप्रतिबिंबादिरूपेणभेदकल्पनयोपमानत्वकथनंतृतीयः यथा
रघु ५ गंधेनसिंधुरधुरंधरचक्रमैत्रीमैरावणप्रभृतयोपिनधिशिक्षितास्ते सत्वंकवित्रिनयनाचलरत्नमिति
स्वीयप्रतिद्विषुयूथपतित्वमेषि चक्रमैत्रीएकसार्थवर्त्तित्वंइत्यर्थः करीचेत्तावित्यस्यकश्चदिति
रूपं एषुत्रिष्वप्युपमानांतरविरहप्रतीतेरनन्वयत्वमित्याह अत्ररसगंगाधरकृतः उपमानांतरव्या
वृत्तिमात्रंअनन्वयशरीरं उक्तेकोपमानोपमेयकत्वविशिष्टं आद्येस्तनाभोगेपतन्भातीत्यादेःकवि
कल्पितोपमायाअप्यनन्वयत्वापत्तिः यद्यर्थोक्तिरूपातिशयोक्तावप्यतिप्रसंगश्च द्वितीयेदक्षिण

© Dharmartha Trust J&K. Digitized by eGangotri

द्धवामार्द्धयोर्वस्तुतोभिन्नयोःसादृश्येकथमनन्वयत्वशंका किंचगगनंगगनाकारंइत्यादौस्वातिरि
क्तोपमानविरहप्रतीतिद्वाराउपमेयस्यनिरुपमत्वसिद्धिः अत्रतुवामार्द्धस्यदक्षिणार्द्धसादृश्यनिबंधान्नि
रुपमत्वमुपजीव्यविरुद्धत्वयानोल्लसत्येवनाप्यधिकागतनिरुपमत्वप्रत्ययकृतान्वयफलंभवितु
मर्हति तस्याःप्रकृतोपमेयत्वाभावात् वामार्द्धस्यैवोपमेयत्वात् उपमेयगतनिरुपमत्वप्र
त्ययस्यैवानन्वयफलकत्वेत्यनाच्च एतेनानन्वयध्वनित्वमत्रेत्यलंकारसर्वस्वकारोक्तम
पिनिरस्तमित्याहुः इत्यनन्वयः एवंस्वभिन्नसादृश्यव्यवच्छेदफलकमनन्वयंनिरूप्य
उपमानोपमेययोःपरस्परातिरिक्तसादृश्यव्यावृत्तिफलकउपमेयोपमालंकारोनि
रूपणमर्हतीत्याह उपमेयोपमामिति उपमानत्वमित्यनंतरंपूर्वोपमानस्योपमेय
त्वमित्यपिद्रष्टव्यं तौविपरीतौपरतइति कारिकायास्तदर्थकत्वात् अन्यथारशनोपमाया

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰कौ॰टी॰ मतिव्याप्तेरनिवारणात् फलस्याभावादिति उभयोरन्योन्यातिरिक्तसादृश्यस्य आवृत्तिफ
१२१
लकत्वे सति ऐस्यापि एतदीयलक्षणान्तर्गतत्वादिति भावः फलतीति सादृश्यस्यैव विधे
121
यत्वेन प्रतिष्ठानादिति भावः लभ्यत इति उपमानं उपमेयं धर्मश्चेति त्रयमुपमाघटकं तत्र
द्वयोर्वैपरीत्योक्त्या धर्मस्य तदभावो लभ्यत इति भावः धर्मलोपस्तावदुदाहृतो हासः प्रस
न्नमित्यादिना धर्मबलत्वाद् धर्मश्चेति अनुगामीत्यादि उपचारादेरप्युपलक्षणं ग्रा
हेति समुद्रपक्षे ग्राहाणां जलचराणां समूहः आकाशपक्षे ग्रहाणां नक्षत्राणां संबंधी
ग्राहः सचासौ समूहश्च ग्राहसमूहः विचरन् ग्राहसमूहो यत्रेति बहुव्रीहिः एवं रजोभिः
स्पंदनोद्धतैरित्यस्या लक्ष्यत्वमत्रोक्तं संप्रति प्रकारान्तरेणतस्य लक्ष्यत्वमानयन् तस्य ल
क्ष्यत्वव्यवस्थापकग्रंथसमर्थनाय प्रक्रमते अत्रेदमिति पर्यायेणेति यौगपद्यविरहे
कृ॰
१२१

© Dharmartha Trust J&K. Digitized by eGangotri

णेत्यर्थः तस्मिन्निति उपमानोपमेयभावे इत्यर्थः अत्र पर्यायेणेत्यनेन वाक्यभेदनियमो
पि दर्शितः द्वयोरितिच स्पष्टार्थमेव अनन्वये पर्यायाभावात् अतस्तद्व्यैवकारा इति ध्ये पर्य्येशंकार
ये यदप्युक्तं रसगंगाधरे अहंलतायाः सदृशीत्यखर्वं गौरांगि गर्वं न कदापि यायाः गवे
षणेनालमिहापरेषामेषापि तुल्या तव तावदस्ति इत्यत्र प्रतिपाद्यायामुपमायामति
माप्तिः तद्वल्लुनायुगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे प्रस्पंदमा
नपरुषेतरतारतमंतश्चक्षुस्तव प्रचलितभ्रमरं च पद्मं इत्यत्र युगपत्प्रवृत्तायामुपमेयो
पमायां वाक्यभेदाभावादव्याप्तिरिति तदप्युक्तं उपमायां विधेयत्वविशेषणदानेनाद्य
दोषाभावात् तत्र हेतुत्वेनानुवाद्यत्वात् पर्यवसितवाक्यभेदमादाय द्वितीयदोषाभावा
च्चेति हृदि निधाय रजोभिरित्यादेर्लक्ष्यत्वं चाविर्भविष्यतीति हृदि निधायाह वाक्यभेद इति

© Dharmartha Trust J&K. Digitized by eGangotri

यत्त्वेवमपि सविताविधवति विधुरपि सवितेति तथाहि नंतियामिन्यः यामिनयंति दिनान्यपि सु
खदुःखवशीकृते मनसीत्यत्रातिव्याप्तिरिति चेत्पसत् तथाहि उपमाद्वये एकधर्मेण निमि
त्तकत्वविशेषणमावश्यकं तृतीयसदृशव्यवच्छेदस्य धर्मैक्यमंतरेणानुपपत्तेरिति सर्वसं
मतं एवंच सविता विधवती यत्र सुखप्रदत्वं धर्मः विधुरपि सवितरती यत्र दुःखप्रदत्व
मिति कथमतिव्याप्तिशंकेति सहृदयैर्विभावनीयं चित्रमीमांसायां तु अन्योन्येनोपमा
वाध्याव्यक्त्यावृत्त्यंतरेण वा एकधर्माश्रया या स्यादुपमेयोपमा मता अन्योन्यप्रतियोगि
कत्वविशिष्टा व्यंजनया शक्त्या वा बोध्या एकधर्मप्रयोज्या उपमा उपमेयोपमेति तस्या
र्थः इदंतत्त्वसममिसुभयविश्रांतोपमावारणाय विशिष्टांतं तत्रान्योन्यप्रतियोगिकत्वां
शस्य व्यंजनगम्यतया सादृश्यांशस्य शक्तिवेद्यतया विशिष्टसादृश्यैकव्यापारबोध्यत्वपि

© Dharmartha Trust J&K. Digitized by eGangotri

रहात् वाक्यद्वयेन परस्परनैरपेक्ष्यानभिधानात् अंग्योपमेयोपमासंग्रहाय यस्तेति वा
ऽतत्संग्रहाय वृत्त्यंतरेति रज्जोभिः स्पंदनोद्धतेत्यत्रातिव्याप्तिनिषेधाय एकधर्मेत्युक्तं।
अत्रापि रसगंगाधरकृतः अहं लतायाः सदृशी त्युदाहृतश्लोके तुर्ये व्याप्तिः तत्रतृतीयस
दृशाद्यवच्छेदानवगमेन लक्ष्यत्वानौचित्यादिति वदंति तन्न विधेयत्वविशेषणेनैवात्रापि व्यभिचार
निरासात् यदपि तैरुक्तं अन्योन्यप्रतियोगिकत्वविशिष्टाउपमाष्टकवृत्तिमात्रवेद्यस्येत्युक्तं खमि
व जलं जलमिव खमित्यादावपि खजलादेः सादृश्यान्वये प्रतियोगित्वस्य संसर्गत्वेन वृत्त्यविषयत्वा
त् पदार्थसंसर्गस्य वृत्तिवेद्यत्वविरहादिति तदप्यसत् मात्रपदस्य वृत्त्यंतरव्यवच्छेदमात्रपरत्वा
त् एवं च प्रतियोगित्वस्य संसर्गतया बोधेपि वृत्त्यंतरबोध्यत्वाभावे सत्त्वेन मात्रपदविरोधाभावा
दिति रज्जोभिरित्यस्य लक्ष्यत्वविरहशंकामवतारयति यत्त्वत्रेति अनुगामीति भूतलप्रतियोगि

© Dharmartha Trust J&K. Digitized by eGangotri

कृव्योमानुयोगिकोपमायांरजसामेवोभयानुगतानांसाधारणधर्मत्वादितिभावः बिंबेति व्योम
प्रतियोगिकभूतलोपमायांघनसदृशगजरूपधर्मनिमित्तकत्वात् आकाशेगजानांभूतलेचघ
नानामभावात्उभयोर्बिंबप्रतिबिंबभावांगीकारेणसामान्यधर्मसंपत्तेरितिभावः बाधकाभावा
दिति आद्योपमायांरजसांधर्मत्वंद्वितीयोपमायांतुमेघतुल्यगजानामितिद्वितेरुभयत्रधर्मभेद
उक्तः यदितुघनसंनिभैरित्यस्योभयत्रान्वयंकृत्वामेघसादृश्यावच्छिन्नानांरजसांतादृशगजा
नांचबिंबप्रतिबिंबभावःस्वीक्रियतेतदोपमाद्वयेपिधर्मैक्यमक्षतमेव नचरजसोभूमावपिस
त्वात्तत्र तावन्मात्रेणैवतत्प्रतियोगिकोपमानिर्वाहइतिवाच्यं सत्वमात्रस्यसाधारण्यनिया
मकत्वविरहात् रजोगजानांपरस्परसादृश्यसूचनायचघनसंनिभैरित्यस्योभयत्रान्वयःतदा
ह रजोगजानामपीति ननुबिंबप्रतिबिंबभावेनधर्मैक्यंकृत्वाउपमाद्वयस्वीकारेपूर्वोपमायांरज

© Dharmartha Trust J&K. Digitized by eGangotri

सांबिंबत्वं गजानां च प्रतिबिंबत्वं द्वितीयोपमायां तु वैपरीत्यं उपमेयवृत्तिधर्मस्यैव बिंबत्वात्
उपमानवृत्तेश्च प्रतिबिंबत्वात् इति चेत् मैवं अभेदसादृश्यादिनात्र सांगजानां चोभयत्र धर्मत्वा
विरोधात् अन्यथा बिंबप्रतिबिंबभावापन्नधर्मप्रयोज्याया उपमेयोपमायाः सर्वाभ्युपगतं
याविलयप्रसंगात् तदेतत्सर्वमभिसंधायाह कृतमिति इदं चात्रावधेयं औचित्यबलादुपमा
नोपमेयसादृश्यवाचकपदानामुभयत्रैक्यमेव युक्तं तद्वैपरीत्ये दोषः सहृदयोद्वेगात् क्रमे
ण यथा वदनं कमलायते तदीयं शतपत्रं वदनायते सुदत्याः असितोत्पलमालिकं तु पौनय गा/
नांतं त्वसितोत्पलस्य माला: निर्णीतमेतत्कविभिस्समोहे: सर्वोपि विश्वं दुरपत्रिलोकी भूमा
द्भुसान्यतिसक्षितीशः स्वर्गक्षितीभायत इत्यभुक्ताः उपमादोषा अपीह स्वयमूह्नीयाः स
ष्टत्वाद्विस्तृतिभयाच्च कंठतो न लिख्यंते एतदलंकारध्वनिर्यथा संसारसिंधावनुबिंबमत्रजा

© Dharmartha Trust J&K. Digitized by eGangotri

गर्जिजानेतववैरसेभिः बिंबानुबिंबौहिविहायधातुर्नजातुदृष्टातिसरूपसृष्टिः अत्रवस्तुतोन
लस्यापिदंमयंत्यानलभिन्नत्वेनज्ञानात्पुवयोरेवान्योन्यप्रतियोगिकंसादृश्यंनत्वस्येतितृतीय
सदृशाभाववेदफलकमन्योन्यसादृश्याश्रयत्वंप्रतीयते यदितुभेदस्यापिपारमार्थिकमेवाभि
मतंतदेदंमदीयमभिरामराघवपद्यमुदाहरणीयं दृष्ट्वाराघवमेघनादमथनोतद्वृत्तिलोकोत्त
रंसोभ्रात्रैवपराक्रमश्चसदृशाऽभानामसामान्यवत् आलोकाद्भुवदीययोरपितयोःपूर्वोपज्ञा
तापिधीःस्वप्रामाण्यविपर्ययप्रतिपदेवाशंकंदनंनीयते भरतंप्रतिहनुमदुक्तिरियं अत्रासामा
न्यपदस्यसादृश्यानिरूपकत्वार्थकतयाश्रीरामलक्ष्मणवृत्तिस्नेहपराक्रमयोरन्यनिष्ठसादृ
श्यप्रतियोगित्वान्यप्रतियोगिकसादृश्याश्रयत्वोभयाभाववत्वेनज्ञानस्यभरतशत्रुघ्नोभयवृ
त्तिस्नेहपराक्रमदर्शनोत्तरंअप्रामाण्यज्ञानास्कंदनाभिधानात्श्रीरामादिवृत्तिस्नेहपराक्रमयो

© Dharmartha Trust J&K. Digitized by eGangotri

भेरतादिवृत्तिस्नेहपराक्रमयोश्च परस्परप्रतियोगिकमेव सादृश्यं न त्वन्यदीयस्नेहादिप्रति
योगिकमित्युपमेयोपमाध्वनिः यथा स्वैनैषध एव कर्णाक्षिदंतच्छदबाहुपाणिपादादिभिः स्वाखि
लतुल्यजेतुः उद्वेगभागद्वयताभिधानादिहैवैवधाव्यधित द्वितीयं अत्र भैमीसंबंधिकर्णाद्य
वयवानामद्वैताभिमानभंगाय तत्तज्जातीयावयवांतरविधानोक्त्या तत्तदवयवद्वयस्यान्योन्य
प्रतियोगिकमेव साम्यमिति तृतीयसादृश्यव्यवच्छेदो व्यज्यत इति संक्षेपः ॥ इत्युपमेयोपमा ।
एतदनंतरं सादृश्योपजीवकप्रकृतविशेष्यकाप्रकृतप्रकारकसंभावनात्मकतयोत्प्रेक्षालंका
रः प्राप्तसंगतिकः इत्याह उत्प्रेक्षामिति संभाव्यत इति संभावनाविषयीक्रियत इत्यर्थः विषयत्व
स्याख्यातार्थत्वात् साम्यप्रतियोगिना सहेत्यन्वयः संभावनं च साधारणधर्मदर्पणेन निमित्तकं प्र
कृतविशेष्यकं तादात्म्यसंसर्गकमप्रकृतप्रकारकं निश्चयानात्मकं ज्ञानं अस्ति हि मुखादेः सत्यपि

=

© Dharmartha Trust J&K. Digitized by eGangotri

तत्प्रकारकज्ञानेकिमिदंस्वंद्रइत्यादिकमात्रार्थज्ञानमनुभवसिद्धं तन्नतावद्भ्रमःविशेषदर्शनसत्वात्
निश्चयानात्मकत्वाच्च नापिसंशयःअनेककोट्यनुल्लेखात् नाप्यनध्यवसायः विशेषतोऽनुल्लि
खितनानाकोटिकत्वंहितदिति लीलावत्युपायाख्यस्यपं यथा नुपलब्धपक्षसपक्षविपक्षसहचा
रस्यासाधारणधर्मस्यदर्शनात् पनसादौकिंस्विदयमिति यथावाकिंपनसःस्विदयमिति आ
द्येनुल्लिखितनानाविरुद्धकोटिसमुल्लेखात्किंस्विदितिनानाकोटिकत्वेपितदनुल्लेखात् द्वितीये
पनसस्यतदन्यस्यचकिंचित्वेनविरोधिनानाकोट्युल्लेखेपिकिंचित्तस्यसामान्यरूपत्वेनविशिष्य
कोटिसमुल्लेखोनास्तीतिविशिष्टाभावस्योभयत्राप्यविशेषात् इहत्वविशिष्यएकस्याएवको
टेःसमुल्लेखात्तस्मात्संभावनमनध्यवसायभिन्नमितितस्योपमेयेउपमानताप्रत्यायकत्वा
दलंकारत्वमितिचक्रवर्तिनः न्यायपंचाननादयस्तु संभावनानध्यवसाययोर्विशेषश्चिंत्यः अ

© Dharmartha Trust J&K. Digitized by eGangotri

त्रापिशाब्दबोधेमुख्यत्वादेर्भानेपिअलंकारताप्रयोजकसंभावनेतस्यविशिष्यानुल्लेखात् किंच
द्वेयमितिकिंपुनस्स्विदयमितिवद्विशिष्यनानाकोट्यनुल्लेखसत्वात् तस्मादुत्कटोपमानकोटि
कंप्रकृतविषयकसंभावनंउत्प्रेक्षा संदेहालंकारेतुतुल्यकोटिकमेवेतितेडुरइत्याहुः तदेतद्द
र्शयति उपमेयेइति विषयत्वंसप्तम्यर्थः संशयइति अनेककोटिकत्वमात्रसाधर्म्येणसंश
यत्वोक्तिःसंभावनमित्यत्रैवतात्पर्यात् संशयार्थकत्वादिति यथोक्तानध्यवसायरूपसंभावना
र्थकत्वादित्यर्थः। उत्प्रेक्षापदमाहात्म्यादेवोक्तार्थलाभइत्याह उत्कृष्टेति उत्कटेत्यर्थः कोटिनि
ष्ठोत्कटत्वघटकंचतज्ज्ञानस्योत्कटत्वमितिबोध्यं प्रकृष्टेति प्रसिद्धत्वेनउपमानस्यप्रकर्षेइत्यर्थः
ईक्षापदार्थमाह ज्ञानमिति यद्यपिउपसर्गाणांवाचकत्वपक्षेपिप्रशब्दार्थस्यप्रकृष्टस्यविष
यतासंबंधेनज्ञानेधात्वर्थेन्वयोनसंभवतिप्रसक्तइत्यादौईक्षणादिनिष्ठस्यप्रकर्षस्यबोधेपितस्य

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मत्वादिनाधात्वर्थान्वयाननुभवात् घटंपेक्षतइत्यादौप्रकृष्टघटबोधानुदयात् अन्यथाऽउपस
र्गत्वमेवनस्यात् उपसर्गाः क्रियायोगइतिसूत्रेणक्रियासंबंध्यर्थबोधकतायामेवतद्विधानात्
प्रकर्षस्यच आश्रयतयोपमानपदार्थेऽन्वयस्योत्कर्षस्यालाभेनक्रियान्वयात् प्रकर्षमात्रस्यप्र
शस्तार्थतयातदन्वयप्रतियोग्याश्रयरूपार्थस्योपस्थापकपदाभावात् क्रियायामेवोपसर्गा
र्थान्वयाच्च प्रकृष्टत्वोपसर्गशक्तिस्वीकारेपितस्यतादात्म्येनधात्वर्थेन्वयःस्यात् ननुविषय
त्वादिनेतिपरमार्थः तथापितादृशार्थपरत्वमुत्प्रेक्षाशब्दस्येत्यत्रतात्पर्यं यद्वा प्रकृष्टविषयक
त्वमेवात्रकथंचिदुपसर्गार्थः तथाचोत्कटस्यप्रकृष्टविषयकस्यचतादात्म्येनैवधात्वर्थान्वयः
द्योतकत्वेनुतादृशार्थधातोर्लक्षणेति एवमेवविनानार्थोवसंदेहेहरणंहारउच्यते नानासंदे
हहरणाद्धवहारःप्रकीर्तितइतिकात्यायनादिवाक्येष्वपिद्रष्टव्यं संदेहालंकारेति उपमेयवि

© Dharmartha Trust J&K. Digitized by eGangotri

षयकोपमानकोटिकज्ञानत्वस्य संदेहेपि सत्वादित्यर्थः ननु तत्रापि कोटेरुत्कटत्वसंभवात्कथं ततोऽ
तिव्याप्तिनिरासइत्यत आह तत्र तुल्येति ननु संदेहे कोटिद्वयस्य समानत्वमिति नियमोऽसिद्ध ए
व कोटिनिष्ठोत्कटत्वस्य संशये मणिकारादिसर्वसंमतत्वादनुभवसिद्धत्वाच्चेति चेत्सत्यं तथापि
संशयस्य समकोटिकस्यैवालंकारत्वमिति अलंकारभूतसंशयेतिव्याप्तेरुत्कटत्वविशेषणेन
वारणासंभवात् अतएव संदेहालंकारेतिव्याप्तिवारणं प्रयोजनमुक्तं न तु संदेहमात्रे इति न
कोपि दोषः संभवितइति लोकसिद्धस्येति विषयविशेषणं तादृशेति तन्निष्ठसादृश्यप्रति
योगीत्यर्थः असंभवीति लोकप्रसिद्धत्वाभावेपि कविप्रतिभामात्रकल्पितेत्यर्थः नन्वेवंमुखचं
द्रस्याद्युत्प्रेक्षायामव्याप्तिः संभाव्यमानस्य चंद्रादेः स्वतः संभवित्वादिति वाच्यं चंडीदासेनैवस
मर्थनात् तथाह्याह क्वचिदेकरूप्यमात्रस्यासत्वं क्वचित्तु संभाव्यमानस्यापि तत्राद्यं यथा ममे

© Dharmartha Trust J&K. Digitized by eGangotri

व कंठलुठत्कांचनयज्ञसूत्रः संवीज्यमानः सितचामरेण श्यामोऽवभासेत तडितोपगूढस्थलहला
कः किमु वारिवाहः अत्र संभाव्यमानतादात्म्यस्य धर्ममात्रस्यैवाऽसत्वं न तु संबंधिनो द्वितीयं य
था सवःपायादिंदुर्नवबिसलताकोटिकुटिलः स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाविनिहितः स्रव
न्मंदाकिन्याः प्रतिदिवससिक्तेन वयसा कपालेनोन्मुक्तः स्फटिकधवलेनांकुर इव अत्र संभाव्य
मानस्य कपालांकुरस्यापि शशधरविषाणसमो ऽत्रत्वमेवेति ह्लादित्वादिपदेन कार्यस्वरूपोभयग्रह
णं यद्यपि हेतुकार्ययोरपि स्वरूपत्वमस्त्येव तथापि तदुभयातिरिक्तस्यैवात्र स्वरूपपदार्थत्वया
विवक्षितत्वमिति प्राचां ग्रंथकृतां व्यवहारसमर्थनादत्रापि तथैवोक्तं वहतीव महीतलभरितो
नोदयतीव पृष्ठतो वारयतीव पुरतः प्रेरयतीव पार्श्वगतो गुरुकाय तवोपरि संस्थितस्तमोऽनि
वहः सेतुकाव्ये तमोवर्णनम् प्रसिद्धोदाहरणमपि तद्द्विवारसो कार्याय प्रदर्शयति एवं लिं

© Dharmartha Trust J&K. Digitized by eGangotri

पतीवेत्यादि असत्पुरुषसेवेवद्दृष्टिर्निःफलतांगतेत्युत्तरार्द्धम् मच्छकटिकाख्यनाटकेतमो
वर्णनेजयरामभट्टाचार्योक्तसमाधानमाह पचतीति नाम्नामिति कातंत्रवचनमेतत् य
द्यपिआख्यातमाख्यातेनक्रियासातत्येइतिवचनेनपचतभृज्जतेइत्यादौआख्यातांतयोरपि
समासोभवत्येव तथाप्यत्रतादृशंविशिष्यविधायकंनास्तीतिभावः सामान्यतएवेति यद्य
पिइवेनेत्यादिवार्तिकमपिविभक्त्यलोपपूर्वपदप्रकृतिस्वरत्वयोरेवविधायकंनतुसमासस्या
पि सहसुपेत्यनेनैवसमाससिद्धेरितिकैयटेनैवाभिहितत्वात् तथापिप्रसिद्धिवशादेवमुक्तं
उक्तसमासस्यनित्यानित्यत्वचिंतामपहायैवाह अथेति तथैवपरिहरति तर्हीति नैयायिका
दिभिःकर्तुराख्यातार्थत्वानभ्युपगमादाह वैयाकरणेति भावनायामिति धात्वर्थइत्यर्थः भाव
नाधातुवाच्येतितदभ्युपगमात् स्वप्रतियोगिकेति यद्यप्यन्वयासंभवादिस्येवंवकुमुचितसंबंधां

© Dharmartha Trust J&K. Digitized by eGangotri

तरेणाप्यन्वयविरहात् तथापि प्रकृते उक्तसंबंधेनैवान्वयः संभावित इति विशेष्यसंबंधोपादानं ननु
कुत्रान्वयबोधेऽप्यपरेणापि समन्वयबोधः कुतो न भवतीत्यत आह अन्वेति एकत्रजनितान्वयबो
धत्वेन निराकांक्षत्वादिति भावः उक्तार्थे प्राचीनसंमतिमाह तदेतदिति न्यग्भूत इति विशेषणता
मापन्न इत्यर्थः क्रियापद इति क्रियापदार्थभावनायामित्यर्थः यत्क्रियासाधनमग्र इति स्वविशे
ष्यभूतक्रियान्वयेन चरितार्थतयान्यत्रान्वयानाकांक्ष इत्यर्थः अन्यत्साहृष्यादिपदार्थमपेक्षितुं
स्वप्रकारकान्वयबोधविशेष्यतामापादयितुं न समर्थ इत्यर्थः अन्ववायेति पृथिव्यन्यसमवेतत्वा
भावस्य तत्र गंधेऽग्राह्यत्वादित्यर्थः व्युत्पत्तिवैचित्र्येति उभयान्वयाकांक्षावशेनेत्यर्थः युगपदिति
क्रमेणान्वयेऽनुपूर्वान्वयेनैव निराकांक्षतया द्वितीयान्वयो न स्यात् अत एव भुक्त्वा व्रजतीत्यत्र भो
जनकर्तुर्भोजनानंतरं व्रजनकृतिमानिति विशेषणमिति न्यायेन युगपदेव भोजनस्यान्वय इति

विशेष्य२

© Dharmartha Trust J&K. Digitized by eGangotri

दूष्योपायविवरणेप्यंगीकृतम् ननु प्रकृत्यर्थस्य प्रत्ययार्थेनैव समुत्थिताकांक्षत्वात्प्रथ
मं तत्रैवान्वयेन भाव्यमित्यत आह यद्वेति तथा च न तत्र एकस्यैव पृथिवीपदार्थस्यैव उभ
यत्रान्वयः किंतु तस्य सप्तम्यर्थ एव वा समभिव्याहारव्युत्पत्त्या च पृथिवीत्वावच्छिन्नप्रति
योगिताकभेद एव एवकारार्थ इत्यर्थः वैयाकरणानामिति मत इति शेषः बोधाभ्युपगमा
दिति धात्वर्थस्य वहनस्य वक्ष्यमाणयुक्त्या कर्तृविशेषणत्वेनान्वयायोगाच्चेत्यपि द्रष्ट
व्यं किंच इवपदस्य कर्तृविशिष्टसादृश्यपरत्वे आख्यातार्थकर्तुरनन्वयापत्तिः एतद्दोषपरि
हारार्थमेवाह नवेति तथा च क्रियाविशेष्यकत्वस्याख्यातार्थकर्त्रन्वयस्य च रक्षणमिति भा
वः आख्यातार्थकर्त्तरि धात्वर्थस्य कर्तृस्वसादृश्येनान्वय इत्यत्र दूषणमाह तन्मत इति अन्व
याभावादिति उक्तकार्यकारणभावबलेन आख्यातार्थप्रकारकधात्वर्थविशेष्यकबोधत्वस्य

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी· वकार्यतावच्छेदकत्वात् वहनस्य कर्त्रन्वयं निरस्य कर्त्तुः सादृश्यान्वयमप्युक्तरीत्या प्रत्याचष्टे ग्र
न्त एवेति नन्विवसमभिव्याहारे धात्वर्थप्रकारकबोधे आख्यातजन्यकर्त्तुरुपस्थितेराख्याता
र्थकर्तृप्रकारकबोधे चेवपदजन्यसादृश्योपस्थितेर्हेतुत्वे कल्पनीये सामान्यकार्यकारणभा
वबलेन च आख्यातार्थकर्तुर्वहनादिधात्वर्थेन्वयः अतउक्तबोधसिद्धिरित्यत आह अत्रैवे
ति प्रामाणिकत्वे गौरवमपि सह्यतेत्याशंक्याह प्रमाणेति इदं च सर्वं आख्यातार्थस्यैव क
र्त्तुरुभयथान्वय इति पक्षमधिकृत्योक्तं यदि तु कर्तृसादृश्यमेव लक्षणया इवपदार्थ इति
द्वितीयः पक्ष आश्रीयते तत्रेदं वक्तव्यं एवमपि वहनस्य धात्वर्थस्य इवार्थैकदेशकर्त्तरि विशे
षणतया आख्यातार्थकर्त्तरि च विशेष्यतयैकपदार्थस्य वाक्यद्वयमन्वयबोधापत्तिः य
दि तु समभिव्याहृतधात्वर्थकर्तृसादृश्यमेव लक्षणया इवपदार्थ इत्युच्यते तदोपमान

१२९ 129 क्वः क२ कः १२९

© Dharmartha Trust J&K. Digitized by eGangotri

स्यापिद्रवपदार्थत्वापत्तिः नचेष्टापत्तिः तस्यद्रवपदार्थबद्धिभोवनियमदर्शनात् एतेनक
र्तृसादृश्यस्यद्रवार्थत्वमपिनिरस्तं अपिच किंधातुर्वहनपरत्वेआख्यातंचकर्तृपरत्वेद्र
वपदस्यतात्पर्यग्राहकं उतधातुरेवविशिष्टवहनकर्तृपरत्वे नाद्यः विशकलितयोरेववहन
कर्त्रोर्बोधापत्तेः नचप्रत्येकोपस्थितौविशिष्टमन्वयबलभ्यमितिवाच्यं तथापिवहनेकर्तरिच
द्रवपदस्यलक्षणा साहचर्येचशक्तिरितिवृत्तिद्वयविरोधापत्तेः तस्यदोषत्वानभ्युपगमेपि
लक्षणाद्वयगौरवात् नद्वितीयः आख्यातमात्रस्यविनिगमनाविरहात् नचवहतीत्येतद्वि
शिष्टमेववहनकर्तृपरत्वेतात्पर्यग्राहकमितिवाच्यं एकस्मिन्पदेतात्पर्यग्राहकत्वस्यार्थवा
चकत्वोभयकल्पनेगौरवात् वहतीत्यस्ययत्प्रकारकयद्विशेष्यकबोधजनकत्वेतादृशार्थएव
तात्पर्यग्राहकत्वसंभवेनविपरीतान्वितार्थेतात्पर्यग्राहकत्वासंभवाच्चेतिसंक्षेपः प्रकारांतरेण

© Dharmartha Trust J&K. Digitized by eGangotri

अं॰को॰टी॰
१३०
130

णर्थं कृते अथेति कृतेरेवप्रतियोगित्वेनसादृश्यान्वयेविवक्षितंकर्तृसादृश्यंनसिद्ध्येदित्यतआश्र
यमपिसंसर्गकोटौनिवेश्याह कृत्याश्रयेति अन्याविशेषणीभूतेति यथापश्यतीत्यत्रकृतेः
तादृशचैत्रेन्वयः गजइवचैत्रोगच्छतीत्यत्रगजस्यापिप्रथमांतपदोपस्थाप्यतयातत्कृत्यन्व त्र
यवारणायअन्याविशेषणेति गजस्यतुप्रतियोगितयाइवार्थसादृश्येविशेषणीभूतत्वान्न
तदापत्तिः स्थीयतइत्यादिभावार्थलकारेधात्वर्थस्यान्याविशेषणत्वात्तत्रतदन्वयवारणाय
प्रथमांतेति ननुकृतिप्रकारकबोधत्वस्यकार्यतावच्छेदकत्वेरथोगच्छतीत्यत्रव्यापारलक्षणा
यांतस्यरथान्वयोनस्यात् नचकृतिपदमाख्यातार्थमात्रपरमितिवाच्यं वर्तमानत्वादेर
पिचैत्रादावेवान्वयप्रसंगात् एवमन्यत्रापीतिचेन्न तदतिरिक्ताख्यातार्थस्यैवकृतीत्य
नेनविवक्षणीयत्वादिति इवार्थइति एतेनप्रथमांतपदानुपस्थाप्यत्वसूचनं अभावइति

कृ॰
१३०

© Dharmartha Trust J&K. Digitized by eGangotri

चैत्रः कृत्यभाववानिति बोधात् कृतेरभावे तस्य चैत्रेन्वयादित्यर्थः संकोचेति यत्रार्थे कृतेःप्रका
रत्वेनान्वयो नुभवसिद्धस्तत्र तदुपस्थितेर्विशिष्यहेतुत्वकल्पनादित्यर्थः इवपदइति इवपदा
र्थ इत्यर्थः पदार्थस्येति इवपदार्थे विशेषणतापन्नस्येत्यर्थः अनौचित्यादिति संबंधभेदेन का
र्यकारणभावभेदानंत्यकल्पने गौरवादिति भावः नन्वव्ययेभ्यः प्रथमा विभक्तिरेवोत्पद्यत इति प
क्षस्यैव महाभाष्ये सिद्धांतितत्वात् तस्या अव्ययात्सुप इत्यनेन लोपे सादृश्यस्यापि प्रथमांतप
दजन्योपस्थितिरस्त्येवेति वाच्यं तथापि तस्य प्रतियोगितया तमः पदार्थादौ विशेषणतापन्नत्वे
न अन्याविशेषणीभूतत्वाभावात् ननु संबंधभेदेपि कृतिप्रकारतानिरूपितविशेष्यतायाति
पातार्थे कल्पनान्न तथा गौरवमित्यत आह सादृश्येति कृतेः सादृश्यप्रतियोगित्वस्यापि प्रकृते
विरहादिति भावः। ननु कथंचिदत्र कृतेरपि तथात्वमस्त्येवेत्यत आह किंचेति उक्तेति भेदानामि

वादीनांपरस्पराऽन्वये पूर्वोक्तप्रकारेणसत्तीत्यर्थः अपदार्थत्वादिति कृतिभेदयोरेवपदार्थतया कृतेः
प्रतियोगितया भेदान्वयसंभवेपि आश्रयत्वस्य तत्र भानासंभवात् स्वाश्रयप्रतियोगित्वंवनेताद्द
शस्थले संसर्गतयाऽभ्युपेयं इत्याह गौरवेति नचाख्यातस्यैव कृत्याश्रये लक्षणागौरवान्माना
भावाच्चेतिभावः तस्मात्स्थितमेतत्कृतेः स्वाश्रयप्रतियोगिकत्वेन भेदेनान्वयमंगीकृत्य नकृत्या
श्रयसादृश्यलाभसंभवः पदार्थप्रतियोगितावच्छेदकीकृत्य संसर्गांशाप्रविष्टपदार्थप्रतियोगि
कपदार्थीभूतभेदविशेष्यकबोधस्याव्युत्पत्तेः पर्वतोवह्निर्नभवतीत्यस्माद्वह्निनिष्ठप्रतियोगि
त्वावगाहि भेदविशेष्यकबोधस्यैवोदयात् अन्यथालक्षणामंतरेणापि कदाचिद्वह्नेःप्रतियो
गितावच्छेदकीकृत्यापि तस्माद्वह्निमान्नभवतीत्यस्मादिवशाब्दबोधप्रसंगात् अस्तु तर्हि धा
त्वर्थएवोपमानमितिशंकते नन्विति लेपनमेवेति लिंपतीवतमोंगानीत्युदाहृताभिप्राये

© Dharmartha Trust J&K. Digitized by eGangotri

णोदं एकस्यैव धर्मधर्मिभावः कुतो न स्यादित्याशंक्याह धर्मेति तदिदमुक्तमिति आचार्यदं
डिनेति शेषः दृष्टमित्यनंतरं पूर्वमुपमानमिति शेषः लिंपतीति धातुनिर्देशोऽयं श्लिष्ट तस्याल्पसण
यार्थपरत्वं यदुपात्तमित्यादिवत् धर्मभूतो लेपपदार्थस्तदाकोवास्यात्तस्योपमानत्वेन धर्म
त्वासंभवादिति भावः ननु भेदाभेदवादिनो भेदविरहेपि धर्मधर्मिभावमंगीकुर्वंतीत्यत आह
स एवेति वस्तुतस्तन्मतेपि भिन्नप्रकारोपस्थितावेव धर्मधर्मिभावः नीलो घट इत्यादिवत् भेदमा
दाय पौनरुक्त्यं अभेदमादाय सामानाधिकरण्यमिति तत्सिद्धांतात् अत एव कार्यादिस्थलेप्य
न्यप्रकारेणैव भेदाभेदाभ्युपगमः तदुक्तं भामत्यां कार्यरूपेण नानात्वमभेदः कारणात्मना हा
टकाद्यात्मनाभेदः कुंडलाद्यात्मनाभिदेति तस्मात्सर्वमतेपि एकस्यैव लेपनस्य धर्मधर्मिभावो
नुपपन्न एवेत्यर्थः नन्वेवमप्यनुपात्तधर्मनिमित्तकमेव सादृश्यमस्तु न ह्युपमायां सर्वत्रैव धर्मोपा

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰को॰टी॰
१३२

132

शाननियमः प्रामाणिकः धर्मलुप्तोपमोच्छेदप्रसंगादिति चेत् सत्यं ययोः सादृश्यमप्रसिद्धं तत्र ध
र्मोपादानस्यावश्यकत्वात् युक्तं तस्याप्यनंतरमेव वाच्यत्वात् तदुक्तमिति आचार्यदंडिने
तिशेषः भ्रांतिकारणमाह इवशब्दस्येति तद्रूपसमानधर्मदर्शनादित्यर्थः भ्रांतित्वप्रमाणमाह
नोपमानमिति उक्तवचनस्य तिःप्रमाणतानिरासाय आप्तेति यथार्थदर्शीत्यर्थः इदमेवदर्श
यन्व्याचष्टे अस्यार्थइति असंभवादिति इच्छायाश्चेतनमात्रधर्मतया समवायेनान्यत्रानुप
पत्तेरित्यर्थः नस्यादिति सम्यक्तत्यर्थविषयकेच्छायामेव सम्प्रत्ययविधानादित्यर्थः इतिविचा
रेइति तदर्थमाशंकायां सत्यां अइतिवार्त्तिकमारभ्यमिति प्रसंगइत्यर्थः लुलुण्ठिषतइवेति य
थालुण्ठनेच्छावतोऽवयवशैथिल्यादिकं भवति तथा तस्यापि सत्वादित्यर्थः यावन्निकत्वमात्रनिरा
साय आख्यातं चेति तिङंतत्वस्य शब्दमात्रधर्मत्वादाह तिङंतार्थेनेति उपमानाभावे हेतुमाह

कृ॰
१३२

© Dharmartha Trust J&K. Digitized by eGangotri

क्रियायामिं इति तिङंतपदोपस्थाप्यायामित्यर्थः पाक इत्यादौ सत्वधर्मापन्नतद्बोधात् सिद्धत्वे
प्रतीत्यविशेषेपि तादृशप्रतीत्यभावात् उक्तं हि भट्टैः यादृशी भावनाख्याते धात्वर्थस्यापि यादृ
शी नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित् क्रिया च फलानुकूलतादृशव्यापारसमूहः क्र
मभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते साध्येति सि
द्धरूपेणोपस्थितिविरहनियमादित्यर्थः साध्यत्वं च क्रियांतराकांक्षानुत्थापकतावच्छेदकरू
पवत्वमिति वैयाकरणाः पचतीत्युक्ते क्रियांतराकांक्षानुदयात् पाक इत्युक्ते च क्रियांतराकांक्षा
भ्युदयात् नैयायिकास्तु एवं सति भुक्त्वा व्रजतीत्यत्र क्त्वाप्रत्ययस्थले भुजिक्रियाभासनं इति शा
ब्दिकसिद्धांतविरोधः भुक्त्वेत्यत्र क्रियांतराकांक्षासत्वात् तस्मात् क्रियांतराकांक्षत्वतदनाकांक्षत्व
योः समभिव्याहारविशेषएव नियामक इत्याहुः अनिःपन्नेति सिद्धस्यैव साधनत्वादित्यर्थः। इदं त

तदाहुः २

दिति परामर्षाभावादिति सिद्धस्यैव एवंविधबोधविषयत्वान्न हि अयं पचत्यपचतीत्यादौ यथा देवदत्ता
दीनां इदमादिभिः परामर्षः तथा देवदत्त इदमित्यादिप्रयोगे इदमादिभिः पचतीत्यादिक्रियापरामर्षो
दृश्यत इत्यर्थः एतदभावेपि कुतो नोपमानत्वेत्यत आह इदंतदिति एतादृशज्ञानविषयभूतं यद्व
स्तु सिद्धस्वरूपं तद्विषयक एवोपमानोपमेयभावव्युत्पत्तिभावः ननु किमत्र नियामकमिति चेत् उच्य
ते उपमायां तावत्साधारणधर्म आवश्यकः तद्व्यतिरेके तत्स्वरूपस्यैवानुल्लासात् धर्मस्य चो
पमानवृत्तित्वं स्वीकार्यं न चासिद्धस्य धर्माधिकरणत्वसंभवः एवं च यदि धर्माधिकरणत्वं तत्र
स्वीक्रियते तदासिद्धत्वापत्त्या साध्यत्वनियमभंगापत्तिः यदि तु न तदंगीकारस्तदोपमाननिमि
त्तसामान्यधर्माभावात्तु तरां न सेति कैयट एव पंचमाध्यायेस्पष्टं न चासिद्धेपि प्रागभाव
प्रतियोगित्वादिधर्माश्रयत्वमस्त्येवेति वाच्यं तथाप्युपमाप्रयोजकधर्मस्य तत्र सत्वेमाना

© Dharmartha Trust J&K. Digitized by eGangotri

भावादितिभावः एवंक्रियायामुपमानत्वासंभवमुक्त्वाउपमेयत्वासंभवमाह परिपूर्णेनेति
तद्धर्मवत्तयाप्रसिद्धेनेत्यर्थः न्यूनान्येति उपमानवृत्तिधर्मापेक्षापकर्षाश्रयतज्जातीयध
र्मवतइत्यर्थः समाप्तेतिक्रियांतरापेक्षयान्यूनत्वविरहविशिष्टेत्यर्थः न्यूनत्वेति उपमा
नत्वाभिमतवृत्तिधर्मापेक्षापकर्षाभाववत्त्वादित्यर्थः अत्रभर्तृहरिकारिकांप्रमाणयति
तदुक्तमिति येनेति पतनक्रियारूपेणेत्यर्थः आताविति शरातिरातिराटिश्चबलाकावि
शकंटिकेत्यमरः तस्यपतनक्रियारूपस्यसमाप्तत्वात् न्यूनत्वाभावात् हंसबलाकोभय
संबंधिपतनस्याधःसंयोगजनकत्वसाम्येनतत्रान्योन्यापेक्षयोत्कर्षापकर्षाभावादित्यर्थः
नविद्यतइति तद्वृत्तिधर्माधिकधर्मवत्प्रतियोगिकसादृश्यवर्णनेनैवन्यूनधर्मोत्कर्षलाभाद
त्रतदभावादितिभावः ननुतर्हिभिन्नानामेवक्रियाणांतदस्तुपरस्परवृत्तिधर्माभाववत्त्वादि

© Dharmartha Trust J&K. Digitized by eGangotri

स्यत आह भिन्नेति क्रियात्वादिनासादृश्यं तु अप्रयोजकमेवेति भावः। उक्तग्रंथाभिप्रायेण कार्व्या
दर्शकारिकाव्याख्यानमुपसंहरति तथाचेति वैयाकरणमतेन क्रियाविशेष्यकबोधमाह
तथाचेत्यादिना नैयायिकरीत्या प्रथमांतविशेष्यकबोधमाह यद्वेति कर्तृत्वसंबंधेनेति
ननु वैयाकरणमते कर्त्तारव्यातार्थ एवेति तस्य पदार्थत्वात्कथं संसर्गत्वेन भिति चेत् सत्यम्
आख्यातस्य प्रकृते विषयलक्षणया उक्तत्वात् कर्तृत्वस्य संसर्गतया समुल्लेखात् युग
पद्वृत्तिद्वयस्वीकारे तु कर्त्ताप्याख्यातार्थ एव व्याख्येयः। युगपदिति एकस्यैव पदस्य युगप
द्वृत्तिद्वयस्योभयार्थबोधकतायाः प्राचीनैरनभ्युपगमात् इत्यर्थः तदंगीकर्तृ[illegible]मणिकारा
दिमते तु दोषांतरमाह ततइति प्रत्ययानामिति प्रकृतिप्रत्ययोस्वार्थसहभूत इति कात्यायन
वार्त्तिकात् तस्य हीति यद्यपि प्रकृत्यर्थप्रकारकबोधं प्रति प्रकृतिजन्योपस्थितिर्हेतुरित्यपि

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्ययार्थ

प्रकृत्यर्थविशेष्यकं प्रकारकबोधस्याप्यभावाद्यततोपि न तत्समाधानमित्यभिप्रायेण ३+

तदर्थः अन्यथा वैयाकरणानां आख्यातार्थस्य कर्तुर्धात्वर्थभावनायां विशेषणत्वे मान्ययानुपपत्तेः।
प्रकृतिप्रत्ययान्यतरार्थप्रकारकशाब्दबोधे तदन्यतरजन्योपस्थितेर्हेतुत्वमिति तदर्थपर्यवसा
नात् तथापि तयोः प्रत्ययार्थः प्राधान्येनेत्युक्तवार्त्तिकशेषदर्शनात्प्रकृतेः प्रत्ययार्थप्रकारकेत्यु
क्तं अत एव देवदत्तः पचतीत्यादौ चैत्रकर्तृप्रकारकभावनाविशेष्यकबोध इति समुद्घोषो वैया
करणानां ननु प्रत्ययार्थनिष्ठविशेष्यतानिरूपितविशेषणतासंबंधेन शाब्दबुद्धौ प्रकृतिजन्योप
स्थितेः कारणत्वे तैस्य आख्यातार्थकृतिवर्तमानत्वयोः परस्परान्वयाभ्युपगमादिना पूर्वमेव नि
राकृतत्वान्नायं दोषः इत्यपरितोषादाह अपि चेति तंडुलं पचतीत्यादौ तंडुलादेर्विभक्त्यर्थान्वय
द्वारा धात्वर्थान्वयो भवत्येवेत्यत आह साक्षादिति स्तोकं पचतीत्यादौ स्तोकस्याभेदसंबंधेन साक्षा
द्धात्वर्थान्वयदर्शनादाह अभेदेनेति अभेदातिरिक्तसंबंधेनेत्यर्थः तथा च वहनरूपधात्वर्थस्य

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकारत्वसंबंधेनइवार्थसंभावनायामन्वयोयुक्तइत्यर्थः निपातेति नइतिरिक्तत्वंनाम्नोविशेष
णं नकलंजमिति भक्षयेदित्यत्रविधिप्रत्ययस्यकृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबं
धित्वत्रितयवाचकतयाकलंजभक्षणेदृष्टसाधनत्वकृतिसाध्यत्वयोःसत्वेनतन्निषेधस्यबा
धाद्बोधयितुमशक्यत्वात् बलवदनिष्टाननुबंधित्वमेवप्रतियोगित्वसंबंधेननञर्थाभावेन्वेति।
स्यविशेषणतयाभक्षणेतथाचकलंजभक्षणंबलवदनिष्टाननुबंधित्वाभाववदितिनञर्थ
प्रकारतानिरूपितविशेषणतावि‌शेषसंसर्गावच्छिन्नधात्वर्थनिष्ठविशेष्यताकोबोधइतिनि
पातार्थधात्वर्थयोःसाक्षाद्भेदान्वयोपिभवत्येवेत्यर्थः चैत्रइति नपचतीत्यत्रआख्यातार्थकृ
तेरभावेतस्यचचैत्रेन्वयः पाकानुकूलकृत्यभाववांश्चैत्रइतिकृतिप्रकारतानिरूपितप्रतियो
गित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावनिष्ठविशेष्यताख्यप्रकारतानिरूपितविशेषण   कृः

© Dharmartha Trust J&K. Digitized by eGangotri

तानिष्ठसांसर्गिकविषयतानिरूपितचैत्रत्वावच्छिन्नविशेष्यताकबोधस्य तत्रानुभवसिद्धत्वादित्य
र्थः यत्तु तत्रापि नञ्कृतेरभावान्वयः अभावसंबंधेन कृतेरेव साक्षात्प्रथमान्तपदोपस्थाप्ये चैत्रेन्वयः
नञ्पदं च तात्पर्यग्राहकं अतो नाख्यातार्थकृतिप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः का
रणमित्यस्यासंकोच इति तन्न प्रतियोग्यन्वये अभावस्य संसर्गत्वे मानाभावात् प्रतियोगितदभा
वयोर्विरुद्धत्वेन प्रतियोगितांप्रकारतायां अभावस्य संसर्गत्वेन भानस्यादर्शनाद् असंभवाच्च अन्यथा
घटाभाववत्यपि भूतले अभावं संसर्गीकृत्य घटवद्भूतलमित्यादिप्रत्ययप्रसंगात् नञ्समभिव्याहृता
ख्यातार्थस्थल एवैवं कल्पनं तेन इति चेत् न विरुद्धार्थस्य कल्पयितुमशक्यत्वात् अन्यत्र यत्प्रकारक
यत्संसर्गकयद्विशेष्यकबोधानुभवसिद्धतया न विरुद्धत्वं तदनुसारेणैव कल्पनोल्लासात् तद्वैपरीत्ये
च तादृशबोधस्याप्रयोजकत्वात् अभावप्रकारकबोधस्यैव तत्रानुभविकत्वाच्च वस्तुतस्संबंधभेदे

© Dharmartha Trust J&K. Digitized by eGangotri

अ.के.टी.

नकार्यकारणभावभेदस्यावश्यकतया समवायसंसर्गककृतिप्रकारकचैत्रादिविशेष्यकबोधार्थमे
कः अभावसंसर्गककृतिप्रकारकचैत्रविशेष्यकबोधार्थं कृत्यभावप्रकारकविशेषणतासंसर्गकचै
त्रादिविशेष्यकबोधार्थं वापरः कार्यकारणभावः कल्प्यत इति न लाघवावकाशः प्रकारविशेष्यका
रक्षणमात्रस्य चार्थाकिंचित्करत्वात् एवं चाख्यातस्येव कृत्यभावे लक्षणा नञ्पदं तात्पर्यग्राहकमि
ति कथं प्रकारकप्रतीत्युपपत्तिरित्यप्यनाशंक्यं कार्यकारणभावभेदस्यावश्यकत्वात् इति कृतेबहु
ना नन्वन्यत्रदृष्टव्युत्पत्तिरक्षयौ लक्षणादिकल्पनामपेक्ष्य संसर्गान्तरेण कृत्यपदार्थान्वयस्यैव यु
+ लक्षणागौरवमेव समुचितमित्यत आह किंचेति अन्यत्रोक्तेतावत्पदार्थानामुक्तरीत्यान्वयाननुभ
वादत्रैव [illegible] रयुक्तत्वादित्यर्थः भावनाविशेष इति चैत्रः पचतीत्यादौ यत्र कृत्यन्वयस्तत्रैव संख्या
न्वय इति व्युत्पत्तिः तथा चाख्यातार्थसंख्याप्रकारकबोधं प्रति कृतिविशेष्यार्थकपदजन्योपस्थि

कृः

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिः कारणमिति फलितं अत एव चैत्रो पचति चैत्राः पचंती त्यादिप्रयोगनियमउपपद्यते वहतीवत

मस्त्यत्र च कृतेः स्वाश्रयप्रतियोगिकत्वसंबंधेन द्यर्थे साकाङ्क्षत्वे संख्यायाश्च तमस्यन्वयो न स्यात् न

मसः कृतिविशेष्यत्वविरहादिति भावः तस्यापीति भावनाविशेष्ये संख्यान्वयइति नियमभंगस्यापी

त्यर्थः न पचतीत्यत्र कृतेरभावान्वयेपि संख्यायास्तत्रैवान्वयाभ्युपगमात् तथा च भावनाविशेष्ये

संख्यान्वय इत्यस्य पुत्सर्ग एवेति तात्पर्यं नन्वेवमपि वह्निन कृत्याश्रयप्रतियोगिकभेदसमानाधिकरणे

त्यादिबोधः पर्यवसितः तथा च पदार्थावच्छिन्नप्रतियोगिताकसंसर्गकत्वस्य प्रतियोगिकप्रतियोगि

त्वीयसंसर्गतानिरूपितपदार्थीभूतभेदविशेष्यकान्वयबोधः कथं स्यात् वह्निर्न भवतीत्यस्माद्धाव

च्छिन्नप्रतियोगिताकबोधानुदयादिति पूर्वमेवोक्तत्वादिति चेत् सत्यं कृत्याश्रये आख्यातस्य लक्ष

णत्यत्र दोषाभावात् तथा प्रकृतिप्रत्यययोरुभयत्रापि लक्षणास्वीकारेण तथापि लाघवसंभवा

© Dharmartha Trust J&K. Digitized by eGangotri

प्र३ 137

त॥ महाभाष्येति नैवेतिङंतेनोपमानमस्तीति प्रागुपन्यस्तेत्यर्थः उपमेयत्वेति क्रियान्निष्ठोपमानत्ताभि
रूपितेति शेषः अतो न पंचमाध्यायाकरविरोधः तत्र हितेन तुल्यं क्रिया चेद्वतिरित्यत्र क्रियाया एवो
पमेयत्वे वतिरिति व्यवस्थितं॥ नन्वेवमपि न तद्विरोधनिस्तारः क्रियाया एवोपमानत्वस्यापि तत्र व्य
वस्थापितत्वात् क्रियेति प्रकृत्यर्थविशेषणमिति पक्षे प्रत्ययार्थस्य तथात्वलाभः प्रत्ययार्थविशेषण
मिति पक्षे च प्रकृत्यर्थस्य तथात्वलाभः सामर्थ्यादिति तत्र भाष्यकृद्भिरेव व्याख्यातत्वादिति चेत् सत्यं
क्रियाशब्देन सत्वधर्मानापन्नायास्तस्याविवक्षितत्वात् तथाहि तेन तुल्यमिति तृतीयासमर्थाद्वतिः
उपमानं च क्रियेति सूत्रार्थः तत्र क्रियायास्तृतीयासमर्थत्वमनुपपन्नं सत्वेवा स्विन एव तृतीयायुत्प
त्तेरिति पूर्वपक्षे ब्राह्मणवदधीत इत्यादौ ब्राह्मणादिपदानां ब्राह्मणादिकर्तृकाध्ययनादिलक्षणया
गौणत्वेन समाहितं भाष्यकारैः न ह्यन्यथा सूत्रार्थः संभवति न च तैलपाकेन तुल्यो घृतपाके इत्या

© Dharmartha Trust J&K. Digitized by eGangotri

शेत्क्रियाया अपि तृतीयासमर्थत्वमस्त्येव भोक्तुं पाक इति क्रियायोगनिबंधनतुमुनादिदृशोनादि

दर्शनादिति वाच्यं उपमानि:पसार्थसाधारणधर्माधारत्वविवक्षायां तस्य क्रियारूपत्वाभावात् त

त्रहि तुमुनादयो धातुवाच्यासत्वभूतक्रियापेक्षाः तृतीयादयस्तु नैत्यस्वरूपाश्रया न तु क्रियारू

पाश्रया इति कैयटेनैव समाहितत्वात् तथा च भर्तृहरिणोक्तं साध्यत्वेन क्रिया तत्र धातुरूपनिबं

धना सत्वभावस्तु यस्तस्याः स घञादिनिबंधनः ननु तथापि तृतीयाध्यायस्थो नवेतिङ तेनेति भाष्य

ग्रंथः कथमुपपादितः सामान्यधर्माधिकरणत्वविवक्षायां उपमेयभूताया अपि क्रियायास्तत्तुल्य

न्यायेनैव सत्वधर्माश्रयत्वप्रसंगादिति चेत् नह्युपमानोपमेयत्वोभयनिषेधवादिनात्वयापियं

वमाध्यायस्थसूत्रभाष्यादिग्रंथाः कथमुपपादिताः क्रियाया उपमेयत्वस्य तत्र साक्षादेवाभिहि

तत्वात् उपमेयभूताया अपि क्रियायाः सामान्यधर्माधिकरणत्वविवक्षायां स्वरूपप्रत्ययवताद

© Dharmartha Trust J&K. Digitized by eGangotri

वस्थानात् नन्वेवमपि क्रियायाउपमेयत्वनिबंधपरत्वं तत्तीयाध्यायभाष्यस्य अवस्थापयतात्वया
क्रियायाउपमेयत्वमाश्रित्यप्रवर्त्तमानाः पंचमाध्यायभाष्यादिग्रंथाः कथमुपपाद्यनीयाइतिचे
त् सत्यं निर्णयानात्मकप्रकृतविशेष्यकाप्रकृतारोपरूपत्वसंगत्याउत्प्रेक्षानंतरं संदेहालंकार
निरूपणमर्हतीत्यभिप्रायवानाह प्रकृतइति तत्पदार्थमाह उपमेयेति तदन्यपदार्थमाह उपमा
नेति विषयपदार्थमाह कोटिकइति निश्चयभिन्नेतीति भ्रांतत्वनिश्चयात्मकत्वयालङ्कारभावा
वान्नातिव्याप्तिरित्यर्थः स्थाणुरिति स्थाणुपुरुषोभयसाधारणोद्वेलादिरूपसाधारणधर्मज्ञान
जन्यतयात्तत्संशयस्यसादृश्येत्यनेनापिनव्यभिचारवारणमितिभावः ननुस्थाण्वादेरपिप्रकृ
तत्वं कुत्राप्यस्येवेतिकथंतत्पदेनव्यभिचारवारणमित्यतआह रसेति सादृश्येतीति अत्रसंश
यस्यदुर्जेयविजयोद्यमनिबंधनत्वान्नसादृश्यज्ञानजन्यत्वमितिभावः ननुयशांसिसंशयेनिमज्ज

यामासेयुक्त्वायशः स्थैर्यमाप्स्यति न चेति संदेहो लभ्यते स च सादृश्यजन्य एव असाधारणधर्म
दर्शनजन्यविप्रतिपत्तिजन्यसंशयान्यसंशयस्य साधारणधर्मदर्शनजन्यत्वनियमात् तथा च न्या
यसूत्रं समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः सं
शय इति अत्र ह्यसाधारणधर्मदर्शनजन्यः साधारणधर्मदर्शनजन्यो विप्रतिपत्तिजन्यश्चेति संशय
स्त्रैविध्यमेवाभिहितमिति चेत् सत्यं सादृश्यपदेन चमत्कारजनकसादृश्यस्य विवक्षितत्वान्न को
पि दोषः एवं च चमत्कारजनकसंदेहत्वमेव लक्षणमिति फलितार्थः संदेहेन सह वर्त्तते वर्ण्यत्वेनेति
ससंदेहस्त्वलंकारसंज्ञेयम् यदाहुः साम्यादप्रकृतार्थस्य या धीरनवधारणा प्रकृतार्थाश्रयात्
ल्लेः स ससंदेहः स उच्यते संदेह इत्यप्यस्य संज्ञान्तरं स्यात्स्मृतिभ्रांतिसंदेहैस्तदेवालंकृतित्रयमिति चंद्र
लोकादिदर्शनात् 'विशेषधर्मे' इति उपमानतादात्म्यबुद्धिप्रतिबंधके इत्यर्थः स च त्रिविधः उपमेयताव

© Dharmartha Trust J&K. Digitized by eGangotri

च्छेदकव्याप्यत्वरूपमानतावच्छेदकव्याप्यत्वं च तत्राद्यस्य प्रकृतनिर्णयहेतुत्वात् तद्दर्शने विशेषधर्मनि
र्णयसत्त्वात्संशयांतरानुदयः द्वितीयस्य तु तत्कोटिभानमात्रविरोधितया प्रकृतनिर्णयहेतुत्वा
भावादेकसंदेहनिवृत्त्यनंतरं अन्यकोटिकसंशयोत्पत्तिरिति दर्शयन्नाह प्रथमित्यादि विशेषध
र्मोक्तिविशिष्टसंदेहस्वरूपमित्यर्थः। किं तावदिति माघे जलविहारवर्णने अत्र इदं कमलं मुखं वे
ति पुरोवर्तिविशेष्यकः अभेदसंबंधेन कोटिद्वयप्रकारकः सौंदर्यातिशयरूपसमानधर्मदर्शनज
न्यसंशयः अत्र बिब्बोकस्य कमलेष्वसंभवात् तस्य नायिकाधर्मत्वेन नायिकानिर्णयानंतरं सुख
निर्णयः भावविशेष इति तथा च भगवान् भरतः इष्टानामर्थानां प्राप्तावभिमानगर्वसंभूतः स्त्री
णामनादरकृतो बिब्बोको नाम स विज्ञेयः एवं च मुखपदं मुखत्वपरं व्याप्यत्वं च परंपरयावधेयम् य
त्त्विति तेन तत्कोटिकसंशयाभावेऽपि प्रकृतनिर्णयाभावो त्कोट्यंतरमादाय संशयोत्पत्तेरिति भावः।

© Dharmartha Trust J&K. Digitized by eGangotri

इयमिति अत्र विरक्तस्यापि रुचित्वाभावो विद्युत्त्वव्याप्य इति विरक्तस्यापि रुचित्वज्ञाने विद्युत्कोटिकसं
शयो निवर्त्तते प्रकृतनिर्णायकसामग्र्याभावाच्च प्रकारांतरेण संदेह एवमग्रेपि बोध्यं कृतित
त्विषीति कृतिपदं चेष्टापरं प्रकृतेरप्यात्मधर्मत्वया शरीरे नुपपत्तेः लतायामप्यन्यप्रेरणयाक
र्मोत्पत्तिसंभवात् चेष्टापर्यंतानुधावनं अदृष्टवदात्मसंयोगासमवायिकारणिकायाः शारीर
क्रियाया एव चेष्टापदार्थत्वात् अतएव न तदनंतरमचेतनकोटिकसंशयस्यानुपपन्नत्वादिह
रत्विषीति दृशोरिति दृष्टिजन्यज्ञानविषयत्वाद्यापारानुबंधिविषयताभिप्रायेण दृग्विषयत्वमभि
हितं एवं रतित्वाभावव्याप्य दृग्विषयत्वदर्शने [illegible] रतिकोटिकसंदेहनिवृत्तिरित्यर्थः एवं च य
त्रैककोटितावच्छेदकव्याप्यधर्मोपन्यासस्तत्र निश्चयांतो यत्र तु तत्कोटितावच्छेदकाभावव्याप्यध
र्मोपन्यासस्तत्र निश्चयगर्भ इति विभागो ज्ञेयः तेन चेति तदभावेनेत्यर्थः एवं च विद्युत्संशयनिह

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिकारणीभूतदर्शनविषयाभावप्रतियोगित्वेन तेन स्फुटत्वमित्यदोषः ननूदाहृतिभिः प्राचीनै
र्निश्चयगर्भ एव संशयोऽलंकारत्वेन स्वीकृतस्तत्कथं निश्चयान्तोऽप्युपन्यस्त इत्यत आह परं त्वि
ति आद्ये प्रकृतव्याप्यधर्मोक्त्याप्रकृतनिर्णयो वाच्य एव द्वितीये तु प्रकृतव्याप्यधर्माभावमा
त्रोक्त्याप्रकृतनिर्णयो व्यंग्य एव वाच्यापेक्षया च व्यंग्यस्य चमत्कारातिशयजनकत्वमिति भट्टोद्भ
टेन तदेवाभिहितं अस्य च निश्चयान्तेऽपि वैचित्र्यानुभवादुभयोरप्यनुसारणं कृतं इति भावः दीक्षिता
इति एवं च विरुद्धानेककोट्यवगाहित्वं संशयत्वलक्षणं न कार्यं प्रकृतस्थलेऽव्याप्तेः एतेषु तन्निर्णी
तत्वं संदेहमिति प्रतीतेरेककोटिकसंशयस्यापि स्वीकर्तुमुचितत्वात् वृक्षः कपिसंयोगवान्न तदभाव
वांश्चेत्येतत्समूहालंबनवारणाय गुणः कपिसंयोगी न वेत्यस्यापि संग्रहाय तत्तदधिकरणांतर्भा
वेन कोटिद्वयांशे विरोधभानस्वीकारमपेक्ष्य तत्तदधिकरणावृत्तित्वज्ञानस्वीकारस्यैवोचित

त्वात् ततश्चैवं द्वेधमन्त्वेनोवसंतोवास्यान्निर्मातिस्यत्र एककोट्यन्नयेवं द्वावृत्तित्वमन्दनावृत्तित्वादिरू
पोविरोधः संसर्गमर्यादयाभासतत्त्वतिरोहितमतं समर्थ्यमिति जयरामभट्टाचार्याः । तेषामेव
सिद्धांतमाह केचित्त्विति अनुभावाभावकोटिकज्ञानस्यैव संशयत्वे कथं स्थाणुर्वेत्यादेस्तथात्व
मित्यत आह स्थाणुरिति विशेष्यतावच्छेदकावच्छेदेन तत्तदभावान्यतरकोट्युल्लेखाद्धि समानधर्मिक
तत्तदभावप्रकारकज्ञानस्यैव संशयत्वात् वाशब्देन तदभावोपस्थापनात् स्थाणुतदभाववत्पुरुष
तदभावोभयकोटिकं संशयद्वयमेव तत्रेत्यर्थः अन्यत्र यथा तथास्तु प्रकृते चैवं द्वौ निर्माता नवेत्या
दिकास्थले द्वित्वविशेष्यकनिर्मातृत्वतदभावकोटिकानानासंशयाः एवं युक्तानन्तु निर्मातृधर्मिकचैत्र
दिनानाकोटिकाः चैत्रश्चैकधर्मिकनिर्मातृत्वकोटिकोवा संशयः विशेषधर्मानुक्तानुदाहरणत्वप्र
रोधापत्तेः पूर्वसंशयव्यावर्त्तकधर्ममनुक्त्वैव यत्र संशयान्तरमुपनिबध्यते तस्यैव तदर्थत्वात् एक

© Dharmartha Trust J&K. Digitized by eGangotri

अ·को·टी·
२८१
141

संशयत्वप्रसंगश्च एवं चोत्तरत्वाभावादिति प्रबंधेनाह युक्तं चैतदित्यादिना तद्व्यंजक इति यथा किमिंदुः किंप
द्मं किमु मुकुरबिंबं किमु मुखमिति किंत्विति तदभेदबोधस्य अंतरन्यतादात्म्यज्ञानप्रतिबंधकत्वा
दित्यर्थः मार्त्तंडत्वप्रकारकेति अस्यांतरत्वादुक्तं अयं मार्त्तंडः किमिति शब्दात्तु अभेदसंसर्गक
मार्त्तंडप्रकारकसंशय एव लभ्यत इति ध्येयं दहनमयेत्यत्र संशयालंकार इति दीक्षितमतं नि
रस्यति इहेति अयवस्थितेति असामर्थ्ये संधिः क्रियतां सामर्थ्ये तु विग्रह इत्यत्र तात्पर्यादित्यर्थः
यद्वेति यागत्वसामानाधिकरण्येन ब्राह्मि अन्यत्वस्य यागत्वसामानाधिकरण्येन यवजन्य
त्वस्य च तेन बोधानादित्यर्थः सञ्जीक्रियंतामिति हर्षचरिते इयमुक्तिः सिंहवदिति अन्यानपे
सञ्जीवनसमर्थ्ये सतीत्यर्थः प्रांतरं दूरशून्योध्वा इत्यमरः श्ववदिति स्वातंत्र्येणाञ्जीवितुमसाम
र्थ्ये सतीत्यर्थः तत्रेति सूर्यकिरणधर्मिकसंदेह इत्यर्थः समानेति शाब्दतादात्म्यारोपपरद्वय

रु:
२८१

© Dharmartha Trust J&K. Digitized by eGangotri

स्यसमानविभक्तिकत्वं तत्त्वापेक्षणादिति भावः। विभक्त्यनपेति इष्टाचारोपण एव तदपेक्षणादित्यर्थः इ
दं तेन सूर्ये किरणाभावेप्यध्यवसानमूलकत्वमस्त्येवेत्याह तद्भिंसमित्यादि सूर्यकिरणत्वं धर्मि
तावच्छेदकत्वेन संशये कुतो न भासत इत्यत आह सूर्येति संशयधर्मितावच्छेदकीभूतधर्मः संशये
आरोप्यतावच्छेदकतया आरोप्यतया वा न भासते तन्निश्चयसत्वेन संशयानुपपत्तेरित्यर्थः।
तथा चेति यद्यप्येवमपि विभक्त्यभावादिति हेत्वनुपपत्तिस्तदवस्थैव तथाप्यध्यवसानमात्रस
मर्थनमात्रेणातदुक्तिरामणीयकमिति ध्येयं वस्तुतस्तु तदनुकूलविभक्तेरित्यस्य विभक्तिपदं
ज्ञानपरमेव तथा चारोपस्थले रूपकवद्विषयतावच्छेदकप्रकारेणाविषयज्ञानाभावान्न सारोप
इत्यर्थः। एतेन यदुक्तं रसगंगाधरे एतेनाध्यवसानमूलत्वं संशयस्य निरूपयतो विमर्शिनीकार
स्यापि किरणास्त्वेति तदपास्तं विषयतावच्छेदकरूपेणाविषयस्यानुपस्थित्या अध्यवसानस्यावस्य

किं सा करेः स्त्रमविनोदेभिरार्द्रवातं संचारयामि नलिनीदलतालवृन्ते॥ अंके निवेश्य चरणावुत पद्मताम्रौ संवाहयामि करभोरु यथा
सुखं ते इत्यत्र विकल्पः पृथक्। अत्र युगपत्कर्तुमशक्यत्वेपि द्वयोर्मेवस्थापकाभावादुभयत्राप्युरुस्यैव कर्तृत्वादिति केचित्
प्रत्ययनुसारे लेवं हूतं

© Dharmartha Trust J&K. Digitized by eGangotri

अ.कौ.टी.
१४२
१४३

142-143

कत्वात् यद्यपि तत्र संध्यावधूने हरसाहरणं तीरे तरूल्यावदनं सहासं नीरे सरोजं च मिलद्विकासं आ
लोक्य धावत्सु भयत्र मुग्धा मरंदलुब्धालिकिशोरमाला अत्र पुरोवर्त्तिनि कमले मिदं वेति संश
यो व्यंग्यः इति तन्निरस्यं मुग्धपदेन उभयत्र धावन सहकारे न संशयस्य वाच्यत्वात् मुग्धः सुंदरमु
८ [illegible] योरित्यनुशासनात्तेन विपरीतज्ञानवत्तालाभात् उभयत्र धावने न च भ्रमरत्वनिश्चयात् संशय
त्वपर्यवसानात् चित्रमीमांसायां तु कांचित्कांचनगौरांगीं वीक्ष्य साक्षादिव श्रियं वरदः संशयापा
पन्नो वक्षःस्थलमवैक्षत अत्र संशयस्य परोपात्तत्वेपि तावन्मात्रस्यानलंकारत्वात्तदलंकारत्व
प्रयोजकस्य वक्षोगते न लक्ष्मीस्तनोवतीर्यं किं पुरतस्तिष्ठतीति संशयाकारस्य चतुर्थचरणेन
व्यंग्यत्वात्संशयध्वनिरयं यथा दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः वीक्ष्य बिंब
मनु बिंबमात्मनः कानि कान्यपि चकार लीलया अत्र कानि कान्यपीति सामान्यतो निर्दिष्टानुभा

कु.१४२
१४३

© Dharmartha Trust J&K. Digitized by eGangotri

विशेष २

वैप्रतीत्यर्थत्वज्ञापनाय प्रयोगेपि तस्या विभावानुभावाभ्यां रसानुगुणाभिव्यक्तिरूपो ध्वनिरेव
मत्रापीत्युक्तं अत्र रसगंगाधरकृतः संशयापन्नपदेन विरुद्धनानापदार्थसंबंधावगाहि
ज्ञानस्य साक्षादेवाभिधानात् विरुद्धपदार्थविशेषाकांक्षायां वक्षस्थलावेक्षणागम्यतत्कार्थो
व्यंजनव्यापारेणाबोध्यमानः शब्दोपात्तसामान्याभेदेन पर्यवस्यति एवं च संशयकोटिध्
तस्य वक्षस्थलेत्यादिभागस्य विरुद्धनानार्थत्वरूपसामान्यरूपेण शब्दशक्तिगम्यत्वाद्वा
क्यार्थसंशयांगत्वाच्च न ध्वनित्वं युक्तं वाच्यश्रेस्य तु वनस्येव तत्त्वमिति सिद्धांतादित्याहुः
जयराम भट्टाचार्यास्तु साक्षादिव प्रियं वीक्ष्येत्यंतेन हेतूपन्यासेन इयं लक्ष्मीर्नवेति सं
शयस्य संशयपदबोध्यस्यैव नापि कोत्कर्षाधायकस्यात्रालंकारत्वं युक्तमिति न ध्वनित्व
मित्याहुः इति ससंदेहः ५ उपमानतावच्छेदकावच्छिन्नाभेदविषयकत्वेन संशयानेत

© Dharmartha Trust J&K. Digitized by eGangotri

रंरूपकनिरूपणमित्यभिप्रायेणाह रूपकमाहेति लक्षणादीनां स्वरूपमात्रकथनपरतया रूपक
लक्षणप्रवेशे वैयर्थ्यादिदं लक्षणमिति सूचयन्नाह लक्षणं त्विति इतरभेदसाधकं इत्यर्थः उप
मेयतेति मुखं चंद्र इत्यत्र मुखत्वमुपमेयतावच्छेदकं तदधिकरणे मुखे चंद्रतादात्म्यं प्रतीयत इ
ति लक्षणसमन्वयः भ्रांतिमतीति अतिशयोक्तेरप्युपलक्षणं अप्रतीतेरिति इदंत्वेनैव तत्रोप
मेयभानादुपमेयतावच्छेदकप्रकारकतद्ज्ञानाभावादिति भावः नच भानविरहेपि तत्सामाना
धिकरण्यं वस्तुतोस्त्येवेति कथं न व्यभिचार इति वाच्यं उपमेयतावच्छेदकधर्मितावच्छेदकीकृत्ये
ति सामानाधिकरण्यतात्पर्यात् प्रविशिष्टत्वादिति पूर्वमुपमेयतावच्छेदकप्रतीत्यभावादप
ह्नुतौ च तत्रोपमेयतावच्छेदकनिषेधात् उपमेयतावच्छेदकधर्मधर्मितावच्छेदकीकृत्योपमान
तादात्म्यप्रतीतिविरहस्तुल्य एवेत्यर्थः अविरोधेति कोटिद्वयांशोत्कटत्वादिरूपविशेषविर

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यर्थः॥ उत्प्रेक्षायां चोपमानतादात्म्यकोटेरेवोत्कटत्वान्न व्यभिचार इत्यर्थः संशये तु प्रसंग एव
नास्ति उपमेयतावच्छेदकमुखत्वादिधर्मितावच्छेदकस्य चंद्रादितादात्म्यकोटिकस्य मुखं चंद्रो मु
खं वेत्याकारकसंशयस्यानुपपत्तेः मुखचंद्रभिन्नं न वेत्यादेश्चोपमानतादात्म्यानवगाहित्वात् न
चात्र चंद्रभेदाभावांशे चंद्रतादात्म्यावगाहित्वमस्त्येव भेदाभावस्यापि प्रतियोगिरूपत्वादिति वा
च्यं प्रतियोगितावच्छेदकधर्मरूपेण भेदात्यंताभावइति स्वाकारेणाभिधानात् नन्वेवमप्ययुक्तं
नहि रूपके सर्वत्रोपमानतादात्म्यमेव भातीत्यस्ति नियमः उपमानतावच्छेदकारोपस्यापि रूप
कत्वांगीकारात् तथा चाग्रे उदाहरिष्यत एव अन्यैरप्यास्यपूर्णशशांकता नयनयोस्तादात्म्यमं
भोरुहाणमित्यादि इत्यत आह तं अतः संसर्गारोपरूपरूपकसंग्रहाय उपमेयतावच्छेदकधर्मधर्मिताव
च्छेदकोपमानतावच्छेदकसंसर्गयोरननुगमात् सहितुतायां तु उपमानभेदज्ञानप्रतिबंधकज्ञान
तादात्म्यतदवच्छेदकान्यतरवत्तावगाहित्वं लक्षणमावश्यकमेव उपमानतादात्म्योपमानता [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
१४५
145

विषयत्वेनउपमानतावच्छेदकात्यंताभावज्ञानप्रतिबंधकज्ञानविषयत्वेनवा उभयोरनुगमंकृत्वाप्र
वेशः कार्यः भवतिचचंद्रोयमितिज्ञानंनायंचंद्रइतिज्ञानेचंद्रत्वाभाववानयमितिचज्ञानेचंद्रैवान
यमितिज्ञानंचनायंचंद्रइत्यत्रचंद्रत्वाभाववानित्यत्रचज्ञानेप्रतिबंधकं एवंचचंद्रभेदात्यंताभाव
स्यचंद्रत्वरूपत्वेपितत्संसर्गारोपोस्त्येव एवंमुखंचंद्रत्ववन्नवेत्याहार्यप्रतीतिकथंनसंशयेतिव्या
प्तिशंकेतिचेत् सत्यं संशयेउपमानतावच्छेदकसंसर्गभानेपितज्ज्ञानस्यचंद्रभेदादिज्ञानवि
रोधित्वविरहात् चंद्रभेदस्यापितत्रज्ञानेकोटित्वेनस्फुरणात् नचतत्प्रतिबंधस्वरूपयोग्यत्व
मात्रंतत्राप्यस्तीतिवाच्यं अत्रतदुपहितत्वस्यैवविवक्षणीयत्वात् नचैवंयत्रमुखंचंद्रइतिज्ञा
नेनचंद्रत्वाभाववच्चंद्रभेदादिविषयकज्ञानप्रतिबंधोनोपहितस्तत्रप्रायशोऽव्याप्तिरितिवाच्यं
एतदनुरोधेनस्वरूपयोग्यत्वविवक्षायामपिसंशयस्यप्रतिबंधकावच्छेदकधर्मानवच्छिन्नतयास्व

१४२

रू·
१४५

© Dharmartha Trust J&K. Digitized by eGangotri

रूपयोग्यत्वएवमानाभावादितिसंक्षेपः चित्रमीमांसाकृतस्तु बिंबाविशिष्टनिर्दिष्टविषयेयद्य
लि[illegible]ह्नुते उपरंजकतामेतिविषयीरूपकंतदा आद्येनविषयविशेषणेन लता[illegible]रवरत्नानां
यदलक्तकमार्जनं इदंश्रीखंडलेपनपांडुरीकरणंविधोरितिनिदर्शनायांव्यभिचारवारणं तत्र
मार्जनस्यालक्तकादिरूपबिंबविशिष्टत्वात् तस्कानापन्नश्रीखंडरूपप्रतिबिंबधर्मस्यविषय
[illegible]दिश्युपन्यासात् द्वितीयेनतद्विशेषणेननिगीर्याध्यवसानरूपायाअतिशयोक्तेर्निरासः तत्रमु
खत्वाद्युपस्थापकपदप्रयोगविरहात् तृतीयेनापह्नुतेर्वारणं तत्रमुखादेर्निषेधेननिह्नुतत्वात्
उपरंजकतांआहार्यतादात्म्यनिश्चयगोचरतांएतीत्यनेनसंदेहोत्प्रेक्षासमासोक्तिपरिणामभ्रां
श्र२ तिमत्सुव्यभिचारवारणं आद्यद्वयेनिश्चयाभावात् तदुत्तरद्वयेप्रियविषयताद्रूप्यानवगाहनात् अं
त्येआहार्यत्वविरहादित्याहुः अप्परसगंगाधरकृतः आद्यविशेषणंनिदर्शनावारकंव्यर्थमेवत

© Dharmartha Trust J&K. Digitized by eGangotri

त्रापि वाक्यार्थे रूपस्वीकारेण निदर्शनात्वाभावात् निर्दिष्टपदस्यापि किंकर्थंचिदभिहिते इत्यर्थे उतो
पमेयतावच्छेदकरूपेणाभिहिते इति नाद्यः सुंदरं कमलं भाति लतायामिरमद्भुतमित्यतिशयोक्तौ
सुंदरत्वेन रूपेण वदनस्याप्यभिधानादतिव्याप्तेः नद्वितीयः अपह्नुतिवारकविशेषणवैयर्थ्यात्
तत्रोपमेयतावच्छेदकस्य निषिध्यतया तेन रूपेण विषयस्यानिर्देशादत एव तद्व्यावृत्तेः भ्रांतिमद्वा
रणाय यार्थेति निश्चयविशेषणवैयर्थ्याच्च तत्रोपमेयतावच्छेदकप्रकारकप्रतीत्यभावादेव व्य
भिचाराप्रसक्तेर्वक्ताशादित्याहुः तच्चिंत्यं रूपकसमाप्त्यवसरे सप्रपंचं वाक्यार्थे रूपकस्य निराकरि
ष्यमाणत्वेन तत्त्वसादनस्वरत्वानामित्यत्र रूपकत्वाभावस्य वा व्यवस्थापनीयतया तत एवाव्याप्तिदोष
स्य निरासात् ननु तथापि बिंबाविशिष्टेति विषयविशेषणे कंदर्पद्विपकर्णकंबुमलिनैर्दीनांबु
भिर्लांछितं संलग्नांजनपुंजकालिमकलं गंडोपधानं रते श्यामानोकहपुष्पगुच्छमलिभिः संछा

© Dharmartha Trust J&K. Digitized by eGangotri

यमानो दूरं पश्येत्तच्छशिनः सुधासहचरं बिंबं कलंकांकितं इत्यत्र रूपकेऽव्याप्तिः अत्र शशिमं
डलरूपविषयस्य कलंकरूपबिंबविशिष्टत्वात् तत्स्थानीयतत्तज्जलादिरूपप्रतिबिंबानां विषयि
भूतेषु कंबुप्रभृतिषु निर्देशात् न चेदं रूपकमेव न भवतीति वाच्यं अनुभवविरोधात् संमतापेस
यावैलक्षण्यानिरुक्तेश्च अलंकारसर्वस्वविमर्शिनीकारादिभी रूपकत्वेन स्वीकाराच्चेति चेत् सत्यं अत्र ते
नैव समाहितत्वात् तथा च कुवलयानंदे निदर्शनाप्रकरणे दीक्षितैरुक्तं यत्र तु विषयविषयिविशेष
णानां परस्परसादृश्येन बिंबप्रतिबिंबभावोस्ति ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यं
तर्द्धानव्यसनरसिका रात्रिकापालिकीयं द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राकपाले न्यस्तं सिद्धांज
नपरिमलं लांछनस्य च्छलेनेति सावयवरूपकोदाहरणे तत्रापि विषयविषयिणोस्तद्विशेषणानां
च प्रत्येकमेवैक्यारोपः ननु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टकापालिकीरूप

© Dharmartha Trust J&K. Digitized by eGangotri

अ·कौ·टी·
५७

विषयित्वस्य विशिष्टरूपे लोकारोपोऽस्तीति ननु तत्राऽभोत्पलादीनां भस्मादीनां च परस्परारोपवशात्के
वलानां तेषां रात्रिविशेषणतया कापालिकीविशेषणतया च शाब्दबोधाभावात् अस्तु विषयविष
यिणोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टत्वाभावः कंदर्पद्विपेत्यादौ तु कलंकादीनां चंद्रमंडल
विशेषणतया दानजलादीनां च कंबुप्रभृतिविशेषणतया शाब्दबोधोदयात् विषयस्य बिंबवैशि
ष्ट्यं दुर्वारमेव न चात्रापि शशिमंडले कंबुतादात्म्यस्यैवारोपः कलंकदानजलादीनां चाभेदबो
धः पृथगेवेति बिंबवैशिष्ट्यं नास्ति कलंकस्य विषयतावच्छेदकत्वानभ्युपगमादिति वाच्यं चंद्रादि
विशेषणत्वेन प्रतीयमानानां कलंकादीनां विषयतावच्छेदकत्वाद्यनभ्युपगमे मानाभावात् स्व
कल्पितनियमानुरोधेन शाब्दविषयस्यार्थे[illegible]नपवादात् उच्यते अत्रांकितत्वलांछितत्वयोर्वस्तु
प्रतिवस्तुभावापन्नत्वेन तद्विशेषणतयैव बिंबप्रतिबिंबभावेन कलंकदानजलत्वयोरुपादानात्

कृ·
५७

स्पा२

© Dharmartha Trust J&K. Digitized by eGangotri

विषयस्यशशिमंडलस्यबिंबाविशिष्टत्वसत्वेनाध्यासस्यानवकाशात् नन्वेतावताविषयस्यबिंबवै
शिष्ट्यमक्षतमेवबिंबभावाविशेष्यतयावस्तुप्रतिवस्तुभावेनधर्मोक्तिस्थलेष्पुपमायाःसर्वसंम
तत्वात् उच्यते रूपकलक्षणेसाक्षाद्बिंबप्रतिबिंबभावापन्नधर्मविशिष्टत्वाभावस्यैवबिंबावि
शिष्टपदेनविवक्षितत्वमितिवाच्यत्वात् तस्मादनरवरत्नानामित्यत्रातिव्याप्तिवारणस्यतावतैव
भावात् तत्रमार्जनेनपांडुरीकरणयोर्विषयविषयिभावापन्नत्वेनतत्रसाक्षाद्गलत्ककश्रीखंडलेप
योर्विषयवि[illegible]शेषणत्वात् यच्चनिर्दिष्टपदेदूषणमुक्तं तदपिन उपमेय
तावच्छेदकरूपेणैवाभिधानस्यविवक्षितत्वात् अपह्नुतावोपमेयस्यनिषेधपितद्रूपेणाभिधानस
त्त्वादतिव्याप्तिसंभवेनतद्वारकविशेषणांतरस्यावश्यकत्वात् नचतथापिनिश्चयेआहार्यत्वविशे
षणवैयर्थ्यमेव तत्रोपमेयतावच्छेदकरूपेणानभिधानादेवव्यभिचारविरहादितिवाच्यं इष्टापत्तेः

© Dharmartha Trust J&K. Digitized by eGangotri

१५८ 148

उपरंजकतापदार्थस्य प्रकृतेतन्निमुक्तस्यैवाभिधानेपि सतिविरहात् यदप्युक्तं नायंसुधांशुः किंत
र्हिसुधांशुःप्रेयसीमुखमितिकुवलयानंददीक्षितोक्तायामपह्नुतावतिव्याप्तिः तत्रचंद्रेसु
धांशुत्वनिषेधेपिआरोपविषयस्यमुखस्याऽनिह्नवात् नचेदंरूपकमेवेतिवाच्यं स्वोक्ति
विरोधापत्तेरिति तदपिन तथाहि तत्रप्रसिद्धचंद्रेसुधांशुत्वनिषेधान्मुखेप्रसिद्धचंद्रा
भेदोनारोप्यतेबाधात् किंतुसुधांशुपदवाच्यत्वंचंद्रेनिषिध्यमुखमेवसुधांशुपदवाच्यमि
त्येवबोध्यते इंद्रोमरुत्वान्मघवाइत्यादिवत् एवंसाक्षात्सुधांशुमुखमेवमेभ्यादि
व स्फुटंलाक्षणिकःशशांकः एतद्भवोमुख्यमनंगचापंयुग्मंपुनस्तत्कुणमात्रदृश्ये
त्यत्रापिलाक्षणिकादिपदभंग्याप्रसिद्धचंद्रादेश्चंद्रत्वादिकंनिषिध्यमुखादेश्चंद्रादि
पदवाच्यत्वमेवप्रव्यवस्थाप्यतेइतिदिक्॥ चक्रवर्तिमतमाह अत्रेति अभेदइति शाब्द

क: १५८

© Dharmartha Trust J&K. Digitized by eGangotri

बोधविषयिभूतद्वृत्तिरोष: आहार्येति मुख्यत्वादिरूपधर्मोपस्थित्यानाहार्योभेदज्ञाना
नुपपत्तेरित्याशय: तद्रूपकमभेदोयउपमानोपमेययोरितिकाव्यप्रकाशस्वरसोप्यत्रे
तिध्येयं एवमारोपमात्रेणाभेद एव रूपकमित्युक्त्वा अभेदारोप एव रूपकमितिमतमाह
अभेदारोपइति इदंचचंडीदाससस्याप्यभिमतं यदाह अलंकारश्चात्राहार्यस्ताद्रूप्या
रोपएवेत्यवसेयमिति अथरामभट्टाचार्यमतमाह अन्येत्विति प्राचीनेति सरस्वती
कंठाभरणादावित्यर्थ: एतदिति उक्तमतद्वयमपीत्यर्थ: साधर्म्येति तद्भिन्नत्वेसतित
द्गतभूयोधर्मवत्वरूपत्यर्थ: भेदांशेति भेदज्ञानवत्वाद्धिज्ञानविषयेत्यर्थ: गौणवृत्तीति
गौणसारोपलक्षणेत्यर्थ: उपमेयइति चंद्रादिपदानां तत्साधर्म्यविशिष्टलक्षणयाउ
पमेयप्रतिपादकत्वमित्यर्थ: किंवाभेदस्यतदारोपस्यवारूपकत्वेतस्यव्यंग्यत्वमेवस्या

© Dharmartha Trust J&K. Digitized by eGangotri

२४८

m9

त् तथा च भ्रामिम रति मुक्तसहस्य पतां प्रलयं मूर्छितमः शरीरसादं मरणं च जलद भुजगजं
प्रसह्य कुरुते विषं वियोगिनीनामित्यत्र विषपदं व्यंग्यं हालाहलं वा अस्य भुजगरूपक
स्य सिद्धिक्रमदिति पंचमोल्लासविरोधः स्यात् अभेदेन तदारोपपर्यवसानात् सादृश्यस्यै
व रूपकत्वे तु तस्य लक्ष्यतया तदविरोधः न चैवं नियतारोपणोपायः स्यादारोपः परस्य
यइति परंपरितरूपकस्य आरोपरूपत्वकथनं अयुक्तं रूपकसामान्यस्य तदुक्तरीत्या
सादृश्यरूपत्वात् आरोपत्वाभावे तद्विशेषस्य परंपरितस्यापि आरोपरूपत्वानुपपत्तेः ॥
काव्यप्रदीपादिरीत्या तु आरोपस्यैव रूपकशरीरत्वाभ्युपगमान्नानुपपत्तिरिति वाच्यं त
त्रारोपपदस्य तत्प्रयोजकसाधर्म्यपरत्वादिति तद्ग्रंथशेषार्थः लक्षणप्रकारं वक्तुमा
शंकते नन्विति पानरूपकमिति मुखत्वप्रकारकबोधस्य चंद्रपदलक्षणाज्ञानजन्य

कः

© Dharmartha Trust J&K. Digitized by eGangotri

तावच्छेदकत्वोपगमेमुखपदेनैवमुखत्वप्रकारकबोधजननात्मुखंमुखंइतिवद्योग्य
त्वाच्छे[illegible]तिभावः चंद्रगतेति तथाचचंद्रगततल्लावण्यादिमन्मुखमितिबोधइत्यर्थः अन्येति।
चंद्रगततगुणानांचंद्रपदस्यमुखेप्रवृत्तिनिमित्तत्वंनस्यात् लक्ष्यवृत्तिगुणानामेवतथा
त्वादित्यर्थः पदार्थेतिदर्शनातोवैलक्षण्यानुपपत्तिरप्यदूषणा मुखगतेति तथाचमुख
गततल्लावण्यादिमन्मुखमितिबोधइत्यर्थः मुख्यार्थेति चंद्रस्यैवमुख्यार्थत्वात्तत्रचमुख
गुणसंबंधराहित्यादित्यर्थः अधिकरणेति उपमेयतावच्छेदकअधिकरणेइत्यर्थः नामा
र्थयोरिति समानविभक्तंयवरूढत्वेनतदभेदःसंसर्गतयाभासतइत्यर्थः एषांचचंद्रत्वा
वच्छिन्नप्रकारतानिरूपिताभेदनिष्ठसंसर्गतानिरूपितमुखत्वावच्छिन्नविशेष्यताकबो
धएवंविधस्थलेसंमतः सचानुपपन्नःमुखंनचंद्रइतिमुखत्वावच्छिन्नविशेष्यताकचं

© Dharmartha Trust J&K. Digitized by eGangotri

द्रत्वावच्छिन्नप्रतियोगिताकभेदप्रकारकज्ञानसत्वे तदसंभवादित्याह नन्विति योग्यतेति मुखं
चंद्राभिन्नमिति योग्यताज्ञानस्यैव तादृशशाब्दधीहेतुत्वात् मुखं न चंद्र इति ज्ञानसत्वे च तत
दनुदयात् तद्व्यतिरेकेण च शाब्दानुदयात् इति भावः नच प्रकृते भेदस्य सांसर्गिकविषय
तयाभानानभ्युपगमात्कथं तत्र भेदप्रकारकज्ञानस्य प्रतिबंधकत्वमिति वाच्यं अभेदविष
यकज्ञानस्येव भेदज्ञानप्रतिबध्यतावच्छेदकत्वात् आहार्येति सत्यप्युक्तबाधज्ञाने मुख
त्वावच्छिन्नविशेष्यताकभेदसंसर्गकचंद्रत्वावच्छिन्नप्रकारताकबोधो जायतामितीच्छ
या मुखं चंद्राभिन्नमिति योग्यताज्ञानं संभवत्येव इच्छाधीनज्ञाने बाधबुद्धेरप्रतिबंधक
त्वादित्यर्थः परोक्षेति प्रत्यक्षान्यज्ञानमित्यर्थः योग्यताज्ञानस्य चोक्तस्य मानसप्रत्य
क्षरूपतया आहार्यत्वस्वीकारेपि सिद्धांतविरोधाभावादिति भावः नन्वेवं वह्निनासिंचतीत्या

© Dharmartha Trust J&K. Digitized by eGangotri

शयव्याहार्ययोग्यताज्ञानाच्छाब्दबोधः स्यादित्याशंक्येष्टापत्तिमाह एवंचेति गौरवेति
सिद्धांतेतुशाब्दस्यानाहार्यत्वनियमात्तादृशस्थलेप्रयोजनाभावादनाहार्यत्वंननिवेश्य
तइतिभावः एवमिति यत्रानाहार्येज्ञानस्यैवहेतुतातत्रपरोक्षज्ञानीयहेतुतायामना
हार्यत्वंकारणतावच्छेदककोटौननिवेशनीयइतिभावः अन्येत्विति अयोग्यतानिर्णयद
शायांशाब्दधीवारणायैवाहार्ययोग्यताज्ञानस्यहेतुताकल्प्यतेयदित्वयोग्यतानिर्णयका
लेपिउक्तरीत्याशाब्दबोधइष्टस्तदातद्धेतुत्वकल्पनमेवदुर्लभंस्यात् अतस्तत्राभेदान्वय
बोधोनभवतीत्येवाभ्युपेयमित्येषामभिप्रायः कथंतर्हितत्रान्वयबोधइत्यतआह किं
त्विति चंद्रपदस्यचंद्रसादृश्येलक्षणा अतश्चंद्रसदृशाभिन्नंमुखमित्येवबुद्धिरितिभा
वः अत्रचंद्रसादृश्यमात्रेलक्षणायांसादृश्यस्यनिपातभिन्ननामार्थत्वेनआश्रयत्वेसं

© Dharmartha Trust J&K. Digitized by eGangotri

बंधेन मुखान्वयो न स्यात् अतो भेदान्वयार्थे विशिष्टलक्षणे सर्वथेयं स्यादेतत् एवं सत्यु
पमाया रूपकस्य च किं भेदकमित्याशंकते अथैकमिति उभयत्रेति चंद्र इव मुखमित्यत्रा
पि चंद्रसादृश्यस्य मुखवृत्तित्वावगाहनादित्यर्थः सादृश्यमिति तावन्मात्रस्य इवपदा
र्थत्वात् तस्य चानुयोगित्वेन मुखान्वयादित्यर्थः रूपके त्विति सादृश्यविशिष्टस्यैव ल
क्ष्यतया अभेदसंसर्गेण मुखान्वयादिति भावः यदि तु विशेषणादिकृत एव लक्षण्यमा
त्रेणालंकारांतरत्वमित्यंगीक्रियते तत्राह अन्यथेति चंद्र इव मुखमित्यत्र सादृश्यमु
पमेयविशेषणं चंद्रसदृशं मुखमित्यत्र च तद्विशिष्टो मुखविशेषणं अतो द्वितीयस्थ
लेपि रूपकमेव स्याद्वाच्यलक्ष्यत्वभेदस्याऽप्रयोजकत्वात् न चेष्टापत्तिः चंद्रसदृशमि
त्यादावार्थी उपमैवेति सर्वसंमतत्वात् एवं च पृथगिसस्य रूपकातिरिक्तालंकारापा

क्रः

© Dharmartha Trust J&K. Digitized by eGangotri

दानेनार्थः किंतु चंद्र इव मुखमित्येतद्वाक्यस्यालंकारातिरिक्तालंकारापादानमेवेति रूप
कापादान एव पर्यवस्यतीति ध्येयं । लक्षणाया इति चंद्रपदस्य चंद्रसादृश्यविशिष्टल
क्षणायामित्यर्थः ननु एवं चंद्र इवेत्यादावपि कुतो न ताद्रूप्यप्रत्ययः सादृश्यप्रत्ययमात्रस्यैत
द्गमकत्वे चापि तद्विरोधादित्याशंक्याह चंद्र इत्यादि लक्षणाविरहादिति तथा च
सादृश्यमात्रस्य न तदाक्षेपकत्वं किंतु लक्षणाया एवेति भावः विषयितेति आरोप्यता
वच्छेदकेत्यर्थः ननु लक्षणायाः सादृश्यविशिष्टप्रतीतिजनकत्वेपि कथं तत्तस्ताद्रूप्यप्रत्य
यो भविष्यतीत्यत आह नचेति लक्षणाजन्यत्वमात्रस्याप्रयोजकत्वात् सादृश्यस्यैव तत्
दाक्षेपकत्वे तु उक्तदोषतादवस्थ्यादिति भावः । अभिप्रायमाह श्लेषादित्यादि एकपदे
ति चंद्रपदेन चंद्रस्य शक्त्या चंद्रसदृशस्य च लक्षणया बोधात् तन्मूलकमभेदेन यावुभयो

© Dharmartha Trust J&K. Digitized by eGangotri

१५२

152

स्येदबोधादितिभावः नन्वेवमपिचंद्रसदृशएवचंद्रत्वरूपविषयितावच्छेदकधर्मबोधःस्या
न्नतुमुखत्वेनतस्यैकस्याप्यनुपात्तत्वात् एवंचमुखेचंद्रताद्रूप्यप्रत्ययोनुपपन्नएवेत्याशंकते·
नैवमिति इष्यतेचेति उपमानरूपकयोर्भेदसिद्ध्यर्थमित्याशयः चंद्रसादृश्येति॥
प्रथममुक्तरीत्या चंद्र[illegible]सदृशविशेष्यकचंद्रत्वप्रकारकबोधस्यव्यंजनयाभ्युदयेन
तच्चंद्रसदृशाभिन्नेमुखेपिचंद्रत्वप्रकारकबोधः अतोमुखेचंद्रताद्रूप्यप्रत्ययसिद्ध
एवेतिभावः॥ नचलक्षणांविनैवनामार्थयोरभेदान्वयव्युत्पत्त्याचंद्रप्रकारकाभेदसंस
र्गकमुखविशेष्यकबुद्धिसंभवात्किमर्थंलक्षणास्वीकारइतिवाच्यं अस्तिहिचमत्का
रकसाधारणधर्मानुपस्थितिदशायामुपमायाइवरूपकस्याप्युत्पत्तिः प्रतिचमत्काराभा
वश्चेतिसर्वानुभवसिद्धं कथमन्यथाभारतंनाटकमंडलंनगरंविधुमंडलमित्यादौरूप

कः

१५२

© Dharmartha Trust J&K. Digitized by eGangotri

कालंकारानुल्लासेपि सुपर्वालंकृतत्वस कलंकत्वाद्रूपधर्मोपस्थित्या रूपकोल्लासश्च
मत्कारोदयश्च परं तदाहृतस्थलेऽप्रसिद्धतया धर्मस्य शाब्दं तदुपादानमपेक्ष्यते मुखं
चंद्र इत्यादौ तु प्रसिद्धतया तद्बोध इति न नियमतस्तस्य शाब्दमुपादानमिति विशेषः॥
एवं च यदि रूपके सादृश्यस्यानुप्रवेशो नास्ति तर्हि तद्धर्मानुपस्थितिदशायां कथं न रूप
कपर्यवसानं तदाप्यभेदबोधकसामग्र्या अवैकल्यात् न चाहार्याभेदबुद्धौ चमत्कार
वा सादृश्यज्ञानं कारणमिति वाच्यं यद्यनुल्लासे भवेद्वह्निर्यद्यशीतं भवेज्जलं मन्ये दृढव्रतो
रामस्तदास्यादप्यसत्यवादीत्यादौ सादृश्यज्ञानाभावेप्यभेदबुद्धेरुदयात् न चोपमानो
पमेय[illegible]स्थलेऽप्येवं कल्प्यतामिति वाच्यं प्रमाणाभावात् अतोऽत्र सादृश्यलक्षणयाऽऽ
वश्यकत्वमेवेति एतदर्थं शेषोद्भवः॥ साक्षादेव विषयितावच्छेदकप्रत्ययं लक्षणपक्षे

© Dharmartha Trust J&K. Digitized by eGangotri

+२ नत्वमेव कार्यतावच्छेदकं कुप्तमिति चंद्रसदृशत्वेनैवान्वयोपपत्तौ न तु चंद्रत्वेनाल्लक्षणा सा २+

१५३

153

पयंगी कुर्वतां मतमाह केचित्विति तेन रूपेणेति लक्ष्यतावच्छेदकप्रकारेणेत्यर्थः चंद्रत्वेनेति शक्यतावच्छेदकधर्मेणैवेत्यर्थः ननु चंद्रसदृशलक्षणा ज्ञानस्य चंद्रसादृश्यप्रकारकज्ञाननिष्ठकारणतानिरूपितलक्ष्यतावच्छेदकावच्छिन्नप्रकारता ज्ञानत्वरूपकार्यतावच्छेदकानवच्छिन्नत्वादित्यत आह तत्पदेति ननु येन रूपेण पदार्थोपस्थितिस्तेनैवेतरपदार्थान्वयो भवतितत्कथमत्र चंद्रसदृशत्वेनार्थोपस्थितौ चंद्रत्वेन शाब्दबोधो भविष्यतीत्यत आह शाब्देति नन्वेवं सति लक्षणाज्ञानस्य लक्ष्यतावच्छेदकेप्रकारकज्ञानत्वरूपकार्यतावच्छेदकमपहाय यथोक्तकार्यतावच्छेदकांतरकल्पना गौरवमित्यत आह प्रकृत इति एतादृशकल्पनायां बीजमाह मुख्य इति ननु विषयतावच्छेदकप्रतीतिं विनापि तत्समानाधिकरणधर्मेणं प्रतीतिः स्यादेवेति किं चंद्रत्वादिप्रतिपत्त्येत्यत आह तां विनेति चंद्रत्वव्याप्यत्वेनाव

रु॰

१५३

© Dharmartha Trust J&K. Digitized by eGangotri

गतानामाकाङ्क्षादिकत्वविशेषादिरूपधर्माणां चंद्रत्वबोधं विनामुखेन ग्रहीतुमशक्यत्वादिति
भावः दूषयति तन्नेति मुखं न चंद्र इति बाधज्ञानस्य प्रतिबध्यतावच्छेदकं चंद्रप्रकारकाभे
दसंसर्गकमुखविशेष्यकज्ञानत्वरूपमेव तच्चोक्तस्थलसाधारणमेवेति कथं तत्स्थले
चंद्रत्वरूपेणाभेदान्वयबोधो भवितुमर्हतीत्याह चंद्रत्वेति ननु शक्तिजन्यतादृशबोधं
प्रत्येवप्रतिबंधकत्वं बाध्यमित्यत आह ईदृशेति तादृशबाधधीसत्त्वे उक्तबोधस्योत्पत्ते
शक्तिलक्षणाजन्यत्वस्याप्रयोजकत्वादिति भावः ननु चंद्रत्वेन रूपेणाभेदावगाहिशा
ब्दधीरेवात्र प्रमाणमित्यत आह चंद्रत्वावच्छिन्नेति तादृशबोधस्योक्तरीत्याशक्यत्वेनोपप
त्त्यानतदन्यथानुपपत्त्या लक्षणाजन्यत्वं कल्प्यत इति भावः ननु गंगायां घोष इत्यत्र गंगात्वेन
तटस्य बाधात् युक्तमेव लक्षणाजन्यबोधे बाधस्याविरोधित्वकल्पनमाह तद्भिन्नात्तन्निय

© Dharmartha Trust J&K. Digitized by eGangotri

तथैत्यपावनत्वादिधर्माणां तटे बोधानुपपत्तेः तत्संबंधबोधस्यैव तदाक्षेपकत्वे तु गंगाती
रे घोष इत्यतोऽपि तत्प्रत्ययप्रसंगात् उक्तं हि काव्यप्रकाशे तटादीनां गंगादिशब्दैः प्रति
पादने न तत्प्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्यय इत्यत आह अत एवेति·
नान्वय इति किंतु तत्संबंधित्वस्यैव लक्षणया बोधं जनयतु तदनंतरं शक्यलक्ष्ययोर
भेदबोध इति भावः गंगात्वेन तटं कुतो न लक्ष्यत इत्यत आह गंगात्वेनेति ननु यदा गंगा
त्वेन प्रवाह एव गृह्यते तत्रैव बाधबुद्धेः प्रतिबंधकत्वं यदा तु तीरमेव तद्रूपेण गृह्यते तत्र तु
न तथा भिन्नविषयत्वादित्याशंक्यते न चेति यद्रूपं धर्मितावच्छेदकत्वेन बाधज्ञाने भासते
तद्रूपावच्छिन्नविशेष्यताकतद्विशिष्टबोधो न भवतीत्याह समानेति वैपरीत्ये नियामक
माह अन्यथेति तत्रैकत्र पर्वतत्वेन पर्वतस्य परत्र च महानसस्य भानाद्विशिष्टबुद्धाप

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिरितिभावः नन्वेवंसतिकथंतटेघोषइत्यादिप्रत्ययइत्यतआह अतइति नचशक्तिलक्षणा
जन्यबोधोयथाबाधान्नभवति एवंव्यंजनयापिकथमभेदबुद्धिःस्यात् प्रतिबध्यतावच्छेदक
धर्मावलीढत्वादितिवाच्यं व्यंजनयाधर्मिग्राहकमानेनतद्बाधकत्वेनैवसिद्धत्वात्तन्मूलकज्ञा
नेबाधज्ञानस्यप्रतिबंधकत्वविरहादित्यालंकारिकसिद्धांतात् तथाचकाव्यप्रदीपे शाब्देन
लाक्षणिकेर्थेप्रतिपादितेतत्रमुख्याभेदोव्यंजनयाप्रतिपाद्यते नचव्यंजनेबाधःप्रतिबंध
कइतिकाव्यविदांपंथाइति केचित्तुसत्यामपिबाधबुद्धौशाब्दाभेदान्वयबोधः तद्रूपकंखंड
नकृता अत्यंतासत्यपिज्ञानमर्थेशब्दःकरोतिहीति अतोगंगात्वेनैवतटादिबोधइत्याहुः॥
एतदाद्यपरितोषान्मतांतरमवतारयति अन्येत्विति अभेदगर्भमिति भेदगर्भेतिबहुव्रीहिं
कृत्वाततोनञ्समासः तेनभेदनिर्मुक्तमित्यर्थः विशेषइति भेदावगाहनानवगाहनाभ्यां

© Dharmartha Trust J&K. Digitized by eGangotri

१५५
155

विषयभेदस्य स्फुटत्वादिति किंभेदकांतरगवेषणप्रयासेनेत्याशयः सादृश्यस्योपमासाधार
णस्यैवात्र प्रवेशे दोषमाह मतांतरे त्विति कथमिति भेदज्ञानस्याभेदप्रतीत्यनुपायत्वात्प्र
त्युत तद्विरोधित्वादिति भावः आरोप्यतावच्छेदकरूपेणैवाभेदबाधं समर्थयितुमाह वस्तु
तस्त्विति प्रतिबंधकतायामिति मुखं चंद्राभिन्नमित्यत्र सादृश्यज्ञानत्वावच्छिन्नप्रतिबध्यता
निरूपितायामित्यर्थः सादृश्यातिशयेति चमत्कारकानेकधर्मविषयिण्या इत्यर्थः ए
कस्यां प्रतिबंधकतायां विषयविशेषप्रतीतस्तेजनकत्वं न संभवति उक्तसादृश्यज्ञानसत्त्वे
वह्न्यभाववत्ताज्ञानसत्त्वेपि वह्निमत्ताज्ञानप्रसंगात् सादृश्यज्ञानाभावविशिष्टबाधाभा
वसत्त्वादत आह बाधेति तद्विशेष्यकतत्प्रकारकज्ञाने तद्विशेष्यकतदभावप्रकारकज्ञा
नत्वेन विशिष्यैव प्रतिबंधकत्वं कल्प्यते एवं च प्रकृते मुखं चंद्राभिन्नमिति ज्ञानं प्रति मुखं

© Dharmartha Trust J&K. Digitized by eGangotri

नचेदं इति ज्ञानं प्रतिबंधकं तत्रैव सादृश्यप्रतीतेस्तत्तेजकत्वं स्वीकार्यमित्यर्थः फलितमर्थमा
ह तथा चेति सादृश्यज्ञानसत्त्वे च तदभावविशिष्टबाधाभावो विशेषणाभावनिबंधनोऽ
स्त्येवेति प्रतिबंधकाभावादभेदबोधः सुघट एवेति भावः ननु एवं सादृश्यज्ञानाभावकाले बा
धधीसत्वे अभेदान्वयबोधो न स्यादित्याशंक्य ष्टापत्त्या परिहरति यत्रेति एवं सति यत्र सा
दृश्याभावमवगाह्य तत्राभेदान्वयबुद्धिरनुभवसिद्धा तत्र निर्वाहो न स्यादित्याशंकते नचैव
मिति एवं सादृश्यज्ञानोत्तेजकत्वस्वीकार इत्यर्थः इत्यादाविस्सादिपदेन आसीदियं दशरथ
स्य गृहे यथा श्रीः श्रीरेव वा किमुपमानपदेन सेयं कष्टं वतान्यदिव दैववशेन जाता दुःखात्म
कं किमपि भूतमहो विपाक इत्यादि संग्रहः सादृश्यज्ञानाभावादिति तथा च तद्विशिष्टबाधो
ऽस्त्येवेति प्रतिबंधकसाम्राज्ये कथं कार्योत्पत्तिरिति भावः भेदज्ञानाभावेति सादृश्याभावस्य

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञानेपितेनतद्घटकभेदाभावमात्रोल्लेखनात्तत्रापिप्रतिबंधकभेदज्ञानाभावोविशेष्याभावायत्त
एवेति अविकल एव प्रतिबंधकाभाव इति भावः कुत्रचिदिति मुखं चंद्र इत्यादौ विशेषणा
भावेति तत्रबाधज्ञानसत्वेपिसादृश्यज्ञानसत्वेनतदभावप्रयुक्तोविशिष्टाभाव इत्यर्थः॥
अत्रेति सिंहनसदृशोनायमित्यस्मिन्नुदाहृत इत्यर्थः तथाचतत्सत्वेमुखंनचंद्र इत्येतादृ
शबाधबुद्धेरेवाभावान्नानुपपत्तिलेशोपीत्यर्थः ननूक्तस्थलेसादृश्याभावोनावगाह्यतेकिं
तुतद्घटकभेदाभाव एवेत्यत्रनियामकाभाव इत्यत आह नहीति साधर्म्यज्ञानाभावेपिरू
पकंकुतोनस्यादत आह भेदागर्भेति रूपकशरीरेति तद्घटकत्वेनेत्यर्थः सर्वेति येषांता
वत्सादृश्यमूलकारोपविषयाभेदोरूपकंयेषांवातादृशाभेदारोपस्तेषामुभयेषांविशे
षणतया येषांत्वभेदप्रतीतिजनकप्रतीतिविषयसादृश्यमेवरूपकंतेषांविशेष्यतयासा

© Dharmartha Trust J&K. Digitized by eGangotri

दृश्यस्यरूपकघटकत्वादित्यर्थः एतेनयदुक्तंप्राक्रूपकस्थलेसादृश्यलक्षणानंगीका
रेधर्मानुपस्थितावप्यभेदबोधसामग्रीसत्वाद्रूपकनिर्वाहश्चमत्कारापत्तिरिति तदपा
स्तं सादृश्यज्ञानस्यबाधबुद्धिप्रतिबंधकतायामुत्तेजकत्वेनतदभावविघटकत्वेनोपयो
गस्योक्तत्वात् किंच रूपकापत्तिरित्यनेनयदिअभेदबुद्धित्वावच्छिन्नमापाद्यतेतदेष्टापत्ति
रेव यदितादृशवाक्यस्यालंकारत्वव्यवहारापत्तिरित्युच्यतेतदाआपादकाभावः नह्य
भेदज्ञानमात्रेणालंकारव्यवहारोभ्युपेयते अतएवचमत्कारवत्त्वाव्याप्यापादकाभा
वएवेतिउपमाप्रकरणोक्तंसर्वमवधेयं इत्यादिकमभिसंधायाह इत्यलमिति सा
मान्यलक्षणानंतरंविभागःप्राप्तसंगतिकः सचतत्स्वरूपकथनेनैवाविर्भविष्यतीत्य
भिसंधिनाऽवतारयति तद्भेदानिति रूपकंतावत्त्रिविधं सावयवंनिरवयवंपरंपरि

© Dharmartha Trust J&K. Digitized by eGangotri

तच्च आद्यं द्विधा समस्तवस्तुविषयं एकदेशविवर्ति चेति तत्राद्यमाह आरोप्या इतीत्याश्र
यः अतंत्रमिति अविवक्षितमित्यर्थः आरोप्या इत्यत्र पदार्था इति शेषः आरोप्यपदं चारो
पणि रूपकत्वपरं तथारोपविषयाश्चाविषयाश्चोभयपरमिति ध्येयम् आह यत्रारोपेति समस
स्तेति आरोपनिर्वाहकतयारोप्यं तद्विषयश्च समस्तशब्दार्थः तद्रूपस्य वस्तुनः शाब्दो
पात्तत्वेन विषयत्वादित्यवयवार्थः शोभते विशुद्धकिरणो गगनसमुद्रोऽजनि वेलालग्नः ॥
तारामुक्ताप्रकरः स्फुटविघटितमेघशुक्तिसंपुटमुक्तः सेतुकाव्ये शरद्वर्णनम् द्वितीयमा
ह एकेति मात्रानुरोधादेकेति शब्दप्रयोगः तदेवस्पष्टयितुमेकदेश इत्याद्यर्थमवक्ष्य
ति एकदेशवर्तीत्यर्थस्य विस्फुरद्दशरहितं संक्रान्तरमिति चण्डीदासः श्रौतत्वार्थत्वयोः प्रतीयो
गिसापेक्षत्वात्कारिकायामनुक्तं प्रतीयोग्यैर्दृश्यैरपि यत्र केचिदारोप्यमाणा इति सांगे

© Dharmartha Trust J&K. Digitized by eGangotri

दृष्टत्वस्यार्थमाह पूर्वोक्तमिति पीनपयोधरलग्नं दिशां प्रवसज्जलदसमयवितीर्णं सो
भाग्यप्रथमचिह्नं प्रम्लायति सरसनखपदं इंद्रधनुः सेतुकामेशरद्गुणेनं नखपदेन नखस्पर्श
तं पदं व्यवस्थितित्राणस्थानलक्ष्म्यांघ्रिवस्त्कषुदृष्टत्वस्याभिधानात् अतएव नखपदलेखालां
छितं बाहुमूलमिति तत्र स्फीरस्वामिनो हाहतं अधिकरणत्वेति बहुव्रीहिसमासोन्तर
त्वप्रत्ययबलात् तदन्यतरवृत्तित्वं लभ्यते नन्वन्यतरवृत्तित्वलाभेपि कथं दिशां नायिका
त्वाक्षेपः आयकवृत्तित्वे नापि पर्यवसानसंभवादित्यत आह अत्र जलदेति ननु नख
क्षतस्यान्यत्रापि संभवात् कथमेतदन्यतरवृत्तित्वनियम इत्यत आह न खलु क्षते चेत्या
दि एवं द्विविधं सावयवमभिधाय द्वितीयभेदमाह निरवयवं त्विति अभेदं तं तर प्रयोज्य
त्वाभावद्भेदकत्वं निरवयवत्वमिति दर्शयति यत्रेति एवं चैतद्व्युत्पत्तिकथनात् अभे

© Dharmartha Trust J&K. Digitized by eGangotri

दांतरप्रयोज्यतरूपभेदकत्वसावयवत्वमितिवैपरीत्येन पूर्वभेदस्यापिलक्षणांदर्शितंभवतीत्य
वधेयं रूपणमात्रमिति नत्वाभ्यासस्तदारोपोपपादकमारोपांतरमपीत्याशयः एकस्मिन्नि
ति विषयभूतेत्यर्थः भयसामिति विषयिणामित्यर्थः मन्मथधनुर्निर्घोषः कमलवनस्खलित
लक्ष्मीनूपुररावः श्रूयते कलहंसरवोमधुकरमाहतनलिनीप्रतिसंलापः सेतुकाम्येणरद्ध
र्णनं अनेकपदस्यत्रिप्रभृतिमात्रपरतामाशंक्याह अनेकपदमिति एकाभिन्नत्वस्यैवाव
यवार्थत्वाद्यमेवमुख्योऽनेकपदार्थः अतएवानेकमन्यपदार्थे इतिवचनविहितो बहुव्रीहिर्द्वि
त्रनुष्ट्यादौप्रसिद्ध इतिभावः इदंत्ववधेयं मालारूपकस्थलेविरोधालंकारध्वनिरावश्यकः।
एकस्यविरुद्धोभयतादात्म्यस्यात्रविषयीक्रियमाणत्वात् यथोदाहृतेकलहंसरवेधनुःश
ब्दनूपुरशब्दाद्यभेदावगाहनं अतएवयस्तर्केतत्रयातपत्रसहस्ररश्मिगंगेश्वरः सुकवि

© Dharmartha Trust J&K. Digitized by eGangotri

कैरवकाननेंदुरिति श्लोकं प्राचस्तारोपे कस्मिन्नद्देमानोऽव्याधायेमस्यैवं द्वोभयाभेदप्रती
त्याविशेषालंकारध्वनिरिति पक्षधरमिश्रः कुसुमांजल्युपायविरोधि विभावितमिति परंप
रितमाह अन्यारोपेति अन्यविशेष्यकान्यप्रकारकारोपाभावप्रयोजकाभावप्रतियोग्य
न्यविशेष्यकान्यप्रकारकारोपः परंपरितमित्यर्थः ननु सावयवैका[illegible]रं परंपरितस्य को भेदः

ण्ण

तत्रारोपांतरेणैव रूपकांतरसिद्धिहेतुत्वादिति चेन्न अत्र वदंति यत्र प्रकारांतरेण सादृश्य
निर्वाहसंभवेऽपि चमत्कारविशेषजननार्थं रूपकांतरमुपन्यस्यते तत्र सावयवं यथा शोभ
ते विशुद्धकिरणाइत्यादौ गगनसमुद्रांगत्वादिप्रत्ययमंतरेणापि शुभ्रत्वादिना तारासुमौ
क्तिकारोपसिद्धेः रूपकांतरोपन्यासे तु चमत्कारातिशय एवमुल्लसति विद्यमानसरोज
हंसत्वादौ तु राज्ञि हंसाभेदारोपहेतुसाधारणधर्मांतरस्य चमत्कारहेतोरप्रसिद्धत्वमाह

३५१

रूप४

© Dharmartha Trust J&K. Digitized by eGangotri

येसरोरूपकेणतद्भुतत्वरूपधर्ममादायराज्ञिहंसाभेदारोपोनिर्वहतीतिपरंपरितमितिभे
दः तस्माद्रूपकांतरमनपेक्ष्ययद्रूपकमेवमनस्वात्मानमासादयतितत्परंपरितं यत्रतुरूप
कांतरमनपेक्ष्यापिरूपकांतरमविकलमात्मानमाप्नोतितत्ररूपकांतरमुपन्यस्यमानं
चमत्कारसमुद्बलनार्थमेवापेक्ष्यतइतिसावयवत्वमितितदेतत्सर्वंविशदयन्नाह यत्रे[illegible]
त्यादि अन्येतुसावयवंबह्वारोपकंद्वंद्वारोपद्वयात्मकमित्येवविशेषइत्याहुः प्रावृट्लक्ष्म्या
पयोधरैःप्रतिप्रेरितोविंध्यः उद्वहतिनवतृणांकुररोमांचप्रपंचितान्यंगानि गाथाकोषेव
र्षाकालीननवप्ररूढतृणांकुरवर्णनं अत्रपयोधरपदेनमेघस्तनयोरुपस्थापनात्तयोर
भेदबोधनस्तनाभिन्नमेघालिंगनजन्यत्वात्तृणांकुरेषुरोमांचाभेदारोपइत्याह अत्रहीत्यादि
नन्वत्रतीक्ष्णाग्रत्वादिनापितृणांकुररोमांचरूपकनिर्वाहइत्यतआह यथाचेति महावंशाप

© Dharmartha Trust J&K. Digitized by eGangotri

देवबहुव्रीहिंकर्मधारयंवाश्रित्यतद्रुपस्थाप्यार्थयोरभेदारोपः अत्रमहावंशाश्रयरूपधर्म
णकीत्तौनत्तेकीतादात्म्यारोपः तन्निमित्तासाधारणधर्मान्तरानुपस्थितेरत्रतदारोपेविनाद्वि
तीयरूपकासिद्धेरित्याह अत्रेत्यादि उदाहरणद्वयस्यैकविषयत्वंदर्शयति उभयत्रेति प
याधरपदंपूर्वोदाहरणाभिप्रायेण वंशपदंद्वितीयोदाहरणाभिप्रायेणेत्यवगन्तव्यं रूपका
तरसिद्धिहेतुभूतरूपकघटकस्याप्यभेदोदाहरणमाह भेदयथेति उत्तरार्द्धंतुस्तनवस्त्राग्यि
त्वरूपैवधर्म्येनिरासमात्रपरमित्यवगन्तव्यं यदित्वत्रापिभास्वरत्वादिधर्मेणस्तुवर्णपट्टि
कायांविद्युत्तादात्म्यारोपसंभवात्क्लेशांबुदरूपकमतिरेकस्यतद्रूपकमतिरेकप्रयोजकत्वं
नास्तीतिविभाव्यते तदेतदमुदाहार्यं प्रथमपरंपरितरूपकंमालात्मकमवतारयति वाचक
इति मानसंसरसिस्वांतेरस्यनुशासनं कमलालक्ष्मीस्तस्याअसंकोचवैकमलानांपद्मानां

व२

© Dharmartha Trust J&K. Digitized by eGangotri

ने
मसंकोचोविकासस्तज्जनकतयास्वर्णाभेदारोपः दुर्गाणाममार्गणांतदाश्रयणार्थमन्वेषणं॥
असमर्थानामेवतदन्वेषणनियमात् तदेवदुर्गायाःपार्वत्यामार्गणंतेनशिवाभेदारोपः समि
तांसंग्रामाणांस्वीकारएवसमिधांकाष्ठानांस्वीकारः तेनवह्न्यारोपः सत्यवाक्येप्रीतिरेवस
त्यांदक्षकन्यायामप्रीतिः तत्रदक्षःप्रवीणः अथचदक्षःप्रजापतिविशेषः विजयोवैरितिरस्का
रः तस्यप्राग्भावेपूर्वकालेभीमभयजनकतदुत्तरंसौम्यत्वात् अथचविजयोऽर्जुनः बीभत्सुर्वि
जयःकृष्णइतिमहाभारतात् तत्पूर्वकालोत्पत्त्याभीमःपांडवविशेषः वत्सरशतमित्यत्रका
लाध्वनोरत्यंतसंयोगइतिद्वितीया परिवृत्त्येति परिवृत्तिपर्यायांतरोपादानेनसहंते तेनप्र
कृतार्थेननिर्वाहादित्यर्थः तदेवंदर्शयति नहीति अनर्थइति हृदयाभिन्नसरोरूपइत्यर्थः तामसहा
नीति परिवृत्तिसहानीत्यर्थः हंसादीत्यादिपदेनदीप्रद्युतिनीलकौमुदीतवैश्वानरपदसंग्रहः॥

© Dharmartha Trust J&K. Digitized by eGangotri

दृस्त्रमीमपदयोरुक्ततस्सरूत्वेमान साद्दिपदस्य दृश्यवगतिरित्यवधेयं शब्दार्थेति शब्दार्थो
न्यतरान्वयव्यतिरेकानुविधानस्यैवतत्तदलंकारतायांप्रयोजकत्वादित्यर्थः ननुपूर्वाचार्यै
रप्युभयालंकारोयंमिकित्यर्थालंकारमध्येउदाहृतोबीजाभावादित्यतआह केचित्त्विति पू
र्वाचार्यैरेवेत्यर्थः रत्नांतःपुरेतिप्रसिद्धोदाहरणाभिप्रायेण अक्खरणंतेउरए एकरेकुणंतस्सम
ङलग्गलडां रससंमुहीविसहसाणांमुही होइरिउसेणा यस्य रत्नांतःपुरेकरेकुर्वतो मंडला
ग्रलतां रससंमुख्यपिसहसापराङ्मुखीभवतिरिपुसेना कौक्षेयकोमंडलाग्रकरबालःकृ
पाणावित्यमरः सामर्थ्यादिति रत्नांतःपुरत्वारोपकेवलमंडलाग्रलतायाः तत्संबंधानर्हत्वया
तत्समानाधिकरणवल्लंतरावच्छिन्नायाएवतस्यास्तथात्वात औचित्यवशात्तस्यांनायिकाता
दात्म्यप्रतीतेरावश्यकत्वादित्यर्थः अंतःपुरंनायिकाप्रतिनायिकाधिकरणमिति व्याप्तिरेव

© Dharmartha Trust J&K. Digitized by eGangotri

161

सामर्थ्यमित्तिवक्रवर्त्तिनः दार्ष्टान्तिकमाह तथेति एवं च तदारोपस्यार्थगम्यत्वेन शाब्दालं
कारत्वविरहात्तत्पुरुषमेवात्रोदाहरणमिति चंडीदासादयः दृष्टान्तत्वाभिमते प्रकृताद्वैषम्य
माह रणस्येति सुखेति तथा च तस्य खड्गलताविशेष्यकनायिकातादात्म्यप्रतीतिमंत
रेणाप्यनुपपत्तिविरहान्नावश्यं तदपेक्षेति भावः नन्वेवं खड्गलतायानायिकातादात्म्य
प्रतीतिः कथं स त्वप्रतीयत आह असीति लिंगविशेषेति स्त्रीत्वरूपेत्यर्थः इदं च स्त्रीत्वा
दिलिंगमर्थनिष्ठमिति मते यथाश्रुतमेव शब्दनिष्ठमिति पक्षे तु परंपरया संगमनीयं।
प्रकृते लतायैवम्यमाह विद्वदिति ननु राजहंसयोरपि द्वयत्वादिकृतसादृश्यमस्त्येवेत्य
त आह हृद्येति चमत्कारप्रयोजके त्यर्थः अवसायरविप्रदोषा राजगजं द्रुढ्ठपट्टखला
प्रतिबंधः कथं कथमपि दाशरथे जेयके सारिपंजरगतो घनसमयः स तु काव्येशार

कृ:
१६१

© Dharmartha Trust J&K. Digitized by eGangotri

दारंभवर्णनं । प्रातिकूल्येन तदनुग्राहकमुदाहरति यथा चेति मानद्रुमैः पवनस्य मातुलिसवों परुष

गर्वं नितिकरस्य उपगूहनस्य भद्रं रातिनाटकपूर्वरंगस्य विरोधितेति मानेद्रुमारोपेण

द्रुमूलकत्वेनोपगूहनेपवनारोपः सिध्यतीति भावः । तत्पुरुषाश्रयत्वेति पूर्वपदभूतेत्य

र्थः यत्संबंधिनीति यत्र यन्निरूपितसंबंधिधर्मिकोयत्संबंधिप्रतियोगिकाभेदः प्रतीयते

तत्राभेदप्रतियोगिसंबंधिनिरूपकप्रतियोगिकाभेदः अभेदधर्मिसंबंधिनिरूपकधर्मिकः

सिध्यति एवं च यत्संबंधिनोरभेदबोधे यत्संबंधी प्रतियोगितया स एव द्वितीयाभेदप्रतियो

गितया यत्संबंधी वाश्रयतया स एव द्वितीयाभेदआश्रयतयेति फलितार्थः चंद्रिकायामि

ति चंद्रिकाविशेष्यकसोऽन्यप्रतियोगिकाभेदइत्यर्थः राज्ञीति राजविशेष्यकचंद्रप्रतियो

गिकाभेदस्यार्थः । यादृशेनैप्रकृतसिद्धरूपन्यस्तात्तदुदाहरति तद्यथेति नलन्यविशेष्यका

© Dharmartha Trust J&K. Digitized by eGangotri

न्यप्रतियोगिकाभेदबुद्ध्या कथमन्यविशेष्यकान्यप्रतियोगिकाभेदावगाहनमित्यत आह
समानेति तुल्यसामग्रीकत्वात् यद्धियेनविनानभासते तद्धीहेतोस्तद्बोधकत्वमिति सि
द्धांतात् सामग्रीति इंद्रियसन्निकर्षादिरूपेत्यर्थः व्युत्पत्तीति आकांक्षेत्यर्थः तथाच
यादृशरीत्यापदादुपस्थितिस्तथैवबोधः आकांक्षादीनां तत्प्रकारकतद्विशेष्यकाद्वि
तत्तद्बोधविशेषनियतत्वेनतद्विपरीत्येनशाब्दानुदयात् इतिभावः अन्यत्राप्याक्षेपमाह
एवमिति मुखप्रतियोगिकाभेदवांश्चंद्र इत्येवान्वयशाब्दं संभवतिनतु चंद्रप्रतियोगिकाभे
दवन्मुखमितितथाचनोपमेयोत्कर्षपर्यवसानंस्यादितिभावः रसगंगाधरादीनांसमा
धानमाह अत्रकेचित्तु इति अभेद इति तत्पुरुषः समानाधिकरणः कर्मधारय इतिवच
नात् उभाभ्यांप्रवृत्तिनिमित्ताभ्यामेकस्यधर्मिणोबोधनीयत्वादित्यर्थः मुखनिष्ठेति॥

© Dharmartha Trust J&K. Digitized by eGangotri

एवंचविशेषणविशेष्यभाववैचित्र्येपिचंद्रप्रतियोगिकाभेदवन्मुखमित्यनेनसमाना
र्थकत्वमेवेतिभावः वाक्यइति विशेषणस्यप्रतियोगित्वावगाहिज्ञानविषयइत्यर्थः स
मासेत्विति तत्रविशेषणस्यानुयोगित्वावगाहिज्ञानविषयइत्यर्थः एतन्मतमूलकंयत्तु
प्रतियोगित्वानुयोगित्वयोर्विशेष्यनिष्ठत्वेननिर्देशाभिमतः वाक्येअभेदंप्रतिविशेष्यभू
तस्यमुखस्यानुयोगित्वभानात् समासेचविशेष्यभूतस्यचंद्रादेरुपमानस्यप्रतियोगि
त्वभानात् अतस्तत्रवाक्येनुयोगित्वमुख्यः समासेप्रतियोगित्वमुख्यइतिभवदुक्तमित्यवि
रोधः एवंचयत्राभेदस्यप्रतियोगित्वमुख्यत्वंतत्ररूपकस्यानुवाद्यत्वं यथामुखचंद्रइति
समासे यत्रत्वनुयोगित्वमुख्यत्वंतत्रविधेयत्वंयथामुखंचंद्रइतिवाक्येइत्यर्थः क्वचिद्विशे
षणप्रतियोगिकत्वेनसंसर्गभानेपिअन्यत्रचेद्वैपरीत्यमपिदृश्यतेतदानुपपत्तिबलाद्

© Dharmartha Trust J&K. Digitized by eGangotri

त्रापिमुखविशेष्याभेदएवसंसर्गतयाकल्प्येतेतिशंकामपाकर्तुंसर्वत्रापिविशेषणप्रतियोगिक
एवसंसर्गइतिनियमएवायंनतत्संसर्गइत्यभिप्रायेणाह संसर्गमात्रेचेति सांसर्गिकविष
यतापन्नसंसर्गमात्रइत्यर्थः अन्यथादंडसंयोगइत्यादिशाब्दबोधपदार्थीभूतसंयोगस्यदं
डनिष्ठत्वेनापिभानादनुपपत्तिःस्यात् शाब्दातिरिक्तस्थलमेवोदाहरति पर्वतइति ननूक्तमे
वात्रोत्तरं विशेषणप्रतियोगिकएवसंसर्गोभासतइत्यत्रबीजाभावइतिकिंदर्शनमात्रमिदं
धननियमस्वीकारेणेत्याशंक्याह यत्त्विति दुराग्रहेति बीजाभावादित्यर्थः उपहसति नदे
वेति प्रामाणिकस्यदुराग्रहत्वोद्भावनमेवदुराग्रहपर्यवसायि भ्रांतिरूपत्वादित्यर्थः तथा
स्वीकारबीजंदर्शयति भासमानेति दंडीपुरुषइत्यत्रसंयोगाख्यदंडपुरुषयोर्वैशिष्ट्यंभा
सतेतत्रदंडःसंयोगप्रतियोगीतिविशेषणं पुरुषस्तुतत्रानुयोगीतिविशेष्यं एवंचयदि

© Dharmartha Trust J&K. Digitized by eGangotri

दुरुक्तत्वात् संसर्गे विशेषणत्वं अनुयोगित्वेनापि गृह्यते तदा विशेषणत्वविशेष्यत्वसत्वाद्यो विशेषणे

चातिव्याप्तिः स्यादिति भावः इदं च प्राचीनमतमनुसृत्य समाहितं विशेष्यत्वप्रकारत्वादिकम

तिरिक्तविषयताविशेषस्वरूपमेवेति नूतनपक्षमूलकं पूर्वमतास्वरसं हृदि निधाय प्रकृतानु

पपत्तिं च प्रकारांतरेण निराकर्तुमभिसंधाय विशेषणानुयोगिकोत्र संसर्ग इति कल्पनमेवा

क्षिपति अपिचेति मास्त्विति यद्यपि सोऽन्यश्चंद्रिकेति कर्मधारये सोऽन्यविशेष्यकाभेद

संसर्गकचंद्रिकाप्रकारकबोधो न तेन स्वीकृतः प्रकृते बाधात् किंतु सोऽन्यनिष्ठाभेदप्रति

योगिनी चंद्रिकेति चंद्रिकाविशेष्यक एवेत्ययमप्रसक्तप्रतिषेधः प्रतिभाति तथापि सोऽन्यनि

ष्ठत्वेन चंद्रिकाप्रतियोगिकाभेदावगाहनसामर्थ्येन तत्प्रतिषेधः कृतस्तात्पर्यं तु सोऽन्यनिष्ठाभेद

स्यादिबोधनिषेध एव नञ्वनिषेध प्रतियोगिबोधं साक्षादनुपातापत्तसमानविषयकज्ञानांत

© Dharmartha Trust J&K. Digitized by eGangotri

ततन्निषेधोऽनुचितइतिवाच्यं यथात्रसोऽजन्यविशेष्यकबोधोनसंभवतितथात्वदभिमतःसोऽजन्य
निष्ठत्वादिबोधोप्यनुपपत्तिसूचनार्थत्वात् अतएवयेनात्रविशेषणानुयोगिकत्वंभासतइ
त्यंगीक्रियतइत्यत्रतन्मतंयथाश्रुतमेवानुवदिष्यति कानामहानिरिति कानुपपत्तिरित्य
र्थः येनेति येनेतिहेत्वर्थेनिपातः यद्दर्हितादृशाकल्पनंविनाचंद्राभेदस्यसमर्थनमनुपपन्नंस्या
त्तदातद्बलादेवान्यत्रदृश्यमानमपिनियमवभ्रूयतथैवकल्प्येत तदुक्तं अन्यथानुपपत्तिश्च
दृष्टिवस्तुप्रसाधिका विनष्टिदृष्टयेमत्स्यंसेवसर्वबलाधिकेति अत्रतुवक्ष्यमाणरीत्यातद
न्यथाप्युपपन्नमितिनदृष्टपरित्यागःप्रमाणाभावादित्यभिप्रायः अन्यथोपपत्तिर्नास्त्येवेत्यभि
मानात्तत्तत्समर्थनानुपपत्तिमेवोद्भावयति नन्विति अन्यथोपपत्तिंदर्शयति तदुत्तरेति
सोऽजन्यप्रतियोगिकाभेदवतीचंद्रकेत्यतद्बोधान्तरेत्यर्थः तदुत्तरयथोक्तस्वाव्बोधासंभवा

© Dharmartha Trust J&K. Digitized by eGangotri

दाह मानसेति सोऽजन्यप्रतियोगिकमभेदं चंद्रिकायामवगाहमाने शाब्दबोधे कृते तदुत्तरं स्वस्य
स्वाभिन्नाभिन्नतया चंद्रिकाप्रतियोगिकमभेदं सोऽजन्ये गाहमानं मानसमुत्पद्यते तेनैवा
त्रिचंद्राभेदारोपः समर्थित इत्यर्थः अभेदमात्रस्य संसर्गत्वेपि तत्संसर्गतायां प्रतियोगितादा
नुयोगितादिकं कुतो न शाब्दबोधे भासत इत्यत आह पदार्थेति पदार्थतत्संसर्गाणामेवत
द्विषयत्वनियमादतिरिक्तस्य भानासंभवादित्यर्थः यद्यपि विशिष्टबुद्धिमात्रे विशेषणविशेष्य
तत्संसर्गातिरिक्तस्य भानं नास्तीति नियमात् शाब्दबोधेति विशेषोपादानमसंगतं तथापि प्र
कृतत्वात्तथोक्तम् समूहेति दंडपुरुषसंयोगा इति समूहालंबनात् दंडी पुरुष इति विशिष्ट
ज्ञानस्य वैलक्षण्यमनुभवसिद्धं तच्चोभयत्रापि विषयसाम्यादनुपपन्नं अतोऽन्यथानुपपत्त्या
विशिष्टज्ञाने विशेषणविशेष्ययोः संबंधस्य संयोगादेः संबंधः प्रतियोगित्वानुयोगित्वरूपो दं

© Dharmartha Trust J&K. Digitized by eGangotri

डपुरुषादिनिष्ठोभासते समूहालंबनेतु न तथेति विषयवैषम्याद्वैलक्षण्यमुपपन्नमिति केषांचि
न्मतं एवं चात्रापि विशिष्टबुद्धित्वात्तद्भाने संभवइत्यर्थः एकस्मिन्निति संबंधस्यापि संबंधो
भासनइत्यंशेइत्यर्थः अन्यत्रेति विशेषणस्यानुयोगित्वं विशेष्यस्य च प्रतियोगित्वं अभेदं प्र
तिभातीति त्वया स्वीकारात्तद्वैपरीत्यमित्यर्थः नच विशेषणयोः संबंधसंबंधोपि भासतइ
त्येव तन्मतं ननु विशेष्यानुयोगिकोविशेषणप्रतियोगिकश्चेत्येतावत्पर्यंतमपीति वाच्यं
५४ तात्पर्यं तस्यैव तन्मतत्वात् तथा चानुमितिलक्षणेपक्षधर्मिप्रेरुक्तम् विशेष्यविशेषणा
नुयोगिकप्रतियोगिकसंबंधस्यैव विशिष्टधीविषयत्वादिति समवायविचारेपि प्रत्यक्षालोके
तेरुक्तं विशेषणे प्रतियोगित्वस्य विशेष्ये चानुयोगित्वस्य भानादिति नच विशेष्यत्वादिकं
भासमानवैशिष्ट्यानुयोगित्वादिरूपमिति पक्षसंसर्गस्य विशेषणप्रतियोगिकत्वनियमो

© Dharmartha Trust J&K. Digitized by eGangotri

नत्वतिरिक्तत्वपक्षेपीतिवाच्यं तत्पदार्थस्यातिरिक्तानतिरिक्तत्वमात्र एव हि विवादो न तु व
स्तुस्वरूपे तस्योभयत्राप्यविशिष्टत्वात् तदेवमभ्युपेत्यापि प्रतियोगित्वादिबोधं दूषण
मप्यपाधि संप्रतितदेवानुपपन्नमित्याह वस्तुतस्त्विति अन्यथैवेति तत्प्रकारकत्वमेव
विशिष्टज्ञानत्वं तत्त्वस्वरूपसंबंधविशेषः समूहालंबनसाधारणस्यैव तद्वैलक्षण्यमिति
भावः नत्विति दंडपुरुषतदुभयानुयोगिकप्रतियोगिकसंयोगा इति समूहालंबनाद्दंडी
पुरुष इति विशिष्टज्ञानभेदानुपपत्तिप्रसंगादनवस्थानाच्चेति भावः। शाब्दस्यैव तादृशबो
धस्य तादृशारोपसमर्थकत्वमित्यत्र प्रमाणाभावमाह अपि चेति विषयत्वाभावेपीति
तत्र बिंबप्रतिबिंबभावापन्नपदार्थानामुपमेयोपमानविशेषणतापन्नत्वेन परस्परम
भेदान्वयासंभवादिति भावः सर्वेषामविवादसूचनाय आलंकारिकत्वावच्छेदेनेति अनु

© Dharmartha Trust J&K. Digitized by eGangotri

शाब्दान्वयाभावे पीति ।

गाम्यधर्मत्वलेप्याह एवमिति चं वा यापत्त्री लिंगत्वेन भिन्नलिंगावरुद्धत्वादित्यर्थः एवेति पातेति
तथा च तत्र चंद्रमुखमिति प्रयोगे तस्याऽसाधुत्वापत्तिरित्यर्थः एतादृशवैषम्यं त्वत्पक्षेपि तु
समाधानमेवेत्याह अन्यथेति इदं च सर्वं संभवादुक्तं वस्तुतस्तु सोऽजन्यचंद्रिकेतिशा
ब्दात्पूर्वं सोऽजन्याभिन्ना चंद्रिकेति योग्यताज्ञानस्याहार्यस्यावश्यकतया तत्र च समानवित्ति
वेद्यन्यायेन चंद्रिकायां सोऽजन्याभेदस्याप्यवगाहनसंभवात्तत एव शाब्दे चंद्राभेदारोपसिद्धिः
अतः सोऽजन्यचंद्रिकेतिशाब्दाव्यवधानेनैव शाब्दे चंद्रारोपस्यानुभवविकल्पात्कथं तदुत्तरभावि
बोधेन तत्समर्थनमित्यपि न प्रस्तवस्थेयम् अत एव तस्य शाब्दसमानकालीनतया रत्नं तःपु
रत्वारोपो विद्धृदित्यत्र हृदये सरस्त्वारोप आलानं जयकुंजरस्येत्यादौ जयकुंजरत्वारोपर
स्यादित्यंथाः संगच्छंते वस्तुतः संबंधिनोरभेदबोधस्तेरभेदबोधे हेतुरित्येव हेतुहेतुमद्भा

कः

166

© Dharmartha Trust J&K. Digitized by eGangotri

वृत्त्वित: परस्पराभेदबोधप्रतिबंधकभेदज्ञानविघटकत्वाविशेषात् नहितत्संबंधभेदबोधा
पिस्यात्तत्रोलात्तद भेदबोधहेतु: किंतु भेदज्ञाननिरासद्वारैवेति चंद्रिकासौजन्ययोरभेद
बुद्ध्याराजचंद्रयोरभेदारोप: सिध्यत्येवेति न प्रयासलेशोप्यादरणीय: परंतु मुखचंद्रइ
तिसमासगतरूपके चंद्रप्रतियोगिकाभेदवन्मुखमिति बोधानुरोधेन मानसज्ञानाश्रयणं
तत्रैव समुक्तं अत एव विद्यासंध्योदयोद्रेकादविद्यारजनीक्षये यदुदेति नमस्तस्मै कस्मैचि
द्विश्वचक्षुषे इति किरणावलिश्लोके विद्याविद्ययो: संध्यारजनीभ्यां रूपणाद्विरुदेतालभ्य
तइतिप्रकाशग्रंथोविभक्तिपरिणामेन संध्यारजन्योर्विद्याविद्याभ्यां रूपणादिति तद्विवरणे २३
मिश्रग्रंथश्च मानसशाब्दबोधावभिसंधायसंगच्छते इति तदेतत्सर्वं मनसि कृत्वाह द्विगिति
वाक्यार्थरूपकं केचिदुक्तं खंडयितुमुपन्यस्यति अत्रेदमपीति अधिकमिति प्राचीनेभ्योति

© Dharmartha Trust J&K. Digitized by eGangotri

१६७

167

रिकमित्यर्थः वाक्यार्थेति एकस्मिन्वाक्यार्थे वाक्यार्थान्तरारोपो वाक्यार्थरूपकमित्यर्थः विशिष्टो
पमायामिति पांड्योपमंसार्पितलंवहारः कुचाग्रगो हरिचंदनेन आभाति बालातपरक्त
सानुसानिर्हेमाद्रिराज इत्यादौ विशेषणानां बिंबप्रतिबिंबभावापन्नहारनिर्झरादी
नां उपमानोपमेयभावः सादृश्य एतच्च तेषां परस्परसादृश्यज्ञानेन विशिष्टोपमानिर्वाह
इति पक्षे तदभेदज्ञानस्यैव तथात्वमिति पक्षेपि सादृश्यमभेदरूपमेवव्यास्तं तथेति तपोद
नसलीलोत्कटादीनामर्थादभेदो गम्यत इत्यर्थः एतद्दूषयितुमाह प्राचीनास्त्विति निदर्श
नमिति अन्यथा तत्र वाक्यार्थरूपकत्वस्यैवापत्त्या निदर्शनोदाहरणत्वं विरुध्येतेत्यर्थः न
न्वनभ्युपगममात्रेण वाक्यार्थरूपकखंडनेन सुघटमित्यभिप्रायवानाह अत्रापीति ननु मु
खं चंद्र इत्यत्र निदर्शनालक्षणाभावाद्रूपकस्वीकारेपि प्रकृते निदर्शनालक्षणाक्रांतत्वा

६२

रू:
१६७

© Dharmartha Trust J&K. Digitized by eGangotri

न्नतद्वद्विर्भाव: साधयितुं शक्यो विनिगमकाभावादित्यत आह किंवेति पदार्थेति धर्म्यंत
रसंबंधिधर्मस्य धर्म्यंतरे आरोपरूपेत्यर्थः वाक्यार्थेति वाक्यार्थयोः सदृशयोरैक्यारोपो
निदर्शनेत्युक्तलक्षणेत्यर्थः विशिष्टार्थयोरिति पदार्थनिदर्शनायांतु शुद्धपदार्थस्यैवारो
प इत्यर्थः सोपि तत्र भेदेनारोप्यते अत्र त्वभेदेनेति वैषम्यांतरमपि दर्शयति अभेदप्रतीतेरि
ति तदेवं स्पष्टयति धर्म्यंतर इति त्वद्दृनेत्रादिरूपधर्मिणि तत्सदृशनीलांबुजन्मरूप
स्य धर्मिणो लीलारूपो धर्म आरोप्यत इत्यर्थः ननु वाक्यार्थरूपकोच्छेदापत्तिरिष्टापादनमे
व तर्ह्येदमेव तेषां प्रकृतत्वादित्यत आह न चेष्टेति यदि हि स्वानभिमतत्वमात्रेण वाक्या
र्थरूपकोच्छेदस्तथा इष्टापत्त्या परिहर्तव्यः तदा मया वाक्यार्थरूपकमेव स्वीकृत्य वार्थनि
दर्शनोच्छेदेपीष्टापत्तिरेव कर्त्तव्येति भावः किं च मत्पक्षे वाक्यार्थनिदर्शनाया विषयांतरस

का। २

© Dharmartha Trust J&K. Digitized by eGangotri

१६८
168

त्वान्नात्यंतं तदुच्छेदः नवत्तुवाक्यार्थरूपकस्य निरवकाशत्वापत्तिरेवेति बहूनामनुग्रहोन्या
य्य इति न्यायेन मत्पक्ष एव प्रमाणवानित्याह त्वत्पारेति नन्वलक्तकचंदनादीनां बिंबप्रति
बिंबभावसत्वादलक्तकमार्गेन रूपस्य विषयस्य अलक्तकरूपबिंबविशिष्टत्वात्कथमेतद्रू
पकं तत्र बिंबप्रतिबिंबभावानंगीकारात् अत एव बिंबाविशिष्ट इति विषयविशेषणं चित्र
मीमांसायां रूपकलक्षणेभिहितमित्यत आह नचेति मानाभावादिति रूपकशरीरभूताभेद
प्रतिकूलत्वविरहेण तदनंगीकारस्यानुचितत्वादित्यर्थः ननु लक्ष्यानुरोधेन लक्षणप्रणय
नं लक्ष्ये पुनर्विषयो बिंबविशिष्टो न दृश्यत इति तद्धर्मो वा युक्त एव नच प्रकृतस्थल एव बिं
बवैशिष्ट्यमस्तीति वाच्यं अस्य रूपकत्वेन उभयसंप्रतिपत्तिविषयत्वविरहादित्याशंकायामु
भयाभिमतरूपकस्थल एव बिंबवैशिष्ट्यं दर्शयति कंदर्पेति कलंकविशिष्टचंद्रदानां तुलां

रू
१६८

© Dharmartha Trust J&K. Digitized by eGangotri

क्षितकंबुतादात्म्यारोपादत्र विषयस्य बिंबवैशिष्ट्यमस्त्येवेति भावः स्वीकारादिति अलंका
रसर्वस्वविवरणकृतेत्यर्थः ननुक्षालनपदस्य जलसंबंधार्थकत्वात्कथमभेद इत्याशंक्याह
लक्षणेनचेति विशेष्याभेद इति सविशेषणे हीतिन्यायेन दंडिकुंडलिचैत्राभेदस्य दंडकुंडला
भेदपर्यवसानादित्यर्थः तदुक्तं टीकाकारचरणैः देशकालोकामं विभीद्य यातां ननु तक्षालि
तस्वभावः पद्मरागमणिरिति नन्वौपाधिकभेदमादायैव तर्हि रूपकमस्तु इत्यत आह उ
पमानत्वेति उपमानपदप्रवृत्तिनिमित्तेत्यर्थः एवमुपमेयतावच्छेदकेऽप्यत्रापि मंतव्यं अन्यथा
तपोधनानामुपमेये सलिलस्य चोपमाने विशेषणत्वेनोपमेयोपमानतावच्छेदकतया तद्
दसत्वेन रूपकत्वापत्तेरपरिहारात् नन्वेवमपि सर्वस्वकारोदाहृतनिदर्शनास्थले रूपकम
वारणीयमेव तत्र त्वदुक्तधर्मयोर्भेदसत्वादित्यत आह किंचेति तात्पर्यमिति तथाशाब्दबो

© Dharmartha Trust J&K. Digitized by eGangotri

धाभावादितिभावः नसिध्यतीति नचवाक्यार्थयोरभेदारोपस्यनिदर्शनानिर्वाहार्थत्वमपिवाच्य
त्वात्कथमेतद्दोषाक्षेपइतिवाच्यं नह्यभेदारोपस्यायमाक्षेपोयेनोक्तदोषःस्यात् किंतुतस्या
लंकारत्वविरहमात्रेतात्पर्यम् इदंचाग्रेस्वयमेवविस्पष्टीकरिष्यति किंचयत्रधर्मिणःकिंचित्
प्रयोगिकाभेदवत्ताप्रयुक्तोत्कर्षविवक्षातत्ररूपकालंकारः अत्रतुमार्जनस्ययथोक्तपांडरी
करणाभेदप्रयुक्तोत्कर्षोनविवक्षितइत्याह मार्जनस्येति यदुत्कर्षेउक्तवाक्यतात्पर्यंतस्यैवो
पमेयत्वात् तादृशस्याप्यत्रनत्वात्एवंनतुमार्जनमित्यर्थः ननुपरंपरयामार्जनधर्मिकपांडरी
करणप्रतियोगिकाभेदबोधस्यापिनत्वोत्कर्षपर्यवसायित्वमस्त्येवेतिनोक्तदोषइत्याह ए
तादृशेति ननुवैयर्थ्यप्रतियोगित्वरूपधर्मप्रयोज्यएवोभयोस्तादात्म्यारोपः आरोप्यमात्रे
सादृश्यस्यहेतुत्वादित्यतआह यत्किंचिदिति स्वाश्रयोत्कर्षपर्यवसायिनएवाभेदस्यालंका

© Dharmartha Trust J&K. Digitized by eGangotri

त्वात् वैयर्थ्यप्रतियोगित्वरूपधर्ममूलकताद्रात्म्यारोपस्यचमार्जनापकर्षएवपर्यवसाना
दितिभावः सादृश्यस्येति यथाताद्रूप्यासादृश्यंनोपमातथातन्मूलकतादात्म्यारोपोनरूप
कमपीत्यर्थः उभयोर्वैयर्थ्यमेवदर्शयति तस्मादिति मूलयुक्तिमुक्त्वांतरयुक्तिमाह तेनचे
ति अप्रसिद्धत्वेति यथाप्रकृतएवचंद्रस्यचंदनजन्यपांडरीकरणमप्रसिद्धमित्यर्थः रूपकत्वेति·
मुखंचंद्रइत्यारोपेचंद्रादेःप्रसिद्धत्वादितिभावः निदर्शनांतरेपिअभेदप्रतियोग्यप्रसिद्धिंदर्शयति
तद्वदिति अत्रपूर्णेंदोरकलंकत्वमप्रसिद्धमेवेत्यर्थः एवंक्वस्यैत्यादावपिबोध्यं सोयंकुरं
गेति हर्षचरितेराज्यवर्द्धनस्योक्तिः सर्वेषामपिमालवैःपरिभवइत्यत्राभेदारोपः एताव
न्मात्रमेववैषम्यबीजमितिभ्रमेणतत्रव्यभिचारमुद्भावयति नन्विति नायमिति अभेदप्रति
योग्यप्रसिद्धिरूपइत्यर्थः प्रदीपेति सोऽयंपेलहयोर्भगवत्पादानामुक्तिः अत्रनीराजनादीनां

© Dharmartha Trust J&K. Digitized by eGangotri

स्वतःप्रसिद्धत्वेनसंभवित्वमेवेत्यर्थः अत्रवाक्यार्थेनिदर्शनायामेवाऽभेदप्रतियोगिनोवाक्यार्थ
स्याप्रसिद्धत्वमित्येवविवक्षितं वियोगेगौडनारीणामितितुपदार्थनिदर्शनैवेतिनव्यभिचारः
वाक्यार्थनिदर्शनात्तद्रूपकयोरेवात्रवैधर्म्यस्यप्रस्तुतत्वात् प्रदीपेत्वत्रतुयद्यपिवाक्यार्थ
निदर्शनैव तथापितद्धर्माभाववतितत्संबंधजनकाएवनीराजनादयोऽभिमताः तथै
वप्रकृतोत्कर्षसिद्धिः सूर्येनीराजनादयश्चसूर्यादावालोकाद्यभाववतिआलोकसंबंधा
दिजनकत्वविशिष्टाअप्रसिद्धाएवेतिनव्यभिचारइतिसमाधातुंशक्यते तथापिनिदर्शनाया
मभेदप्रतियोगिनोवाक्यार्थस्यप्रसिद्धेरप्यभ्युपगमस्यसर्वप्रसिद्धत्वात्तदपहायान्यदेवा
ह किंततइति नहीति अत्ररूपकत्वाभावेपूर्वमेवयुक्तिरुक्ता इदंत्वत्रवांतरवैधर्म्येसंभवमा
त्रानुकूलंनत्वेतत्स्वरूपकत्वेलक्षणस्यसाधकं येनैतद्व्यभिचारेणवाक्यार्थनिदर्शनास्थलेपिवाक्या

© Dharmartha Trust J&K. Digitized by eGangotri

र्थे रूपकमापद्येतेत्यर्थः तदेतावतापेतादृशाभेदारोपस्यालंकारत्वाभावउक्तः अलंकारत्वंन
निर्वहतीत्युक्तेः तत्राभेदारोपएवनिषिध्यतइतिभ्रांतोदेशयति अयेति नहीति येनात्रनिद
र्शनात्वमप्यभेदारोपमूलकंनस्यादितिदोषःप्रसज्येतेतिभावः किंत्विति तथाचाभेदमात्र
स्यचमत्कारजनकत्वविरहात्तावन्मात्रशरीरंरूपकमत्रनालंकारमर्थः यत्तुपूर्वंपाठांतरे
णात्वत्पादनखरत्वेतिश्लोकएवनिदर्शनावकाशोदर्शितस्तत्खंडयति किंचेति कत्रौरि
ति यत्तच्छूद्रपरामृष्टयोर्मार्जनपांडरीकरणकत्रौरित्यर्थः अवांतरविचारमुत्क्वावाक्या
र्थेरूपकस्वीकर्तृणांमूलयुक्तिंखंडयितुमुपन्यस्यति यदपीति जीवातुत्वेति तल्लक्षण
त्वेत्यर्थः ननूदाहृतस्थलेनिदर्शनास्वीकारात्तस्याअपिअभेदारोपनिबंधनत्वात्तदंवैध
र्म्यमित्यतआह निदर्शनाजीवातुत्वंत्विति निदर्शनात्वावच्छेदेनोपजीव्यत्वादित्यर्थः व्य

© Dharmartha Trust J&K. Digitized by eGangotri

भिचारमाह इंदुशोभामिति तत्राश्रयत्वादिनैव शोभादेर्मुख्यादावारोपादिति भावः एवं चा
लंकारसासाद्भिभाजकोपाध्यवच्छेदेन रूपकेत्वादृश्योपाधिसामानाधिकरण्येन च निदर्श
नायामभेदारोपस्यापेक्षितत्वात् तस्य रूपकपक्षपातित्वमेवेत्याशयः अभेद = ।

© Dharmartha Trust J&K. Digitized by eGangotri